Published by—Pandit Ramchandra Shastri Kinjavadekar, Dikshit,
General Editor for The Mimamsa Grantha Prakashaka Samiti,
403/2, Sadashiv, Poona 2, India.

Price Rs. 6-4-0

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press,
26-28, Kolbhat Street, Bombay 2.

CONTENTS

PLATES

†

निवेदनम् ।

उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत् तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च महीसुरैश्चेत्तानन्तरेण निपतेत् क नु मत्प्रणामः ? ॥

—श्रीभोजराजः

अयि प्रेक्षावत्प्रमुखाः ! सनातनवैदिकधर्मजीवातुभूताः ! विदितमेव तत्रभवतां यत्—सर्वान् द्विजानुद्दिश्य भगवती श्रुतिराज्ञापयामास 'स्वाध्यायोऽध्येतव्यः' इति । वेदबोधितेष्टसाधनताकत्वस्यैव धर्मलक्षणत्वात् अर्थज्ञानोपहितं वेदाध्ययनमेव समीहितार्थाय भवति, नान्यथेति "ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च" "योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा" इत्यादिभिर्वचनैः "अथातो धर्मजिज्ञासा" इत्येतदधिकरणोक्तजैमिनीयन्यायदिशा चैतदेव निश्चप्रचं सिध्यति ।

अनयैव सरण्या गच्छन्तः सर्वेऽपि प्राचीनाः सनातनधर्मनिष्ठाः वैदिका नित्यनैमित्तिकानि कर्माणि समाचरन् । परं प्रबलेन कालहतकेन विपर्यस्तायां लोकव्यवस्थायां, वेदार्थज्ञाननिदानभूतायां च याज्ञिकसरणौ प्रायः इतिहासमात्रविश्रांतायां, वेदार्थज्ञाने क्लिश्नन्तोऽपि नैव संपूर्णतस्तत्तत्त्वमवगच्छन्ति । तामेतां दुरवस्थां निध्यायमानैर्मीमांसाग्रंथप्रकाशकसमितिप्रचालकैः धर्मजिज्ञासोपयोगिने वेदार्थप्रचाराय स्वशक्त्या कियानपि प्रयत्नः कृष्णयजुर्वेदप्रकरणकौमुदीप्रकाशनरूपेण समनुष्ठीयते ।

सोऽयं यजुषां वेदो नानाशाखाविभक्तो यज्ञकाण्डीयाध्वर्यवादिसमर्पकः कृतपरिश्रमैरपि दुरवबोध एव भवति । अतोऽत्र सकलेऽपि कृष्णयजुर्वेदे इतस्ततो विप्रकीर्णानां तत्तद्यज्ञियप्रकरणोपयुक्तानामंशानामुपसंहारपूर्वकमाधानप्रभृतिषु प्रकरणेषु यथायथं विभज्य संग्रहः क्रियते ।

एतेन कृष्णयजुर्वेदप्रकरणकौमुद्याख्येन कृष्णयजुर्वेदप्रबन्धेन वैदिकाः, याज्ञिकाः, तत्तत्कर्मानुष्ठानपटवः, श्रद्धालवः, कर्मनिष्ठा अन्ये च विविधफलोद्देशेन कृष्णयजुर्वेदमभ्यस्यन्तः सर्व एव यत्सत्यं परमं प्रमोदमुपयास्यन्तीति मन्यामहे । आधानादिब्रह्मविद्यान्तैरेकोनत्रिंशैः प्रकरणैः समुपेतोऽयं समग्रोऽपि कृष्णयजुर्वेदो विविधाङ्गोपाङ्गसमन्वितः क्रमेण महाजनाधारेण प्रकाशं यायात् । संप्रति चाधानपुनराधानात्मकः प्रथमो भागोऽयं भूमिकाभाष्यांग्लानुवादटिप्पण्यादिभिर्महामूल्यैरलङ्कारैरलङ्कृत्य विदुषां पुरतः स्थाप्यते ।

आधानविषयकाणामवशिष्टानामंशानामेतद्ग्रंथप्रणेत्रैवाधानपद्धत्यामग्निहोत्रचंद्रिकायां चाधानपद्धतिशेषतया सुविशदं निरूपितत्वान्नात्र ते पुनः संगृहीताः ।

एतद्ग्रंथप्रकाशनकार्ये साहाय्यमनुतिष्ठतामधस्तनानां पुण्यशीलानां नामस्मरणेनात्मानं पावयामः । ग्रंथकर्तॄणामीदृशेऽतिकठिने कर्मणि निर्निद्रं साहाय्यं कुर्वतां ब्रह्मश्रीश्रौतविद्यानन्दकृष्णरामदीक्षित हानगल इत्येतेषां नाम प्राथमिकीं श्रेणिमधिरोहति । संप्रति भारते वर्षे इमाने-

EDITORIAL NOTE.

If the highest state is possible through Dharma and its measurement by words of artificial construction which can only be enlightened by the gods on earth, where also can my obcisance go ? —S'rī Bhojarāja.

Dear Readers ! To you who are the life blood of the Sanatana Vaidika Dharma it is well known that the divine Sruti ordained in so far as the twice born are concerned, the study of the Vedas. But this study of the Vedas becomes fruitful in the proper sense only if it is accompanied by a true undeistanding of the inner significance, for the character of Dharma, can only be towards the realisation of the good implied in the Vedas. This cannot be otherwise, as pointed out by such teachings as: 'A brahmana should study and understand without any motive the Veda with its six branches', 'He who, forsooth, understands the meaning, enjoys auspicious, reaches to heaven, being purified by knowledge'. This is verily established by such sentences leading up to the study of Dharma according to the Science propounded by Jaimini.

Following in this direction our ancestors, who were devoted to Sanatana Dharma, practised the NITYA and NAIMITTIKA sacrifices. But with a change in time which destroyed the Society favourable to the practice of Vedic injunctions, people who study with great difficulty the Vedas and their significance, do not completely attain their object, because of the loss of the true practical sacrificial tradition. It is in order to remedy this state of affairs to some extent that the Mimamsa Grantha Prakashaka Samiti has undertaken to publish according to its means a few books explaining and propagating the Vedic doctrines.

The Yajurveda divided into different *S'ākhās* and the basic text for all sacrificial activities, is indeed difficult to be understood even by persons who exert a great deal towards this object. It is therefore divided here into proper sections according to the different sacrifices described and rearranged. It is hoped that this rearranged text entitled Kṛṣṇa Yajurveda Prakaraṇa Kaumudi will be very useful to all sacrifices and followers of the Karmamīmāmsā and others who wish to study the Kṛṣṇa Yajurveda. This work is divided into twenty nine sections beginning with Ādhāna and ending with Brahmavidyā, with all major and subsidiary branches. May it gradually see the light of the day with the encouragement of the enlightened readers. We are now presenting here the first part cansisting of Ādhāna and Punarādhāna with Introduction, English Taanslation and notes and costly illustrations. Since the Ādhāna has been properly described by the Editor of this volume in his ĀDHĀNAPADHATI we shall not repeat his observations here.

In publishing this work we have received instinted and spontaneous help and encouragement from Pandit Rāmadīksita Hāngal, the very em- [illegible] learning and one considered the greatest Vedic scholars. [illegible] it in English and that great Karnatnk Scholar [illegible] written the Sanskrit Introduction. To [illegible] Our thanks are also due to [illegible] helped us in many ways [illegible] light of Sanatana Dharma [illegible] ter our sincere felicitations.

[illegible] R. D. K.

PREFACE.

The present translation of the Ādhāna and Punarādhāna sections o rearranged Taittirīya Veda (=Saṁhitā, Brāhmaṇa, Āraṇyaka and Upan portions) is due to the request of Paṇḍit Vāmanas'āstrī Kinjavadekar, the en prising General Secretary of the M. G. P. Samiti. Originally it was intende add copious notes to explain the traditional point of view along with mo interpretations suggested by the Western methods of research. But o to the Sanskrit Commentary of Sāyaṇa explaining the traditional point of v only a philological translation has been attempted here. Difficulties linguistic nature are alone dealt with in general in the footnotes. The Glo rial Index is designed to explain difficult words of a technical nature. proposed to add a volume of explanatory notes taking into account the vers of other recensions of the Yajurveda when the entire translation of th rearranged chapters is published, so as to avoid unnecessary duplication. success of the plan must necessarily depend upon the amount of encouragem received from Oriental Scholars. It is the hope of the M. G. P. Samiti that English Translation will materially help to promulgate the Mīmāṁsā Scie among all Oriental Scholars in the world.

It now remains for me to express my obligations to the many friends have helped me in this difficult task. Paṇḍit Vāmanas'āstrī has patiently bo with the many unavoidable delays in the preparation of this work, and courtesy throughout has been a source of inspiration to me. His nepl Rāmacandras'āstrī Kinjavadekar has often discussed with me the differ aspects of this work, and as Editor materially helped me with the proof corr tion. To my friend Mr. P. K. Gode, M. A., I am deeply indebted for having gone through the entire press copy as well as the final proofs of the wo He was, moreover, responsible in persuading me to undertake this work for M. G. P. Samiti. To my brother Mr. R. M. Katre, I am indebted for hav typed out the entire MS. for the press. Finally the M. G. P. Samiti Office ha collaborated with the Nirnaya Sāgar Press in rendering me every assistance carrying out the complicated printing. To all these friends I offer my sinc thanks.

I shall consider my labour amply rewarded if the M. G. P. Sam successfully carries out its programme of publications, which is only possi if the scholarly world gives sufficient encouragement.

Deccan Gymkhana,
Poona 4.

S. M. KATRE.

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
		भूमिका ।	
२	१४	पित्रर्णापा	पितृऋणापा०
,,	२३	कार्यधूर्मदीय	कार्यधुरामदीय
३	५	राष्ट्रधुरं	राष्ट्रधुरां
५	२२	(२-४-१०)	(बृह० २-४-१०)
,,	२४	उच्चारणाविषय	उच्चारणविषय
७	१५	नोपतिष्ठेयुः	नोपतिष्ठेरन्
,,	२७	विशेषभाञ्जो	विशेषभाजो
९	१७	२. था	२. पा.
,,	२१	३२	३३
,,	२२	विभागो ऋचां	विभाग ऋचां
१०	९	ज्योतिषार्णीति	ज्यौतिषार्णीति
,,	१३	ज्योतिषं	ज्यौतिषं
,,	२३	भारद्वाज	भरद्वाज
,,	२४	मानव	मनु
,,	,,	काठक	कठ
,,	२५	वेदधर्मोऽनेनेति	वेदधर्मोऽनयेति
,,	२९	स्विन्नास्ते	स्विन्नास इति यस्विन्नास्ते
११	११	सनश्चेच्छासाध्यविचारे	सन्नन्तस्येच्छासाध्यविचारे
,,	१८	रराजते	रराज्यते
१४	११	पला	पाला.
,,	१७	यपङ्क्तिः	यपक्तिः
,,	२५	नैवाविद्यक	नैवाविद्यिक
१५	१५	०वृत्तिःप.	०वृत्तिफलको विधिः प०
१६	१३	०म्पती	०म्पति
१८	९	परावपवनाधि	परावपनाधि
१९	७	तस्यान्न	तस्या अन्न
२२	४	त्यवदा	त्यन्नदा
२३	१५	यजि	यज
,,	२७	त्रयोदशादि	त्रयोदशाहादि
२८	१६	रुच्य	रुध्य
२९	२	ज्ञादा	ज्ञादां
		आधानप्रकरणम् ।	
३	१४	वंसीया	वसींया
४	८	द्वितत्सु	द्वितसु
५	१६	जमान	जन
७	२४	स्रष्टुं	स्प्रष्टुं
९	१	तृतीय प्र.	प्रथम प्र.
,,	२६	मित्तत्वे	मितत्वे
१०	१०	च्येपा॒ꣳ	च्यैपाꣳ
१२	१	तृतीय प्र	प्रथम प्र
१२	१३	ज्योतिरे	ज्योतिंरे
१५	४	ण्डे पञ्चम	ण्डे प्रथम
१६	२१	निरपवन्	निरवपन्
,,	२२	यामग्र	याग्र
१८	३	देवर्	देंवर्
१९	२४	पञ्चम	प्रथम
,,	२५	४.४.४।	४.४।
२०	२४	नीयस्स	नीयास्स
२१	१२	थ॒न्तर॒म्	थ॒न्त॒र॒म्
२२	९	न॒ꣳ	न॒ꣳ॒
२३	६	न॒ꣳ	न॒ꣳ॒
२६	२	मा॒ꣳस	मा॒ꣳ॒स
२६	३	न्मा॒ꣳ	न्मा॒ꣳ॒
२७	६	घृ॒तंवती	घृ॒तवंती
२८	७	पाङ्क्ꣳ	पाङ्क्ꣳ॑
,,	९	शाꣳ	शाꣳ॑
३३	२	रु॒ꣳ	रु॒ꣳ॒
३४	१	या॒ꣳ	या॒ꣳ॒

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
,,	२२	स्कर	स्कार
३५	५	सुय	सुय
३६	१८	पार्थिवाः	पार्थिवा
३७	१	तुं	तुँ
,,	२	राऽं	राँ
३८	१	जात	जातं
४३	२	तास	तास
,,	६	त्सुन्व	त्सुव
,,	७	प्रजापतेर्ह्वे	चत्वारि

पुनराधान प्रकरणम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	३	युं	युँ
,,	,,	पुनरा	पुनरा
५	२	प्राऽं	प्राँ
६	४	वीरहा	वीरहा
६	९	संभाराः	संभाराः
७	१	प्रथमाष्टके	प्रथमकाण्डे
,,	४	त्रिं	त्रिँ
९	४	स्वाऽं	स्वाँ
१०	२०	आह	आह
१३	८	संभृत्याः	संभृत्याः
१४	२	प्राऽं	प्राँ
,,	३	,,	,,
१५	२	तेन	तेन
,,	२१	७	१७

Correction Slip for English Translation:

[Owing to the complicated diacritical marks indicated above several slips have occurred, and the kind Readers are requested to correct them as they find them.]

For Adhāna *read* Ādhāna
,, Ahavaníya ,, Āhavaníya
,, Bhámi ,, Bhúmi

Ādhāna Translation. P. 14, § 61, for *taṇḍaláḥ* read *taṇḍuláḥ*.
P. 24, § 128, for *paryápayat* read *paryapaśyat*.

Table of Transliteration.

अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ऌ	ए	ऐ	ओ	औ	ं	:
a	ā	i	ī	u	ū	ṛ	ṝ	ḷ	e	ai	o	au	ṁ	ḥ

क्	ख्	ग्	घ्	ङ्	च्	छ्	ज्	झ्	ञ्	ट्	ठ्	ड्	ढ्	ण्
k	kh	g	gh	ṅ	c	ch	j	jh	ñ	ṭ	ṭh	ḍ	ḍh	ṇ

त्	थ्	द्	ध्	न्	प्	फ्	ब्	भ्	म्	य्	र्	ल्	व्	श्
t	th	d	dh	n	p	ph	b	bh	m	y	r	l	v	ś

ष्	स्	ह्
ṣ	s	h

Accents: ॒ for *udātta*, as in Agní.
॑ for independent *svarita* as in vīryàm.

ALLAHABAD,
November 27, 1933.

My Dear Shastriji,

Many thanks for your note. I am very glad to hear that you are making arrangements for a new edition of the Taittirīya text duly arranged and divided into proper sections. Such an edition has long been a desideratum, and one result of this has been that scholars of the Mimamsa have not been able to make that use of the Taittirīya text which they should have done. It is strange that the older generation of Vedic scholars did not deal with the Taittirīya texts as thoroughly as they did with Rigveda or the Shukla Yajurveda text. Such an edition as you are contemplating will be very useful to all students of Karmakand in general and our University students and modern scholars in particular, who have neither the time nor the patience to wade through unarranged text. I hope you will be able to carry out the edition soon.

With all good wishes,

Yours Sincerely,
Sd/- Ganganath Jha.

The Mimamsa Grantha Prakasaka Samiti has been doing excellent work. It has now started the much more ambitious scheme of printing and publishing the more important basic texts bearing upon Purva Mimamsa. The Purva-Mimamsa has taken for its basis texts from the Krishna-Yajurveda Samhita and Brahmana. These texts are not easily traceable in the Samhita. The new edition that has been planned by the Samiti is calculated to benefit the student of Mimamsa especially as it is bringing out together in one place the texts bearing upon a particular ritual; e. g., all the Mantras and other texts bearing upon the Adhana, i. e., fire installation, have been brought together in one place; and so on with regard to all the more important rituals. The plan resembles to a very large extent that of the Siddhantakaumudi bearing upon the Ashtadhyayi sutras of Panini, and has therefore rightly been styled 'Prakarana-kaumudi'.

ALLAHABAD,
10th February, 1938.

Sd/- Ganganath Jha.

THE UNIVERSITY OF THE PUNJAB.

No. 381/V. C.

University Hall, Lahore,

Dated the 22nd January, 1934.

From Dr. A. C. Woolner, C. I. E., M. A., D. LITT., F. A. S. B.,

Vice-Chancellor,

University of the Punjab, Lahore.

Dear Sir,

I am in receipt of your letter No. nil dated the 22nd November, 1933 and am glad to learn that you have divided the Text of the Black Yajurveda into the Mantra and Brahmana portions. Indeed there was a need for such a Text. I am sure the work will prove highly useful to students of the Vedas. The want of this kind of text was, perhaps, one of the chief causes why the Yajurveda is not so widely read in our Universities as the Rigveda is.

Yours truly,

Sd - A. C. Woolner,

Vice-Chancellor,

University of the Punjab, Lahore.

I have seen some printed pages of The Yajurveda-Prakarana-Kaumudi. The work of this kind is a desideration and will be of great use to scholars who desire to study the Yajurveda and the whole system of sacrifices and rituals followed by the Vedic Sages and Rishis. The authors are treating the Holy Yajurveda in the same manner as Bhattoji Dixit the great Grammarian had treated Ashtadhyayi of Panini in the preparation of his immortal work on Sanskrit Grammar Sidhdhanta Kaumudi. The Mantras in the Yajurveda are all arranged and collected under appropriate topics and thus this collection of classified Mantras will enable the student to pursue the form and details of the sacrifices very easily and intelligently. Western scholars have hitherto taken great pains to study Rig Veda. But the Taittriya Samhita of Krishna Yajurveda has not received at their hands the close and scholastic attention it deserved. The sacrificial system is the very essence of Vedic culture. And any attempt, to interpret that culture, without a close and systematic study of the sacrificial literature of which Yajurveda, Taittriya Brahman and Aranyak are the fountain-heads, is bound to prove unsatisfactory if not altogether unfructuous. The work therefore undertaken by Pandit Mimamsa Bhushan Waman Shastri and his colleagues is of great national and cultural importance. It deserves to be liberally patronised by all those Hindoos who feel proud of the rich Heritage left to them by the Ancient seers of the Vedas. I wish this unique and patriotic effort speedy success.

3, FEROZESHAH ROAD,
NEW DELHI.
18-3-1938.

Sd/- M. S. ANEY.

काशीस्थपंडितानामभिप्रायः ।

श्रीमद्भिर्मीमांसा-ग्रंथ-प्रकाशक-समितिप्रवर्तकैः पुण्यपत्तनालंकारैर्महनीयकीर्तिभिः वडेकरोपाह्ववामनशास्त्रिभिः मीमांसाप्रचाराय क्रियमाणानि कार्याणि प्रायो विद्वद्भिः यवादं सर्वदाऽऽद्रियन्त इति नैतदविदितं सहृदयानाम् ।

कृष्णयजुर्वेदस्य तत्तत्कर्मावबोधानुगुणसङ्ग्रहणेन सभाष्यं मुद्रणमस्माकं परमप्रमो- दमभूत् । अस्य हि विशिष्टतेयमेव, यत् सिद्धान्तकौमुदी—निर्णयसिन्धुप्रभृतिग्रंथेषु यथा करणधर्मशास्त्रवाक्यानां प्रकरणानुरोधेन क्रमनिर्मितिर्बोधसौकर्याय भवति, तथैव वेद- यानामपि सङ्ग्रहणं क्रियते । 'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायेन शाखान्तरीयवा- नामप्युपसंहारस्तत्तत्कर्मणि वर्तते, सूत्रकारैस्तथा कृतश्च, अतोऽस्मिन्नुपसंहारे शाखा- यीयाणामपि वाक्यानां सङ्ग्रहणं यदि कृतं स्यात् तदा चारुतमत्वमस्य मुद्रणस्य भवेदिति पि मनसि भाति, तथापि तैत्तिरीयशाखायामाधानादिषु प्रायः स्वशाखीयवाक्यैरेव पूर्णता दृश्यते, इति समालोचयतां मनस्तोषायैव भवेदेतन्मुद्रणमिति नो निश्चयः ।

एवंविधसत्कार्यसम्पादनेन धार्मिकजगत उत्तमर्णानां श्रीकिंजवडेकरशास्त्रिमहो- नां सधन्यवादमभिनन्दनमस्माभिः क्रियत इति ।

श्रीदेवनायक आचार्यः व्याकरणाचार्यः
अध्यक्षः गीर्वाणवाग्वर्धिनी सभा
श्रीराजेश्वरशास्त्री द्रविडः न्यायाचार्यः
हरिराम शुक्लः न्यायाचार्यः

काशी
तिः माघ शुक्ल १४
सं. १९९४.

I have seen some printed pages of The Yajurveda Prakarana Kaumudi. The work of this kind is a desideration and will be of great use to scholars who desire to study the Yajurveda and the whole system of sacrifices and rituals followed by the Vedic Sages and Rishis. The authors are treating the Holy Yajurveda in the same manner as Bhattoji Dixit the great Grammarian had treated Ashtadhyayi of Panini in the preparation of his immortal work on Sanskrit Grammar Sidhdhanta Kaumudi. The Mantras in the Yajurveda are all arranged and collected under appropriate topics and thus this collection of classified Mantras will enable the student to pursue the form and details of the sacrifices very easily and intelligently. Western scholars have hitherto taken great pains to study Rig Veda. But the Taittriya Samhita of Krishna Yajurveda has not received at their hands the close and scholastic attention it deserved. The sacrificial system is the very essence of Vedic culture. And any attempt, to interpret that culture, without a close and systematic study of the sacrificial literature of which Yajurveda, Taittriya Brahman and Aranyak are the fountain-heads, is bound to prove unsatisfactory if not altogether unfructuous. The work therefore undertaken by Pandit Mimamsa Bhushan Waman Shastri and his colleagues is of great national and cultural importance. It deserves to be liberally patronised by all those Hindoos who feel proud of the rich Heritage left to them by the Ancient seers of the Vedas. I wish this unique and patriotic effort speedy success.

3, FEROZESHAH ROAD,
NEW DELHI.
18-3-1938.

Sd/- M. S. ANEY.

काशीस्थपंडितानामभिप्रायः ।

श्रीमद्भिर्मीमांसा-ग्रंथ-प्रकाशक-समितिप्रवर्तकैः पुण्यपत्तनालंकारैर्महनीयकीर्तिभिः किंजवडेकरोपाह्ववामनशास्त्रिभिः मीमांसाप्रचाराय क्रियमाणानि कार्याणि प्रायो विद्वद्भिः सधन्यवादं सर्वदाऽऽद्रियन्त इति नैतदविदितं सहृदयानाम् ।

कृष्णयजुर्वेदस्य तत्तत्कर्मावबोधानुगुणसङ्ग्रहणेन सभाष्यं मुद्रणमस्माकं परमप्रमोदावहमभूत् । अस्य हि विशिष्टतेयमेव, यत् सिद्धान्तकौमुदी—निर्णयसिन्धुप्रभृतिग्रंथेषु यथा व्याकरणधर्मशास्त्रवाक्यानां प्रकरणानुरोधेन क्रमनिर्मितिर्बोधसौकर्याय भवति, तथैव वेदवाक्यानामपि सङ्ग्रहणं क्रियते । 'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायेन शाखान्तरीयवाक्यानामप्युपसंहारस्तत्तत्कर्मणि वर्तते, सूत्रकारैस्तथा कृतश्च, अतोऽस्मिन्नुपसंहारे शाखान्तरीयाणामपि वाक्यानां सङ्ग्रहणं यदि कृतं स्यात् तदा चारुतमत्वमस्य मुद्रणस्य भवेदिति यद्यपि मनसि भाति, तथापि तैत्तिरीयशाखायामाधानादिषु प्रायः स्वशाखीयवाक्यैरेव परिपूर्णता दृश्यते, इति समालोचयतां मनस्तोषायैव भवेदेतन्मुद्रणमिति नो निश्चयः ।

एवंविधसत्कार्यसम्पादनेन धार्मिकजगत उत्तमर्णानां श्रीकिंजवडेकरशास्त्रिमहोदयानां सधन्यवादमभिनन्दनमस्माभिः क्रियत इति ।

श्रीदेवनायक आचार्यः व्याकरणाचार्यः
[illegible]
श्रीराजेश्वरशास्त्री द्राविडः न्यायाचार्यः
हरिराम शुक्लः न्यायाचार्यः

काशी
मितिः माघ शुक्ल १४
सं. १९९४.

म. म. माधवशास्त्रीभाण्डारीइत्येतेषामभिप्रायः

प्रसीदति नितरामन्तरङ्गं ममैतत् प्राङ्निवेदनं कुर्वतः, यत्कृष्णयजुर्वेदस्य तत्तद्यज्ञिय-प्रक्रियानुष्ठानापेक्षितानां सकलानां मन्त्राणां मूलसंहितायां यत्र तत्र विप्रकीर्णरूपेण पठितानां तथा मीमांसोपबृंहितन्यायानुसारेणास्य वेदस्यार्थावगमकालेऽपेक्षितानां तत्तद्यज्ञियांगोपांग-विधानोपयोगिब्राह्मणवाक्यानां चेतस्ततो विप्रकीर्णानामासीच्चिराय क्रमिकविन्यासापेक्षा येन यज्ञमनुतिष्ठासूनां तत्तदर्थमधिजिगांसूनां च सौकर्यं स्यादिति न तिरोहितं विपश्चिद्-पश्चिमानाम्। सा चापेक्षाऽनेन ग्रन्थेन पूरितेति। संदृश्यते ह्येवंरूपेण मूलपाठक्रम-मविभज्य विभज्य वा तत्तद्वेदेषु वेदाङ्गेषु वा दार्शनिकसूत्रप्रभृतिष्वन्वाख्यानकल्पना। तथा हि—तत्रभवता शौनकेन महर्षिणा ऋग्वेदे मण्डलानुवाकसूक्तरूपेण दाशतयीनां विभागे कृतेऽपि तदीयं मूलपाठक्रममपरिहृत्यैव तत्रभवता कात्यायनेन परमर्षिणा अष्टकाध्याय-वर्गादिरूपेण कृता विभागकल्पना सर्वैरादृता विराजत एव; किंबहुना सामवेदीयगृह्यसूत्र-कृतस्तत्रभवतो गोभिलमहर्षेर्जामातृभूतेन कात्यायनेन महर्षिणा सामवेदीयानां कृते श्वशुराज्ञया छंदोगपरिशिष्टं निर्माय सकलवेदसंबन्धिनीषु शाखासु सर्वशाखीयानां कृते अनुष्ठानसौकर्यं संपाद्य पारस्कर इति महनीयं नाम अलम्भि इति वैदिकैतिह्यविदां न तिरोहितम्।

तत्रभवता महर्षिणा पतञ्जलिना व्याकरणाम्भोधिपारदृश्वना शब्दानुशासनं व्याच-क्षाणेन वार्तिककृदुट्टङ्कितानि उक्तानुक्तदुरुक्तानि मनसिकृत्य बहूनामपि व्याकरणानां प्रतिपाद्यविषयस्य पाणिनीये व्याकरणेऽन्तर्भावं समुद्दिश्य लक्ष्यैकचक्षुष्कत्वं पुरस्कृत्य वेदाङ्गप्रधानभूतायामष्टाध्याय्यां कचित्सूत्राणां पौर्वापर्यव्यत्यासः अन्यत्र च योगविभागः अपरत्र च सूत्रसंहितापाठे पदच्छेदवैलक्षण्यादिकं च संपाद्य पाणिनीयव्याकरणस्या-प्रतिमगौरवं शब्दसाधुत्वप्रक्रियासौकर्यं च संपादितमिति सुप्रथितमेव। तथाहि—किंचि-दिवात्र दिशं प्रदर्शयामः। "दीर्घादाचार्याणाम्" इत्यत्र सूत्रव्यत्यासः—तदुक्तं शब्दरत्ने "दीर्घादाचार्याणाम्" (पा. सू. ८–४–५२) इत्युत्तरम् "अनुस्वारस्य ययि" (पा. सू. ८–४–५८), "वा पदान्तस्य" (पा. सू. ८–४–५९), "तोर्लि" (पा. सू. ८–४–६०), "उदः स्था" (पा. सू. ८–४–६१), "झयो हो" (पा. सू. ८–४–६२), "शश्छोटि" (पा. सू. ८–४–६३) इति पट्सूत्रीपाठोत्तरं "झलां जश् झशि" (पा. सू. ८–४–५३), "अभ्यासे चर्च" (पा. सू. ८–४–५४), "खरि च" (पा. सू. ८–४–५५), "वावसाने" (पा. सू. ८–४–५६), "अणोऽप्रगृह्यस्य" (पा. सू. ८–४–५७) इति, "पञ्चसूत्र्याः पाठ इति" भाष्यसंमतः पाठः। "हन्तेरत्पूर्वस्य" "श्लिष आलिङ्गने" इत्यादौ अत्पूर्वस्य आलिङ्गने इत्यादियोग-विभागः "व्यत्ययो बहुलम्" "लिङ्याशिष्यङ्" इति सूत्रयोः पाठमध्ये लकारप्रश्लेषः इति तत्र तत्र वैयाकरणवरेण्यानां सुविज्ञातमेव।

एवं प्रक्रियाकौमुदीसिद्धान्तकौमुदीकृद्भ्यां रामचन्द्रसूरिभट्टोजीदीक्षिताभ्यां शब्दसाधुत्वसाधनप्रक्रियासौकर्यार्थमष्टाध्यायीसूत्राणां मूलक्रमं विभज्यापि तत्तत्प्रकरणानुसारेण सूत्राणां कृतो विन्यासः शिष्टैः समाद्रियमाणो विराजत एव । एवं तत्रभवता सर्वतंत्रापरतंत्रेण विद्वद्वरेण वाचस्पतिमिश्रेण गौतमसूत्रेषु विद्यमानं मूलक्रममपरिहृत्यैव कृतः प्रकरणभेदो विश्वजनीनतामवगाहत एव ।

एवं कृष्णयजुर्वेद(यज्ञिय) प्रकरणकौमुदीसंपादकेन मीमांसकशिरोमणिना सर्वतंत्रविदा वामनशास्त्री किंजवडेकरमहोदयेन अनुष्ठानसौकर्यार्थं मूलपाठक्रमं विभज्यापि क्रियमाणो विन्यासः शिष्टैः समादृतः स्यादिति नास्माकं लेशतोऽपि संदेहः ।

किंच वैयाकरणमूर्धन्यरामचन्द्रसूरिभट्टोजीदीक्षिताभ्यां सूत्रविभागावसरे स्थानक्रमं समादृत्य स्वीयविन्यासप्रामाणिकता संपादिता, एवमेव प्रकरणकौमुदीकृतापि स एव मीमांसीयपंचमाध्यायविनिर्णीतः स्थानक्रमः प्रमाणत्वेन समादृत इति अस्यापि विन्यासस्य प्रामाण्यांशे न कोऽपि संदेहावसरः । स्थानप्रमाणस्वरूपं च मीमांसाभिज्ञातॄणां परिचितमेव, तदितरैस्तु पूर्वमीमांसापंचमाध्यायत एवावगन्तव्यम् । किं च मूलपाठक्रमं विभज्य विन्यासावसरे भट्टोजीदीक्षितादिभिरपि "विप्रतिषेधे परं कार्यम्" । "पूर्वत्रासिद्धम्" इत्यादिष्वपेक्षित पूर्वत्व–परत्व–निर्णयार्थमनुवृत्त्यपकर्षादिप्रयोजनार्थं च मूलपाठस्थक्रम एव समाद्रियते । एवमेव प्रक्रियाकौमुद्यां मूलक्रमं विभज्य विन्यासेऽपि आग्नेयाग्नीषोमीययागयोः पौर्वापर्यनिर्णये यो हि याज्यानुवाक्यामंत्रपाठक्रमः नियामकत्वेन प्रबलं प्रमाणमिति मीमांसायां सिद्धान्तितं तादृशनानाविधसिद्धान्तसंरक्षणार्थं यथावस्थितो मूलपाठक्रम एव समाश्रयणीय इति वैदिकैर्मूलपाठक्रमपरंपरा अवश्यं संरक्षणीयैव, किंच यागक्रमः, याज्यानुवाक्या मंत्रक्रमः, मंत्रविशेषाणां च तत्तत्काम्येष्टिसंबन्धित्वव्यवस्थापनं मूलपाठक्रमाधीनमेवेति सर्वैरपि स एव शरणीकरणीय इति निर्विवादमेव ।

किंच "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन, दानेन, तपसा, अनाशकेन" इति श्रुतौ यज्ञानुष्ठानदानाद्यतिरिक्तं वेदानुवचनं स्वातंत्र्येण विविदिषासाधनमित्युक्तम् । तच्च वेदानुवचनं पारायणाद्यात्मकं भवति, किं च पदक्रमयोः जटाघनादिविकृतीनां च पारायणे मूलपाठक्रम एव शरणीकरणीय इत्यलं पल्लवितेन । सर्वान्ते च कृष्णयजुर्वेद-(यज्ञिय)प्रकरणकौमुदीसंपादयितॄणां धन्यवादप्रकाशनं कृत्वा विरमति

लाहोर–पंजाब फाल्गुन वदि १३ शके १८५९
ता. २९।३।३८.

महामहोपाध्यायः माधवशास्त्री भाण्डारी.
व्याकरणवेदान्ताचार्यः साहित्यमीमांसातीर्थः,
लवपुरीयप्राच्यमहाविद्यालय–प्रधानाध्यापकः.

sacrifices and finally the Soma is the source of all Agniṣṭoma and Jyotiṣṭoma types of higher sacrifices.

These different kinds of rites enjoined by the Vedas may also be classified in another sense in four sections: (a) *nitya* or permanent, fixed, rites required to be performed throughout one's life on stated occasions; (b) *naimittika* or occasional for special purposes; (c) *kāmya* or optional rite aimed at a special desire, and (d) *pratiṣiddha* or prohibitory rite.

Thus one should perform these rites either in their main or subsidiary forms with due regard to their importance. For the proper performance of these rites only the first three *varṇas* are allowed by the Vedas: e. g. "the *brāhmaṇa* should set up the fire in spring, the *rājanya* in summer and the *vaiśya* in autumn." Thus the *śūdra* is prohibited from these activities. Women too, independently, cannot perform Vedic rites, but where the Vedas enjoin the performance of rites by couples neither the man nor the woman can act separately, they must act conjointly.

In its earlier part the Veda describes in detail the doctrine of sacrifice, but at the same time points out the social aspect of Dharma or legal procedure.

Since the entire *S'ruti* texts point towards the performance of these sacrificial rites it is necessary to understand how best we can perform the rites enjoined. For this purpose the venerable Ācārya Jaimini composed in four chapters his important *Dharmamīmāṁsā*, dealing authoritatively and completely with every aspect of this science. On this epoch-making *sūtra*, Upavarṣa, Bhartṛmitra, S'abarasvāmi, Kumārilabhaṭṭa, Prabhākara, Murārimiśra, Pārthasārathimiśra, S'ālikanātha, Khaṇḍadeva, Somanātha S'ambubhaṭṭa and other great scholars have written commentaries illumining the many dark corners of this science.

The sacrificial rites herein enjoined by the earlier part of the Vedas are for the repayment of the divine debt (*deva-ṛṇa*) and it is precisely in that connection that the Science of Mīmāṁsā has come into being. The word *yajña* or sacrifice is derived from the root *yaj* in the sense of *devapūjā*, *saṅgatikaraṇa* and *dāna*, and although it covers properly *jñānayajña*, *dhyāna*-°, *dravya*-°, *tapo*-°, and *brahma*-°, it is generally extended by common usage to *śrautayajñas* like Jyotiṣṭoma. This *yajña* consists of 21 divisions: seven each for *pāka-yajña*, *havir*-° and *soma*-°.

The seven *pāka-yajñas* are S'ravaṇākarma, Sarpabali, Āśvayujīkarma, Pratyavarohaṇa, Aṣṭakā, Pārvaṇa, Mādhya and Varṣa.

The seven *haviryajñas* are: Ādhāna, Agnihotra, Darśapūrṇamāsa, Cāturmāsya Āgrāyaṇa, Nirūḍhapaśubandhana and Sautrāmaṇī.

The seven *Soma* sacrifices are; Agniṣṭoma, Atyagniṣṭoma, Ukthya, Ṣoḍaśī, Vājapeya, Atirātra, and Āptoryāma.

5. The present work.

Three schools of Vedic exegesis have come into being: the grammatical, the historical and the ritual. The grammarians seek to interpret Vedic texts by applying grammatical analysis; the historians seek to analyse the historical episodes like those of

Hetuvāda, Pramāṇavāda etc, while the ritualists study only the manner and practice of the *yajñas*. All these three schools have been mentioned by Yāska in his *Nirukta*.

From the ritualistic point only the Yajurveda needs description. It is divided into two major recensions called S'ukla and Kṛṣṇa. The S'ukla-Yajus was revealed to Yājñavalkya by Āditya who had assumed the shape of a horse. While Vaiśampāyana was teaching the Yajus which he had learnt from Vyāsa, his disciples undertook severe penance with his permission for atoning an unexpected *bāla-brahma-hatyā*. As a result they were called Carakādhvaryus. Disregarding them Yājñavalkya decided to perform those austerities by himself. Angered by this lack of respect towards other brahmins on the part of Yājñavalkya Vaiśampāyana asked him to return the Yajus learnt from him. Returning these Yajus hymns Yājñavalkya, seeking others, approached the lord Savitṛ in worship. Now the other sages in the shape of *Tittiri* birds ate up the yajus hymns returned by Yājñavalkya. This branch was therefore known thereafter as *Taittirīya*. The Branch obtained by Yājñavalkya from the brilliant Sun became known as S'ukla or Vājasanī. This last appellation is due to the fact that the Sun god revealed it to Yājñavalkya, having first assumed the shape of a horse. It is also called Vājasaneyī. This branch was taught by Yājñavalkya to fifteen of his pupils beginning with Kāṇva. In that the *mantra* and *brāhmaṇa* portions are separate in this *śākhā*, therefore the appellation *S'ukla* is appropriate and this fact differentiates it from the Kṛṣṇa Yajurveda. The Veda studied by the Carakādhvaryus came to be known as Kṛṣṇa Yajurveda. In the Caraṇavyūhabhāṣya it is mentioned: 'Being revealed during midday by the brilliant Sūrya it is called *S'ukla*'. In the *Vedopakramaṇa* it is said that the S'ukla Yajus is to be studied on the full moon day coinciding partly with the fourteenth day whereas the Kṛṣṇa.Yajus is to be studied on the full moon day coinciding in part with the first day of the dark fortnight. The S'ukla-Yajus is generally found to the north of Narmadā and the Kṛṣṇa to its South.

The name Kṛṣṇa points out the mixed nature of the text and lack of discrimination between the *mantra* and *brāhmaṇa* portions in the Saṁhitā and also a certain lack of order. Thus in the 2nd Kāṇḍa and 5-6 Prapāṭhakas of the Saṁhitā we have Darśapūrṇamāsa Brāhmaṇa and Mantra portion. In the 1st Kāṇḍa and 6th Prapāṭhaka of the Saṁhitā we have Darśapūrṇamāsa-Yājamāna. In the Brāhmaṇa the 3rd Kāṇḍa 7th prapāṭhaka deals with Darśapūrṇamāsādhvaryava and Yājamāna; the 2nd and 3rd prapāṭhakas deal with Darśapūrṇamāsa-brāhmaṇa. These instances may be multiplied. This kind of mixture does not exist in the S'ukla Yajurveda. In the Kṛṣṇa Yajurveda, however, the *mantras* dealing with any one particular rite are not found in one place; they are scattered all over the work; similarly the *brāhmaṇa* portion explaining these *mantras* are not found in their proper places. Thus according to the traditional arrangement the material is scattered all over the Saṁhitā and Brāhmaṇa texts and becomes useless for the ritualist who is not a complete master of this science. In order to obviate the great exertion needed on the part of the

ritualist this new arrangement is being followed.

In the present rearrangement all pertinent material from the Saṁhitā, Brāhmaṇa, Āraṇyaka and Upaniṣad sources connected with each ritual is given at one place, indicating the sources of those texts, with Sāyaṇa's commentary on them. All quotations are also traced to their sources.

It is said: "Whatever sacrifice he studies, by that his desires are satisfied". It is well-known that all the sacrifices cannot be performed by every person. Moreover in these difficult times it is not possible to study the Vedas in a proper manner. Even the understanding of the texts is difficult. By an ignorance of the injunctions, lack of wealth, laziness and other causes it is not possible for modern Brahmins to perform these duties properly. But even if the practice is impossible we can derive similar benefit, by at least reading those portions of the Vedas which deal with these individual rites. Such a study is made practicable by this division or rearrangement in proper sections. It may be contended that this partial study will not fulfil our desires since the Vedic injunction inculcates the whole study of the entire Vedas. But those who study the whole Veda will continue doing so inspite of this rearrangement, whereas, persons who desire to read only one rite will utilize gladly the facilities offered by this rearrangement. There is good authority for this rearrangement even in ancient times. Thus S'aunaka divides the Ṛgveda into Maṇḍala, Sūkta and Anuvāka whereas Kātyāyana has Aṣṭakas. A parallel instance can be cited in Pāṇini's *Aṣṭādhyāyī*. Those studying this great work are at times at a loss to understand the proper connection of ideas whereas grammar is made easy by Bhaṭṭoji Dīkṣita by rearranging the order of Pāṇini's *sūtras* in his *Siddhāntakaumudī*..

§6. The different sections.

In this rearrangement we have the following sections:

1 Ādhāna.
2 Punarādhāna.
3 Agnihotra.
4 Anvārambhaṇīyeṣṭi.
5 Darśapūrṇamāsa.
6 Āgrayaṇa.
7 Piṇḍapitṛyajña.
8 Sautrāmaṇī.
9 Soma.
10 Cayana.
11 Jayādihoma.
12 Devikāhavīṃṣi.
13 Vājapeya.
14 Rājasūya.
15 Aśvamedha.
16 Kāmyeṣṭi.
17 Daśahautra.
18 Agnyādi-tad-devatā-karma.
19 Savaprakaraṇa.
20 Nakṣatra prakaraṇa.
21 Puruṣamedha.
22 Vṛṣālambha.
23 Vaśāgarbhadarśanādi.
24 Gavāmayana.
25 Hautraprakaraṇa.
26 Sāvitracayana.
27 Upavīta.
28 Pitṛmedha, Brahmamedha.
29 Brahmavidyā.



श्रीमंत वैदिकानुष्ठान गृहीतदीक्ष
यशवन्त विष्णु नेने, मुंबई.

सर्वं विजयते हि तव।

भूमिका।

(१) स्वभावनिरूपणम्।

१ सुखाभिलाषः—इह हि उच्चावचतमे ब्रह्माण्डगोलके सर्वोऽपि जन्तुमान् स्वभावत एव 'सुखं सुखं' इत्यहर्निशं चिन्तयंस्तदेव कामयतेऽन्विष्यति च तदुपायान्।

२ प्रतिपत्तिद्वैविध्यम्—अन्विष्यंश्च द्वे किल प्रतिपत्ती स्वभावतः प्रतिपद्यते, यथा—नानाविधविषयभासुरं दृश्यजालमिदं किमुपादानकम्? कीदृशी चास्य प्रागवस्था? कथमस्य प्रादुर्भावः? कथं चास्य परिवृद्धिः? किमालम्ब्य चास्यावस्थितिः? किमवसानश्चास्य प्रत्यवहारः? इत्येका, अपरा च "यथा तथा वा भवतु प्रादुर्भावोऽस्याः सृष्टेः, यतः कुतो वा प्रवर्ततामेष प्रवाहः, यत्रकुत्र वा पर्यवसानमुपैतु, किमनया दुरन्तया चिन्तया? अहं पुनः कतमां सरणिमनुसरेयम्? कं चाऽऽचारं प्रतिपद्येय? कथं वा लिप्सितं लभेय?" इति। इमे च द्वे प्रतिपत्ती प्रतिपद्यमानः पुमानहर्निशं तांस्तानुपायानुपयुञ्जानस्तानि तानि साधनानि जिज्ञासमानस्तानि तानि प्रमाणजातानि सङ्गृह्णानः स्वाभीष्टं सम्पिपादयिषुः साटोपं प्रयतते।

३ श्रेयःप्रेयसी—एवं स्वभावत एव विषयविषयैरिन्द्रियैस्तांस्तान् स्वाभीष्टानापातरमणीयान्विषयानभिधावंस्तदास्वादनगृध्नुः स्वभावत एव तत्संपादनायाहर्निशमासञ्जयत्यात्मानं। य एते विषयाः स्वाकारवासनोद्भावनेन विसिन्वन्ति पुरुषम्, ते प्रेयःपदेन शास्त्रे व्यपदिश्यन्ते। यत्पुनरग्रे दुरवगाहमिवोद्वेगकरमिव भासमानं केनचित्प्रयत्नेन पुनः पुनरनुशील्यमानं निर्विक्षेपेण चेतसाऽऽस्वादयितुमुपक्रम्यमाणं क्रमेण विगलितवेद्यान्तरमानन्दमनुभावयदन्ते तादात्म्यमेवापादयति, तदेतद्वस्तु श्रेयःपदेन व्यवह्रियते उपनिषदि। जन्तुमतां स्वाभाविकी प्रवृत्तिः प्रेयसि, विमर्शाधीना च श्रेयसि।

४ एषणात्रयम्—एवं सुखं कामयमानो जन्तुस्तत्साधनान्यपि नान्तरीयकतया कामयत एव। एषैव च कामना उपायेच्छाशब्देन व्यपदिश्यतेऽभियुक्तैः। इतरेच्छाधीनेच्छा ह्युपायेच्छा, इतरेच्छानधीनेच्छा हि फलेच्छा। अत एवेतरेच्छानधीनेच्छाविषयत्वं फलत्वमामनन्ति शिष्टाः, तादृशं च फलं सुखमेव। तदिच्छायां सत्यामुपायेच्छाऽवश्यम्भाविनी। उपायाश्च पुनः पुत्राः, वित्तं, कीर्तिः, मानः, गोभूहिरण्याद्यर्थजातमित्येवमादय ऐहिकाः, आमुष्मिकाः स्वर्गादिलोकगताश्च विषयाः। तत्र पुत्रोत्पादनाय दारसङ्ग्रहादिविषयिणीच्छा पुत्रैषणेति, गोभूहिरण्यादिवित्तविषयिणीच्छा वित्तैषणेति, मानविभवादिविषयिणीच्छा लोकै-

पेतेष्वमिमास्विम एषणाः प्रथन्ते । तत्र नितान्तं दैवमानुषभेदेन द्वैविध्यमापन्नेनैहिकामुष्मि-कफलविषयकेच्छात्मना अनुगमेन लोकैषणा नामान्तरभाजः सुकर इति द्वे एषणे इत्यपि विद्वांसो वर्णयन्ति । तास्त्वेता एषणाः स्वाभाविक्यः ।

५ ऋणत्रयम् (पितृऋणम्)—सुखं पुनरिन्द्रियार्थसंयोगजन्यमेवेति निश्चिन्वाना स्वित्र इन्द्रियाधिष्ठानभूतेऽस्मिन् देहे सामान्यसुखलाभाय पशुपुत्रकलत्रादिभिर्बहुभिर्युज्यन्ते, ततश्च सुखात्परिभ्रष्टा भवेमेत्याशङ्कमाना अपि भूयोभिर्भवनभिरक्षणाभिरात्मानोऽभिलषन्ति जनाः । नियतेर्नुकम्पनीयतामाकलयन्तो देहे विनष्टेऽपि "यावदस्य लोके पुत्राः पुण्येन कर्मणा श्रूयते, तावदयं स्वर्गे लोके वसति" इति श्रुत्यनुरोधेन पुत्रपौत्रादिक्रमेण गृहक्षेत्रकु-लाचारादिकाङ्क्षायत्तं प्रवर्तयिष्याम इति सम्भावयन्त आत्मनः पुरुषानुपायत्वात्, स्वोप-दर्शितमार्गानुगामिन्याः प्रजायाः सान्ततेनाभिवृद्धिं च स्वरसतः कामयमानाः संदृश्यन्ते । रागत एव सर्वेषामुपस्थादीन्द्रियतर्पणे प्रवृत्तिः । तत्र च स्वरसप्रवर्तमाना अनायासेनैव सामान्यतः प्रजामनुविन्दन्ति । अवश्यं हि प्रजोत्पादनं गृहिणाम् । पुत्रपौत्रादिपरम्परया शाश्वतावस्थानं यच्चिकीर्षितं पितृपितामहादीनां, तदवश्यं निर्वोढव्यं पुंसा । अन्यथा हि तद-भीष्टानिर्वहणरूपमृणं बाधते । तन्निर्वहणमेव पित्रर्णापाकरणं समामनन्त्यभियुक्ताः । (ऋषि-ऋणम्–) एवं निसर्गत एव सर्वः पुरुषः पश्वादिभ्य आत्मनो वैलक्षण्यं ज्ञानप्रचयेनैव मन्यमानोऽहर्निशमधिकाधिकं ज्ञानं सञ्चिचीषते । तत्र ज्ञानं बाह्यैरिन्द्रियैर्मनसा च जायमानं नात्यन्तं तृप्तिमावहतीत्यतीन्द्रियविषयकमपि किञ्चिज्ज्ञानं स्यादिति सम्भावयति, तत्र च प्रमाणमपि यावच्छक्यमन्विष्यति, तादृशज्ञानसाधनं च बहोः कालादव्ययावत्परम्परया प्रव-र्तमानं वेदराशिमेव समाकलयन्स्वपित्रादिपरम्परया स्वयं सम्पादितं प्रमाणभूतं स्वाध्यायं स पुत्रोऽपि यथावदनुवर्ततामित्यनुसन्दधानः सञ्चिस्कीर्षत्युपनयनादिना पिता पुत्रम् । अतो ज्ञानाभिवृद्धौ स्वारसिक्येव प्रवृत्तिर्दृश्यते लोकानाम् । तत्र ज्ञानसाधनमागमादन्यच्छ्रेयस्तमं प्रमाणं नोपलभन्ते । आगमश्च तत्प्रवर्तकैर्ऋषिभिः शिष्यप्रशिष्यप्रणाड्याऽद्ययावदविच्छेदेना-नुप्राप्यमाणो "मयाप्यग्रेतनीं सन्ततिमनुप्रापणीय इत्येषा कार्यधूर्मदीयशिरसि निपतिता" इति जानन्तः परम्परामनुपालयन्तीत्येतदार्षमृणमित्याख्यायते । (देवऋणम्–) एवं त्यागस्वभावो हि पुमांस्तं तमर्थजातं मनसा त्यजन्नेवास्त इति तादृशमधिकारिणमुपलभ्य देवतोद्देशेन द्रव्य-त्यागरूपं यागं विधत्ते श्रुतिः । प्रत्यहं वचनादानगमनविसर्गानन्दात्मिकां लोकयात्रां निर्वहन् भूताभिमानिभिर्देवैरेव तत्तद्विषयसन्निधापनेनोपक्रियमाणः किं बहुना तदनुग्रहाभावे शला-कामपि स्पन्दयितुमशक्तो देवानामुपकारभरं शिरसि वहन्नात्मानं मोचयितुमर्हति । एतद्धि देवऋणमित्याख्यायते ।

६ चातुर्वर्ण्यम्—चातुर्वर्ण्यं नाम–जन्मान्तरानुशीलितपरिचरण-कृषि-पराक्रम-विज्ञान-वतां चतुर्विधानां पुरुषाणामिहोत्पत्त्यैव शूद्रवैश्यक्षत्रियब्राह्मणभावमुपजग्मुषां स्वभावविभज-नमेव । यत्तु–कैश्चिदुल्लप्यते "अन्यत्राविद्यमानोऽयं चातुर्वर्ण्यविभागो भारतीयैरेव स्वक-

९ प्रमाणानि—प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यनुपलब्धिसम्भवैतिह्यचेष्टा इति प्रमाणानि नव ।

१० प्रमाणानां नैकविधत्वम्—तत्र चैतेषां नियमने विप्रतिपद्यन्ते दार्शनिकाः—

(१) प्रत्यक्षमेकमेव प्रमाणमिति चार्वाकाः मन्यन्ते । प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षप्रमाणस्य लक्षणम् । ज्ञाने प्रत्यक्षत्वञ्चेन्द्रियार्थसन्निकर्षजन्यत्वम् । यथाह "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तम् विद्यमानोपलम्भनत्वात्" इति सूत्रयामास भगवाञ्जैमिनिः १ । १ । ४ ।

(२) प्रत्यक्षमनुमानं चेति द्वे प्रमाणे इति वैशेषिकाः, बौद्धाः, आर्हताश्च । अनुमानं चानुमितिकरणम्, अनुमितिश्च धूमादिरूपव्याप्यज्ञानेन पर्वतादौ जायमानं वह्न्यादिरूपव्यापकज्ञानम् । तत्र वैशेषिकाः शब्दं प्रमाणयन्तोऽपि "एतानि पदानि स्मारितार्थसंसर्गपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बकत्वात्मदुच्चारितवाक्यवत्" इत्यनुमानविधयैव तत्प्रामाण्यमाचख्युः इति तेऽपि प्रमाणद्वयवादिन इत्याख्यायन्ते ।

(३) प्रत्यक्षानुमानशब्दास्त्रीणि प्रमाणानीति साङ्ख्यादयः । प्रत्यक्षानुमानोपमानानि त्रीणि प्रमाणानीति नैयायिकैकदेशिनः ।

(४) प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानीति गौतमीयाः ।

(५) प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः पञ्च प्रमाणानीति प्राभाकराः ।

(६) प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षट् प्रमाणानीति भाट्टा वेदान्तिनश्च ।

(७) सम्भवैतिह्ये इत्यधिके द्वे प्रमाणे इत्यष्टप्रमाणवादिनः पौराणिका ऐतिह्यविदश्च ।

(८) चेष्टापीति नवप्रमाणवादिनस्तान्त्रिकाः । उपमानादीनां प्रमाणानां लक्षणानि विस्तरभिया नेह वितन्यन्ते ।

११ शब्दप्रमाणप्राबल्यम्—एवं विप्रतिपन्नेष्वपि दार्शनिकेष्वास्तिकदार्शनिकाः शब्दस्य प्रामाण्ये न केऽपि विवदन्ते । अथैषां प्रमाणानां कृतायां बलाबलचिन्तायां शब्द एव बलवत्प्रमाणमिति समस्वरमङ्गीक्रियते प्रामाणिकैः । यतो हि प्रत्यक्षादिषु प्रमाणेषु पुरुषमतिसंस्पर्शाद्भ्रमप्रमादविप्रलिप्सादयो बहवो दोषाः संभवेयुः, सम्भवन्तश्च तत्प्रमाणजन्यासु ज्ञप्तिषु तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपमप्रामाण्यं प्रत्याययेयुः । प्रत्यक्षमपि इन्द्रियदोषात्, प्रमातृदोषात्, प्रमेयदोषात्, कचिदागन्तुकदोषाच्च याथातथ्येन वस्त्ववबोधयितुं न पारयते, प्रत्युत विपर्यस्तमेवाववोधयति, यथा—चन्द्रप्रादेशिकत्वप्रत्यक्षम्, यथा वा—चन्द्रातपादौ रक्तवस्त्रस्यापि नीलिमप्रत्यक्षम् । एवमन्यत्रापि यथायथमूह्यम् । तदेवं प्रत्यक्षस्यैव विपर्ययजनकत्वे तदुपजीवकानामनुमानादीनां विपर्ययजनकत्वे कः संशयः ? यत्र भ्रमप्रमादादीनां पुरुषदोषाणां मनागपि न संस्पर्शः, यद्विषये

भगवानाम्नायो जैमिनिना । यथा चैतत्तथाऽभिधास्यते । न चात्र शङ्कनीयम्—'अथर्वा-
ख्यचतुर्थवेदस्य सत्त्वात्कथं त्रयीति कथ्यत इति । उक्तप्रकारत्रय एव तस्यान्तर्भावात्
आथर्वणिका मन्त्राः पादव्यवस्थावन्तो ऋक्ष्वन्तर्भवन्ति, तदितरे यजुःषु । अनन्तानां वेद-
राशीनां साकल्येनाध्येतुमशक्यत्वादध्ययनसौकर्याय दयालुभिर्बादरायणादिभिः पूर्वाचा-
र्यैर्वेदश्चतुर्धा, तत्र च प्रतिवेदमनेकधा शाखोपशाखादिभिर्व्यभाजि । नैतावता जैमिन्युक्ता-
सङ्कीर्णऋगादिलक्षणानुरोधेन त्रयीत्वं व्याहन्यते ।

'शासु अनुशिष्टौ' इति धातोः 'हिताहितमनुशास्ति' इति शास्त्रं वेदः । तदनुसारित्वेन
चान्येषु शास्त्रशब्द उपचर्यते, धर्मशास्त्रं, न्यायशास्त्रमित्यादौ । अत एव च 'शास्त्रयोनित्वात्'
'तस्माच्छास्त्रं प्रमाणं ते' इत्यादौ शास्त्रपदेन वेद एव विवक्षितः । अयं च वेदः
शौनककात्यायनप्रभृतिभिराचार्यैर्मण्डलानुवाकादिरूपेणाष्टकाध्यायादिरूपेण चाध्येतृसौकर्याय
विभज्य दर्शितः ।

१३ शाखास्वरूपम्—अपरिच्छेद्यस्य वेदमहावृक्षस्य चातुर्होत्रे यज्ञे विनियोगसौकर्य-
मापादयितुमृग्यजुःसामाथर्वरूपेण विभज्य पैलवैशम्पायनजैमिनिसुमन्तूंश्चतुरः शिष्यान-
ध्यापयामास भगवान् बादरायणः । ते चाध्यापिताः स्वं स्वं वेदमनेकधा विभज्य शिष्यान-
ध्यापयामासुः । त एव वेदविभागाः संहिताब्राह्मणारण्यकरूपाः शाखाशब्देनोच्यन्ते ।

१४ शाखाभेदाः—एकविंशतिधा बाह्वृच्यम् , एकशतमध्वर्युशाखाः, सहस्रवर्त्मा साम-
वेदः, नवधाऽथर्वणः इति महाभाष्योदाहृतवचनाच्चतुर्ष्वपि वेदेषु बह्व्यः शाखाः सन्तीति
प्रतीयते । तासु च साम्प्रतमृग्वेदे शाकलबाष्कलादयः, यजुर्वेदे तैत्तिरीयकाण्वमाध्यंदि-
नादयः, सामवेदे कौथुमीराणायनीयादयः, अथर्वणवेदे च शौनकीयादय इति कतिपया एव
शाखाः समुपलभ्यन्ते, 'भुक्तानि विष्णुवृन्दानि गिलिता रुद्रकोटयः' इत्यादिना तोष्टूयमान-
महामहिमशालिनः किमिव हि नाम दुष्करं कालात्मकस्य परमेशितुः । न केवलं वेदशा-
खानामेव, अपितु जन्मसंस्कारादीनामप्युच्छेदो दृश्यते, अत एवाहुर्न्यायकुसुमाञ्जला-
वुदयनाचार्याः—

"जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्" ॥ २—३ ॥

पूर्वं हि मानस्यः प्रजाः समभवन् , ततोऽपत्यकप्रयोजनमैथुनसम्भवाः, ततः कामावर्ज-
नीयमलिनितनन्दनाः, इदानीं देशकालाद्यव्यवस्थया पशुधर्मा इव भूयिष्ठाः । पूर्वं चरुप्रसू-
तिषु संस्काराः समाचारितन्, ततः क्षेत्रप्रसूतिषु, ततो गर्भादितः, इदानीन्तु जातेषु लौकि-
कव्यवहारमात्रेन्द । पूर्वं महाव्रतस्थो वेदोऽध्यगायि, ततो व्यस्तः, ततः षडङ्ग एकः, द-

इदानीं तु क्वचिदेका शाखेति । पूर्वमृतवृत्तयो ब्राह्मणाः प्रायोऽतिपत, ततोऽमृतवृत्तयः, सम्प्रति प्रभूतसत्यानृतकुसीदपाशुपाल्यश्ववृत्तयो भूयांसः । पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त, ततः क्षत्रियातिथयोऽपि संवृत्ताः । ततो वैश्यावेशिनोऽपि, सम्प्रति शूद्रान्नभोजिनोऽपि । पूर्वममृतभुजः, ततो विघसभुजः, ततोऽन्नभुजः, सम्प्रत्यघभुज एव । पूर्वं चतुष्पाद् धर्म आसीत्, ततस्तनूयमाने तपसि त्रिपात्, ततो म्लायति ज्ञाने द्विपात्, सम्प्रति जीर्यति यज्ञे दानैकपात् । सोऽपि पादो दुरागतादिविपादिकाशतदुःस्थोऽश्रद्धामलकलङ्कितः कामक्रोधादिकण्टकशतजर्जरः प्रत्यहमपचीयमानवीर्यतयेतस्ततः स्खलन्निवोपलभ्यते इति ।

१५ कर्मणि मन्त्राणामावश्यकता विचारः—मन्त्रब्राह्मणोभयात्मके वेदे मन्त्रत्वप्रकारकाभियुक्तोक्तिविषयीभूता मन्त्राः प्रयोगसमवेतमर्थं स्मारयन्तः कर्मणोऽङ्गभावमुपयान्ति । ननु मन्त्रैरेव देवादयः प्रयोगसमवेता अर्थाः स्मर्तव्या इति कोऽयमभिनिवेशः? । यावता नामाख्यातोपसर्गनिपातादिभिर्मन्त्रगतानुपूर्वीभाग्भिस्तद्विपरीतक्रमभाग्भिर्वाऽर्थाः स्मर्तुं शक्यन्त इति । नैष दोषः । पुरुषाणामनित्यविज्ञानवत्त्वादशिक्षितत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा ते यथार्थं देवादीन्नामाख्यातोपसर्गनिपातादिभिर्नाभिदध्युः । ततश्च देवानामपराध्येयुरयथावत्प्रयुञ्जानाः । ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानं न मर्षयेयुः । अमर्षयन्तश्च नोपतिष्ठेयुः कर्मणि । देवताविहीनं च कर्म न स्वं फलं प्रसवितुमीष्टे, इत्येवं कर्मफलासम्पत्तिरेव प्रसज्येत । प्रत्युत दुरितमप्युत्पद्येत । तस्मान्मन्त्रैरेव मन्त्रार्थः स्मर्तव्यः । एत एव नामाख्यातोपसर्गनिपाताः कयाचित्प्रयोगपरिपाट्या व्यवस्थिता मन्त्रा इति व्यपदिश्यन्ते । अत एव चाह भगवान् यास्कः—"पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेदे" (निरु. २–७) इति ।

१६ मन्त्रानर्थक्यविचारः—ननु मन्त्राणां नियतानुपूर्वीकत्वाल्लोके चार्थवतां शब्दानामानुपूर्वीविभेदेऽपि विशिष्टैकार्थप्रतिपादकत्वादेते मन्त्रा अनर्था एवेति न कर्माङ्गतामावहन्ति । किञ्चार्थप्रतिपादकत्वाभ्युपगमेऽपि क्वचिन्मन्त्राणां प्रयोगानन्वय्यर्थबोधकत्वं संदृश्यते । यथा—'ओषधे त्रायस्वैनम्', 'स्वधिते मैनं हिंसीः' इत्यादिषु । क्वचिच्च मिथो व्याहतार्थबोधकत्वमपि संलक्ष्यते, यथा—'एक एव रुद्रोऽवतस्थे न द्वितीयः,' 'असङ्ख्याताः सहस्राणि ये रुद्रा अधिभूम्याम्' इत्यादौ । तस्मादनर्थका मन्त्राः कर्मकरणतां न प्रतिपद्यन्त इति चेन्नैवम् । लोके हि यादृशाः शब्दा यादृशमर्थं समर्पयितुं प्रामाण्यमुपयान्ति, तादृशा एव शब्दा मन्त्रेष्वानुपूर्वीविशेषभाजो दृश्यन्त इति तत्सामान्यान्मन्त्राणां प्रामाण्यं दुर्निवारम् । केवलं नियतानुपूर्वीकत्वमेव यद्यनर्थत्वे हेतुः स्यात्, "इन्द्राग्नी, पितापुत्रौ" इत्यादिनियतानुपूर्वी-

---

१ ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेन चैनापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥
मनुस्मृतिः ४–५–६.

२ अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्—मनुस्मृ. ३–११८

काणां प्रयोगाणामर्थवत्त्वमेव नोपपद्येत। अतो न युज्यते नियतानुपूर्वीकत्वेन मन्त्राणामनर्थत्वशङ्का। नापि विरुद्धार्थप्रतिपादकत्वेन तादृशी शङ्का घटते। 'स्वधिते मैनं हिंसीः' इत्यत्र यद्यपि छिदारूपा हिंसाऽऽपाततः प्रतीयते, तथापि यज्ञकर्मोपयोगित्वादभ्युदयार्थत्वेन तस्याः क्रियाया हिंसात्वमेव नास्ति, परमारोग्यसम्पादनाय चिकित्सकस्य रुग्णाङ्गुलिविच्छेदनरूपक्रियाया इवेति न विरोधः। 'एको रुद्रो न द्वितीयोऽवतस्थे' इत्यत्रापि रुद्रस्य परमैश्वर्ययोगादेकरूपधारणं सहस्रधावस्थानं चोपपद्यते इति न काचिदनुपपत्तिः।

१७ मन्त्राणां संहिताविचारः—त एते मन्त्रा आनुपूर्वीविशेषेण समुचिताः संहितापदेन व्यपदिश्यन्ते वैदिकैः। तदितरो वेदभागो ब्राह्मणशब्देन व्यवह्रियते। इयं हि संहिता रावणादिभिर्विभज्यमानानां पदानां प्रकृतिः, तद्विकाराश्च पदानीति केचिदाचार्या मन्यन्ते। अपरे पुनः पदान्येव संहन्यमानानि संहिता भवति, अतः पदान्येव प्रकृतिः, विकृतिः संहितेति सङ्गिरन्ते। किम्पुनरत्र साधीयः? इति भवति वीक्षा, 'संहिता प्रकृतिः पदानि विकृतिः, उताहो पदान्येव प्रकृतिर्विकृतिः संहिते'ति। अत्रैषा समाहितिः—मन्त्रद्रष्टॄणामृषीणां तपःप्रभावेणाभिव्यज्यमानो मन्त्रः संहितारूपेणैवाभिव्यज्यते न पुनः पदैः, ब्राह्मणा अप्यनूचानाः संहितामेव पूर्वमध्यापयन्ति, अधीयते चाध्येतारः, मन्यते च तावतैवात्मानमधीतस्वाध्यायम्, यज्ञकर्मस्वपि संहितयैव मन्त्रा विनियुज्यन्ते न पुनः पदैः, यदि पदान्येव प्रकृतितामविन्दिष्यन् तर्हि पदैरेव ऋषीणां मन्त्रोऽभिव्यज्येत, पदान्येवाध्यापयिष्यन् ब्राह्मणा अध्यैष्यन्त चाध्येतारः, पदैरेव विन्ययोक्ष्यन्त मन्त्राः कर्मसु, नत्वेतत्सर्वमस्ति। तस्मादेतैर्हेतुभिः संहितैव प्रकृतिर्विकृतिः पदानीति स्पष्टं प्रतीमः।

१८ मन्त्राणामृषिदैवतछन्दोविचारः—मन्त्राणामृषिः, दैवतं, छन्द इत्येतत्त्रयमविदित्वा क्रियमाणं कर्म नैव फलेग्रहितामश्नुत इति सर्वेषामाचार्याणां समयः। श्रुतिश्चैवमभिधत्ते—"मन्त्राणां ब्राह्मणार्षेयछन्दोदैवतवित् याजनाध्यापनाभ्यां श्रेयोऽधिगच्छतीत्येताभ्यामेवानेवंविदो यातयामानि छन्दांसि भवन्ति, स्थाणुं वर्च्छति, गर्ते वा पात्यते, प्रमीयते वा, पापीयान् भवतीति विज्ञायते" (ऋ. सर्वा.) इति। स्मर्यते च–

"अविदित्वा ऋषिं छन्दो दैवतं योगमेव च॥
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥ १॥" इति। (षड्गुरुभाष्ये.)

अपि च–"ऋषिच्छन्दो दैवतानि ब्राह्मणार्थं स्वरावपि।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते"॥ इति। (षड्गुरुभाष्ये.)

विनियोगोऽपि मन्त्राणामवश्यं विज्ञेयो भवति। (ऋषयः—)मन्त्राणां द्रष्टारः (स्मर्तारः) ऋषयः, न पुनः कर्तारः। "कालापकं काठकं" इति संज्ञा तु "तेन प्रोक्तं" इत्यनुशासनानुरोधेन कलापकठादिऋषिकर्तृकप्रवचनविषयत्वेनाप्युपपद्यते। अत एव भगवाञ्जैमिनिः–"आख्या प्रवचनात्" (जै. १–१–३०) इति सूत्रयामास। श्रुतिरप्याचष्टे–

अजान्ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्" इति । स्वयम्भु ब्रह्म वेदः, तपः र्वाणानृषीन् प्रति, अभ्यानर्षदाभिमुख्येनागच्छत्, मनसि प्रतिभातोऽभूदित्यर्थः । अत व भगवान् यास्कोऽपि—"ऋषी गतौ" इति धातोः "ये गत्यर्थकास्ते ज्ञानार्थकाः" इति यायेन ऋषन्ति—जानन्ति अमुष्मात्कर्मण एवमर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवं-क्षणः फलविपरिणामो भवतीति ऋषयः इति। 'यस्य वाक्यं स ऋषिः' इति सर्वानुक्रमण्यां यस्य वाक्यं' इत्यत्र यद्द्रष्टृकं वाक्यमित्यर्थोऽध्यवसेयः । (देवता—) अथ सर्वेषां न्त्राणां तात्पर्येण प्रतिपाद्यमानोऽर्थो देवताशब्देनाभिधीयते । यत्काम ऋषिर्यस्या देवतायाः प्रसादेनाहममुष्यार्थस्य पतिर्भविष्यामीत्येतां बुद्धिं पुरोधाय मन्त्रेण स्तौति सा तन्मन्त्रस्य देवता भवति । यथाह भगवान् यास्कः—"यत्कामऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति" इति । देव एव देवता इति स्वार्थे तल्, देवतैव दैवतमिति स्वार्थेऽण्, दीव्यति प्रकाशत इति दैवतम्, अत एव तत्रभवता षड्गुरुणा सर्वानुक्रमणीभाष्ये "दानादिसर्वकल्याणगुणयोगी पचाद्यच्, देवः देवात्तलन्तात्स्वार्थेऽण् दैवत"मित्युक्तम् । (छन्दः—) छादयति वक्तारं पापात्कर्मण इति छन्दः । "छादयति ह वा एनं छन्दांसि पापात्कर्मणः" इति श्रुतेः । तथाऽन्यत्रापि—"यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतः, तच्छन्दसां छन्दस्त्वम्" इति विज्ञायते ।

१९ मन्त्राणां त्रैविध्यम्—ते मन्त्राः पुनस्त्रिविधा ऋचः सामानि यजूंष्पि चेति । "तेषामृक् यत्रार्थवशेन पादव्यवस्था" (अ.२. पा १. अ.१०) इति जैमिनिसूत्रानुरोधेन पादव्यवस्थावन्मन्त्रत्वमृक्त्वम् । गीतित्वे सति मन्त्रत्वं सामत्वम् । एतदुभयभिन्नत्वे सति मन्त्रत्वं यजुष्ट्वम् ।

२० ऋचां त्रैविध्यम्—ता ऋचः पुनस्त्रिविधाः परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्चेति । तथाचोक्तं यास्केन—"तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिक्यश्चेति" । अयं च त्रैविध्येन विभागो ऋचां गूढार्थत्वेन । अनेन ऋग्विभागेनैव यजूंष्यपि विज्ञातानि भवन्ति । तत्र परोक्षकृतानां लक्षणं स एवाह—"तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य" यासु परोक्षत्वेन सर्वनामभिः प्रथमपुरुषेण च निर्देशो भवति, ताः परोक्षकृताः । यथा—'इंद्रो दिव इंद्र ईशे पृथिव्याः' इत्यादौ । यासां सम्बोध्यमुद्दिश्य त्वमादिपदैर्निर्देशः क्रियते ताः प्रत्यक्षकृताः । यथा—"त्वमिंद्रबलादधि, विन इन्द्र मृधो जहि" इत्यादौ । आत्मानमुद्दिश्य याः प्रवृत्ताः, ता आध्यात्मिक्यः । यथा—'अहं रुद्रेभिर्वसुभिश्चरामि' इत्यादौ । एतेषु च मन्त्रेषु निवित्कुन्तापवालखिल्यपरिशिष्टादयोऽन्तर्भवन्ति ।

२१ ब्राह्मणलक्षणम्—निरुक्तमन्त्रभिन्नवेदत्वम् ब्राह्मणत्वम् । आह च जैमिनिः—'शेषे ब्राह्मणशब्दः' (२—१—८—३२) इति ।

२२ आरण्यकम्—ब्राह्मणगत एव कश्चिद्भागोऽरण्येऽनूच्यमानत्वादारण्यकमित्याख्यायते। एतच्चारण्यकमनधीत्य न स्नातको भवतीति प्रशस्यते।

२३ उपनिषदः—'उप=नितरां सादयति=प्रापयति ब्रह्म' इत्युपनिषद्ब्रह्मविद्या। तत्प्रतिपादके वेदशिरोभागे उपनिषच्छब्द उपचर्यते। ताश्चोपनिषद ऐतरेयतैत्तिरीयबृहदारण्यकप्रभृतयः श्रूयन्ते।

२४ अङ्गानि—वेदात्प्रतीयमानोऽर्थः शिक्षाकल्पसूत्रादिभिः प्रतिनियतस्वरूपेण विज्ञायत इति वेदवाक्यजन्यशाब्दबोधोपकारकत्वात्तान्यङ्गपदव्यपदेशभाञ्जि भवन्ति। परम्परयोपयोगीनि मीमांसान्यायादीन्युपाङ्गपदेन व्यपदिश्यन्ते। तानि चाङ्गानि शिक्षाकल्पसूत्रव्याकरणनिरुक्तछन्दोज्योतिषाणीति षट्। स्वरव्यञ्जनाद्यभिव्यक्तिसाधनत्वेन **शिक्षा**, शाखान्तरीयगुणोपसंहारपूर्वकप्रयोगानुपूर्वीविज्ञानहेतुतया **कल्पसूत्राणि**, विभक्त्यादिपरिज्ञानजननेन **व्याकरणम्**, समुच्चितानां पर्यायशब्दानां प्रवृत्तिनिमित्तप्रकाशनपुरःसरं वैदिकशब्दशक्तिग्रहहेतुतया **निरुक्तम्**, अक्षरकोशपादव्यवस्थालक्षणपरिज्ञाननिबंधनत्वेन **छन्दोविचितिः**, श्रुतिचोदितकर्मोपयोगिकालनिर्णयप्रयोजनत्वेन **ज्योतिषं** च वेदार्थविज्ञाने तदनुष्ठाने चोपकुर्वन्ति।

२५ ब्राह्मणकल्पसूत्रविवेकः—न च ब्राह्मणवाक्यैरेव प्रयोगपरिज्ञानस्य सम्भवेन कल्पसूत्राणामानर्थक्यमिति वाच्यम्, ब्राह्मणवाक्यानामर्थवादजटिलत्वेन विलम्बेन प्रयोगोपस्थापकत्वात् सर्वेषां प्रयोगानुपूर्वीज्ञानासम्भवाच्च। कल्पसूत्राणि तु शाखान्तरीयगुणोपसंहारपूर्वकं पौर्वापर्यविशिष्टप्रयोगबोधनायैव प्रवृत्तानीति झटित्यानुपूर्वीविशेषविशिष्टं प्रयोगविधिमुपस्थापयन्ति। कल्पानां सूत्राणां च सूक्ष्मं वैलक्षण्यं—यत् क्रतुप्रयोगं पाठमात्रेण स्पष्टं कल्पयन्ति ये बौधायनीयादयो ग्रंथाः, ते **कल्पाः**। "ऋचं पादग्रहणे" (आश्व० श्रौ.सू. अ.१ खं.१) इत्यादि स्वकृतसंज्ञापरिभाषादिभिः प्रयोगस्य सूचकानि **सूत्राणि**—आश्वलायनीयादीनि। तानीमानि कल्पसूत्राणि भूयांसि श्रूयन्ते, तत्र साम्प्रतं प्रायेणोपलभ्यमानानि आश्वलायनापस्तम्बबौधायनसत्याषाढभारद्वाजकात्यायनवैखानसवाधूललाट्यायनद्राह्यायणसाङ्ख्यायनमानवकाठककौशिकानां सूत्राणि।

२६ उपाङ्गानि—(स्मृतिः—) स्मर्यते वेदधर्मोऽनेनेति स्मृतिः। करणे क्तिन्। अथवा वेदार्थानुभवजन्यं योगाभ्याससाध्यं वेदार्थविषयकं मन्वादीनां यत्स्मरणं सा स्मृतिः, तत्प्रयोज्यत्वाद्ग्रन्थेऽपि स्मृतिशब्दः। ताश्च स्मृतयो मनुयाज्ञवल्क्यपराशरप्रभृतिभिः प्रणीता बह्व्य इत्यन्यदेतत्। धर्मशास्त्रं स्मृतिरित्यनर्थान्तरम्। (इतिहासः—) "इति ह पारम्पर्योपदेशोऽस्मिन्नास्ते"इतीतिहासः।

"धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते" ॥ १ ॥

इत्युक्तलक्षणः पुरावृत्तप्रकाशको भारतादिर्ग्रन्थविशेषः । क्वचिद्वेदभागविशेषस्यैवेतिहासत्वमुक्तम् । यथाऽऽश्वलायनश्रौतसूत्रे "नवमेऽहनि तार्क्ष्यो वै वैपश्चितस्तस्य वयांसि विशस्तानीमान्यासत इति वयांसि ब्रह्मचारिणः इत्युपसमानीताः स्युस्तानुपदिशतीतिहासो वेदः सोऽयमितीतिहासमाचक्षीत" (उ. ष. अ. ४. खं. ७) एवञ्च वेदभागानामितिहासत्वं पुरावृत्तप्रकाशकत्वादेव । (पुराणम्—) पुराभवं पुराणम्—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्" ॥ १ ॥

इत्युक्तलक्षणो व्यासादिप्रणीतो ग्रन्थविशेषः पुराणम् । तच्च महापुराणोपपुराणभेदेन द्विविधम् । प्रत्येकमष्टादशविधं च । (मीमांसा—) "मान पूजायाम्" इति धातोः सनश्चेच्छासाध्यविचारे लाक्षणिकत्वात्पूज्यविचारो मीमांसा । तत्प्रतिपादको ग्रन्थोऽपि मीमांसा । सा च द्विविधा पूर्वमीमांसोत्तरमीमांसा चेति । (न्यायः—) प्रमाणैरर्थपरीक्षणं न्यायः । गौतमप्रणीतषोडशपदार्थनिरूपकं शास्त्रम् ।

२७ उपवेदाः—आयुर्वेदधनुर्वेदगान्धर्वार्थशास्त्राणि ऋगाद्यात्मकस्यैव वेदमहाराजस्यामात्यभूतान्युपवेदत्वेन व्यपदिश्यन्ते । एते चोपवेदाः सर्वेषामपि प्राणिनां व्यवहारान् साधिष्टतममुपदिशन्ति । सर्वोऽप्ययं सर्वलोकशिवङ्करो महामहिमशाली विपुलतमः परिच्छेदो वेदसार्वभौमस्य राराजते भारतवर्ष इत्यहो भाग्यं भारतीयानाम् ! भूयांसो हि नव्यशिक्षिताः साम्प्रतं "भारते वर्षे मृत्तर(मोटर) विमाननिर्माणप्रभृतयः कला नाभूवन् । पूर्वं प्राच्याश्च भारतीया भौतिकशास्त्रपाटवं नाध्यगच्छन्" इत्येवमादिकमुपालम्भवचनजातमुद्गिरन्ति । नूनमिदं विजृम्भितं भारतीयग्रन्थानभिज्ञतायाः । विज्ञायते हि 'अहहारेत्वा शूद्र' इति छान्दोग्योपनिषदि (हारेत्वा हारैः सहितः इत्वा स्वयं गन्ता रथविशेषः) जानश्रुतिं प्रति रैक्ववचनेनेदानीमिव, तैलविशेषयन्त्रविशेषनिरपेक्षा एव इच्छामात्रगामिनो रथा आसन्निति सुस्पष्टम् । अत एवाश्वघोषादिकविभिर्गत्रीसंज्ञया रथविशेषास्तत्र तत्रोपवर्णिताः । अर्थशास्त्रकाश्यपीयसंहितादिषु कलाः पुनरेवंविधाः समुल्लिखिता इत्याधुनिकैरेव कैश्चन समर्थितमित्यस्माभिरुपरम्यते ।

२८ वेदाभ्यासः तदधिकारिणश्च—अयं च साङ्गोपाङ्गो वेदोऽवश्याभ्यसनीयतयाऽनुशिष्यते "ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । वेदाभ्यासो हि पञ्चधा भवति—अध्ययनं, विचारः, अभ्यसनं, अध्यापनं, जप इति । गुरूच्चारणानूच्चारणमध्ययनं, मीमांसान्यायैरुपक्रमादिलिङ्गैश्च वेदतात्पर्यावधारणानुकूलो व्यापारो विचारः, गुरूच्चारणानूच्चरितस्यैवावर्तनमभ्यसनम्, शिष्येभ्यो दानमध्यापनम्, ब्रह्मयज्ञादौ पारायणं जपः ।

सोऽयं पञ्चविधोऽभ्यासो द्विजेष्वेव व्यवतिष्ठते, अध्ययनपूर्वकत्वादितरेषां चतुर्णामभ्यासानाम्। अध्ययनस्योपनयनपूर्वकत्वात्, उपनयनविधेश्च त्रैवर्णिकेष्वेव पर्यवसितत्वात्। अर्थादेव पञ्चविधाभ्यासे निवृत्तिः पञ्चानाम्। 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतौ ब्राह्मणपदं क्षत्रियवैश्ययोरुपलक्षकम्। यथा—'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' 'ब्राह्मणस्य तु सोमविद्याप्रजम्' इत्यादौ। केचित्तु ब्राह्मणपदं नोपलक्षकं, ब्राह्मणस्यैवाधिकारो वेदाध्ययनादौ, मुख्यार्थानुरोधात्, उपलक्षणत्वेऽजहत्स्वार्थलक्षणाश्रयणापत्तेः। अत एव 'विद्या ह वै ब्राह्मणमाजगाम' इति निरुक्तोदाहृतवचने ब्राह्मणपदमाञ्जसेनोपपद्यत इत्याहुः। तच्चिन्त्यम्—क्षत्रियवैश्ययोरप्युपनयनानुशासनात्, 'उपनयीत' 'तमध्यापयीत' इति श्रुतेरध्ययनस्यार्थप्राप्तत्वाद्ब्राह्मणपदमुपलक्षकमेव। 'विद्या ह वै ब्राह्मणमाजगाम' इत्यत्र तु 'न मां ब्रूयाः' इत्यनेनाध्यापनस्यैवानुशिष्टत्वेनाध्यापने ब्राह्मणस्यैवाधिकारः, अध्ययने पुनस्त्रैवर्णिकानामेवेति स्वरसतः प्रतीयते।

(४) वेदप्रमेयम्।

२९ **स्वभावत इष्टफलानामुपायनिरूपणम्**—आदित एव समेषां प्राणिनां स्वरूपं न्यरूपयाम, यत्सर्वेऽपि सुखमेव कामयन्त इति। तस्यैव च सुखस्य साधनमुपदिश्य तेन तान् संयोजयितुं प्रववृते भगवानाम्नायः। यथा—'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्येवमादिभिर्वचनैः सुखविशेषस्वर्गसाधनत्वं ज्योतिष्टोमादिषूपायेष्वाचष्टे प्रवर्तयति चेष्टसाधनताद्वारेण श्रेयःसाधनेषु कर्मसु। स्वर्गो हि नाम—

> 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
> अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम्' ॥ १ ॥

इत्यादिवचनैः सुखात्मक एवाङ्गीक्रियते मीमांसकैः।

३० **प्रतिपत्तिसमाधानम्**—पूर्वोक्तद्विविधप्रतिपत्तिमन्तमधिकारिणमुपलभ्योभयीमपि प्रतिपत्तिं समाधित्सुर्भगवानाम्नायः सर्वज्ञकल्पः सन्नात्मप्रववृते। सम्यग्दर्शने वा तदनुकूले कर्तव्यानुष्ठाने वा भ्रमप्रमादादिपुरुषदोषविनाकृतं वेदमपहाय नान्यत्प्रमाणं समामनन्ति कृतविषया विद्वांसः। अत एव च श्रूयते भगवती श्रुतिर्द्विविधा, कर्तव्यं परिबोधयन्ती कर्मकाण्डरूपेण, सम्यग्दर्शनं च सम्पादयन्ती ज्ञानकाण्डरूपेण। अत एव च काण्डद्वयं विवृण्वानौ भगवन्तौ व्यासजैमिनी कर्ममीमांसां ब्रह्ममीमांसां च प्राणैष्टाम्। आभ्यां हि न्यायतः साध्यमानो वेदार्थः पुरुषाणां हिततमं साधयिष्यति, नान्योऽतः कश्चिदभ्यासतम इत्येष निश्चयोऽर्थः सर्वेषां वैदिकानाम्।

३१ **श्रेयःप्रेयसोर्विवेकः**—एवं स्वभावत एव श्रेयसि वर्तमानान् पुरुषानुपलभ्य

न्यायवैशेषिक—अ. ४. पा. ३. अ. ११. वर्णकान्तरे—"अनित्ययोगर्गति च" इति पाठान्तरमुपलभ्यते।

गुडजिह्विकान्यायेन काम्यकर्माण्यभिदधाना श्रुतिस्तात्पर्येण श्रेयस्तमान्येव कर्माणि ब्रुवाणा तत्रैव दयया प्रवर्तयति । स्वयमेव चैतदाचष्टे श्रुतिः—

"अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुष ँ सिनीतः ।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥"

(इति कठोपनिषत् १।२।१)

३२ एषणात्रयानुवादः—एवं स्वभावसिद्धं पूर्वोक्तमेषणात्रयमनूद्य मंदाधिकारिणां कृते 'पुत्रकामः पुत्रेष्ट्या यजेत' 'चित्रया यजेत पशुकामः' 'स्वाराज्यकामो राजसूयेन यजेत' 'क्षैत्रपत्यं चरुं निर्वपेज्जनतामागत्येयं वै क्षेत्रस्य पतिरस्यामेव प्रतितिष्ठति' तै० सं० (२।२।१) 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' 'सायुज्यकामौ राजपुरोहितौ यजेयाताम्' इत्यैहिकामुष्मिकफलसाधनानि कर्माणि विदधाति श्रुतिः ।

३३ ऋणत्रयपरिहारः—विवेचितपूर्वसहजप्राप्तमृणत्रयमनूद्य तत्परिहारोपायांश्चानुशास्ति शास्त्रम् । "जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते, ब्रह्मचर्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" इति । तथा—'पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेत-स्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चति, अथैतज्जन-यति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गम्' 'स यत्कुमारं जन्मनोऽ-ग्रेऽधिभावयति आत्मानमेव तद्भावयति एषां लोकानां सन्तत्या एवं सन्तता हीमे लोकाः' (ऐ०आ०२–५–१) नित्यस्य रायः पतयः स्याम, प्रजया हि मनुष्यः पूर्णः, ऋतौ भार्यामु-पेयात्, स्वाध्यायोऽध्येतव्यः, स्वाध्यायमधीयीत, स्वाध्यायान्न प्रमदितव्यम्, स्वाध्यायान्मा प्रमदः, आचार्याधीनो वेदमधीष्व, सायंप्रातर्भिक्षेथाः, स यत्सर्वमोङ्कुर्यादिङ्क्ष्यादात्मा-नम् स कामेभ्यो नालं स्यात्, स यत्सर्वं नेति ब्रूयात्, पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्' (ऐ० आ० २।३।६) इति, 'सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः' 'सहजं कर्म कौन्तेय' 'एवं परंपराप्राप्तम्' इत्यादिना । तस्यैतस्य ऋणत्रयस्य परिहाराय स्वा-ध्यायाध्ययनं, देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः, प्रजोत्पादनं चेत्युपाया विधीयन्ते ।

३४ चातुर्वर्ण्याम्नानम्—यदुपवर्णितम् पूर्वं स्वाभाविकगुणानुरोधेन चातुर्वर्ण्यम्, तदे-तद्भगवति वेदे समाम्नायते "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥" 'ब्रह्मसन्धत्तं तन्मे जिन्वतम्' 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः' 'ब्रह्मवर्चसकामो ब्राह्मणो बृहस्पतिसवेन यजेत' 'स्वाराज्यकामो राजा राजसूयेन यजेत' 'वैश्यो वैश्यस्तोमेन यजेत' 'शूद्रो मनुष्याणामश्वः पशूनाम्' (तै० सं० ७।१।१) 'तदेतद्ब्रह्मक्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवत् ब्राह्मणो मनुष्येषु क्षत्रि-येण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः' (श० ब्रा० १४–२–४–२–२७) इत्यादिना ।

भगवानपि जगौ—

'ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः' । इति ।

स्वाभाविकानेव गुणानवलम्ब्य कर्माणि प्रविभक्तानि, 'वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः, शरदि वैश्यः, वर्षासु रथकारः' इति । अत एव स्वभावप्रभवं गुणं तदनुरूपं च कर्म परीक्षितुं कश्चन विनिर्दिष्टो धार्मिकनिबन्धेषु **जीविकापरीक्षा** नाम संस्कारः ।

३५ चातुराश्रम्यादि—अयं च स्वाभाविको गुणो यथा प्रकर्षं दार्ढ्यं चाप्नुयात् तथा केचनाचाराः कर्माणि च चोदितानि, ये वर्णधर्माः, आश्रमधर्माः, वर्णाश्रमधर्माः, गुणधर्माः, निमित्तधर्माः, साधारणधर्माश्चेति विभक्ताः स्मृतिकारैः । तत्र **वर्णधर्मो**ऽध्ययनादिः, **आश्रमधर्मः** समिदाधानादिः, **वर्णाश्रमधर्मः** पलाशो दण्ड इत्यादिः, **गुणधर्मो**ऽभिषेकादिगुणयुक्तस्य राज्ञो रक्षणादिः, **निमित्तधर्मः** प्रायश्चित्तादिः, **साधारणधर्मो**ऽहिंसादिः । तेषामेतेषां चानुशीलनेन सूक्ष्मतयात्मनि निगूढः स्वाभाविको गुणस्तत्परिपन्थिदोषापनयनेनाभिव्यज्यते । एषैव चित्तशुद्धिरित्याख्यायते । अपनीतदोषेण चित्तेन परिमृष्टेनादर्शतलेनेव शुद्धसच्चिदानन्दस्वरूप आत्मा विपर्याक्रियते । तदेव हि ज्ञानं नाम । अत एवोक्तमभियुक्तैः—

"कषायपङ्क्तिः कर्माणि ज्ञानं तु परमा गतिः ।
कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" ॥ इति ॥

३६ पुरुषार्थसाधनम्—पूर्वं शूद्रवैश्यक्षत्रियब्राह्मणानां स्वभावत एव कामार्थधर्ममोक्षाख्याः पुरुषार्थाः प्राधान्येनाभिलषणीया भवन्तीति प्रत्यपीपदाम । तांश्च तेषां पुरुषार्थान् सम्पादयितुं निखिलो वेदराशिरुपक्षीणः । तत्र "तरति शोकमात्मवित्, ब्रह्मविद्ब्रह्मैव भवति, नैनं सेतुमहोरात्रे तरतः" इत्यादिवचनैर्निरतिशयानन्दरूपं मोक्षाख्यं पुरुषार्थं प्रकृत्य "स आत्मा तत्त्वमसि श्वेतकेतो, अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि वचोजातैः कूटस्थं सच्चिदानंदरूपं ब्रह्म बुबोधयिषुस्तद्बोधेनैवाविद्यकसकलद्वयोच्छेदं स्वमहिमप्रविष्टिं च प्रतिपादयन् सर्वोपि श्रुतिशिरोभागो जागर्ति । पूर्वकाण्डश्चैहिकामुष्मिकफलप्रसवहेतूनि नैकविधानि कर्मजातानि विदधद्धर्माख्यं पुरुषार्थमभिदधानः सत्त्वशुद्धिप्रणाल्या मोक्षायैवोपकरोति । अर्थकामौ पुनर्यद्यपि श्रुत्या तात्पर्येण न प्रतिपिपादयिषितौ, तथाप्युत्तरवर्णपरिचरण–कृषि–वाणिज्य–भूमिजय–यजनाध्यापन–प्रतिग्रहादिकं चतुर्णां वर्णानामर्थाख्यपुरुषार्थसाधनं, सहधर्मचारिणीसंयोगादिसंस्कारान् कामसुखोपायांश्चाभिदधती श्रुतिरर्थकामसम्पादनेनापि पुरुषानुपकरोति । तत्रार्थकामयोः सूचिकालेकैकासूचं निदर्शनायोदाहरिष्यामः । यथा—

"अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥"[1]
तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम्[2] ॥

३७ विधिविचारः—व्याख्यातं मन्त्रब्राह्मणात्मके वेदे मन्त्राणां लक्षणं प्रयोजनं च । मन्त्रव्याख्यानरूपो ब्राह्मणभागः साम्प्रतं निरूप्यते । द्विविधं ब्राह्मणं विधिरर्थवादश्चेति । तथा च भगवानापस्तंबः "कर्मचोदना ब्राह्मणानि, ब्राह्मणशेषोऽर्थवादः" इति । विधिरपि द्विविधः—अप्रवृत्तप्रवर्तनोऽज्ञातज्ञापनश्चेति । "आग्नावैष्णवं पुरोडाशं निर्वपति दीक्षणीयायाम्" इत्याद्याः कर्मकाण्डगता विधयोऽप्रवृत्तप्रवर्तकाः । "आत्मा वा इदमेक एवाग्र आसीत्" इत्यादयो ज्ञानकाण्डगता विधयोऽज्ञातज्ञापकाः । तत्र ब्रह्मकाण्डगतविधेरवांतरभेदाभावेन कर्मकाण्डगतविधेरेव त्रैविध्यं दर्शितम्—अपूर्वविधिः, नियमविधिः परिसंख्याविधिश्चेति । तत्राप्राप्तप्रापको विधिरपूर्वविधिः, यथा—"अग्निहोत्रं जुहोति" । पक्षे प्राप्तस्याप्राप्तांशपूरणफलको विधिर्नियमविधिः, यथा—"व्रीहीनवहन्ति" । अत्र नखविदलनादिरूपसाधनान्तरेणापि वैतुष्यसिद्धेः पक्षेऽप्राप्तमवहननं नियम्यतेऽदृष्टार्थम् । युगपदुभयप्राप्तावेकतरविधाने नान्यस्य व्यावृत्तिः परिसंख्याविधिः, यथा—"पञ्च पञ्चनखा भक्ष्याः" इत्यत्र रागतः पञ्चनखापञ्चनखानामुभयेषां युगपद्भक्षणप्राप्तौ पञ्चैव पञ्चनखा भक्ष्याः इति पञ्चेतरपञ्चनखभक्षणव्यावृत्तिः क्रियते । एष परिसंख्याविधिः । प्रकारान्तरेण चायं विधिश्चतुर्धा भवितुमर्हति—उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति । कर्मस्वरूपमात्रबोधको विधिः प्रथमः, यथा—"अग्निहोत्रं जुहोति" इत्यादिः । उत्पन्नस्य विनियोगाकाङ्क्षायां गुणसम्बंधबोधको विधिर्विनियोगविधिः, यथा—"दध्ना जुहोति" इत्यादिः । फलस्वाम्यबोधकविधिरधिकारविधिः, यथा—"अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादिः । अंगप्रधानाद्यानुपूर्वीबोधको विधिः प्रयोगविधिः, यथा—"प्रयाजादिभिरुपकृत्याग्नेयादिभिरपूर्वं भावयेत्" इत्यादिः ।

---

१ ऋ. सं. १०-७-८-५-१३ ।

हे कितव ! बहुमन्यमानो मद्वचने विश्वासं कुर्वन् त्वमक्षैर्मा दीव्यो द्यूतं मा कुरु । कृषिमित् कृषिमेव कृषस्व कुरु । वित्ते कृष्या संपादिते धने रमस्व रतिं कुरु । तत्र कृषौ गावो भवंति तत्र जाया भवति तदेव धर्मरहस्यं श्रुतिस्मृतिकर्ता सविता सर्वस्य प्रेरकोऽयं दृष्टिगोचरोऽर्य ईश्वरो मे मह्यं विचष्टे विविधमाख्यातवान् ॥

—सायणभाष्यम् ।

२ ऋ. सं. १०-८-३-२७-३७ ।

हे पूषन् पोषक एतन्नामकदेव शिवतमां अत्यन्तमंगलभूतां तां आ एरयस्व सर्वतः प्रेरय । यस्यां ऊर्वां बीजं रेतोलक्षणं मनुष्या वपन्ति आदधते । या नोऽस्माकं ऊरू उशती कामयमाना विश्रयाते, यस्यामूर्वां उशन्तः कामयमानाः वयं शेपं स्पर्शनयोग्यं पुंप्रजननं प्रहराम ऊर्वां व्यञ्जनसंबन्धं करवामेत्यर्थः ॥

—सायणभाष्यम् ।

३८ अर्थवादः—अयं च विधिवाक्यैकवाक्यतापन्नतया [illegible] विधेयस्य [illegible] प्राशस्त्यं [illegible] पर्यवस्यति । अर्थवादः पुनस्त्रिविधः—

"विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" ॥ इति ॥

मानान्तरविरोधे गुणवादः, यथा—"आदित्यो यूपः" इत्यादिः । मानान्तरावधारितेऽर्थेऽनुवादः, यथा—"अग्निर्हिमस्य भेषजम्" इत्यादिः । मानान्तरविरोध[illegible] तद्रहितो भूतार्थवादः, यथा—"देवासुराः संयत्ता आसन्" इत्यादिः ।

३९ अपूर्वविचारः—वेदबोधितविधिविषयस्य यागादेः "ज्योतिष्टोमेन, दर्शपूर्णमासाभ्याम्" इत्यादिश्रुतिबोधिता स्वर्गादिसाधनता प्रतीयते । सा च साधनता कालान्तरभाविफलजनकत्वरूपा । आशुतरविनाशिनो यागादेर्देहपातानन्तरं भोक्तव्यादिपदेनोच्यमानस्वर्गादिं प्रत्यव्यवहितपूर्वक्षणवर्तित्वं यावत्तु न सम्भवतीति, अव्यवहितपूर्ववृत्तियागादेश्च साधनत्वं न सम्भवति, अन्यथा मृताभ्यामपि दम्पतीभ्यां पुत्रोत्पत्त्यापत्तेः, अतोऽवश्यं यागादिजन्यमर्गादिजनकं किमप्यपूर्वं नाम द्रव्यं कल्पनीयम् । न च कल्पितेऽप्यपूर्वे तस्यैव स्वर्गसाधनत्वम्, न तु यागस्य स्वर्गसाधनत्वश्रुतिरप्रमाणेति शङ्क्यम् । यागस्यावान्तरव्यापारोऽपूर्वमिति कल्प्यते । तज्जन्यत्वे सति तज्जन्यजनकत्वं हि व्यापारलक्षणम्, कार्याव्यवहितप्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरत्वरूपकारणत्वाभ्युपगमात्, न यागस्य स्वर्गसाधनत्वश्रुतेर्व्याकोपः । न ह्युद्यमननिपतनयोरवान्तरव्यापारयोः सत्त्वे कुठारस्य छिदासाधनत्वमपैति । यदि व्यापारवतो यागस्य नाशे व्यापारोऽपि नश्येदिति कुठारदृष्टान्तेनापद्येत, तदा यागजन्या काचिच्छक्तिरपूर्वमस्तु, शक्तिव्यवधानेऽपि यागस्य साधनत्वं न विरुध्यते, औष्ण्यव्यवहितेऽप्यग्नौ दाहकत्वं दृश्यते । यथाऽङ्गारजन्यमौष्ण्यं शान्तेष्वप्यङ्गारेषु जलेऽनुवर्तते, तथा यागजन्यमपूर्वं नष्टेऽपि यागे कर्तर्यात्मन्यनुवर्तिष्यत इति साधु स्थिरयते । तस्मात्सिद्धं मीमांसकाभिमतं फलप्रापकमपूर्वमिति ।

४० अपूर्वाणामनेकत्वम्—श्रुत्याधिकारविधौ कर्मणः फलसाधनता बोध्यते 'यागेन स्वर्गं भावयेत्' इति । कथं विनश्वरेण यागेन भावयेदित्याकाङ्क्षायां 'अपूर्वं कृत्वे'ति समाधीयते । कथमपूर्वं क्रियेतेति पुनरपेक्षायां यागानुष्ठानप्रकारेणेति । तच्चापूर्वं दर्शपूर्णमासयोरनेकविधम्—फलापूर्वं, समुदायापूर्वं, उत्पत्त्यपूर्वं, अङ्गापूर्वं चेति । येन स्वर्ग आरभ्यते तत्फलापूर्वम् । अमावास्यायामाग्नेयादीनां त्रयाणां यागानामेकः समुदायः, पौर्णमास्यामपर इति तयोर्भिन्नकालयोः संहत्य फलापूर्वारम्भकत्वायोगात्तदारम्भाय समुदायद्वयजन्यमपूर्वद्वयं कल्प्यते, तत्समुदायापूर्वम् । तादृशसमुदायापूर्वनिर्वहणाय समुदायघटकानां त्रयाणां यागानां भिन्नक्षणवर्तित्वेन संहननासम्भवात्, आग्नेयाग्नीषोमीयोपांशुयाजयागैः प्रत्येकं त्रीण्यपूर्वा-

ण्युत्पद्यन्ते । एवं दर्शे आग्नेयादियागत्रयेण पृथगुत्पत्त्यपूर्वाण्युत्पद्यन्ते इति कल्प्यते, तेषां चापूर्वाणामङ्गोपकारमन्तरेणानिष्पत्तेः, अनेकक्षणवर्तिनां चाङ्गानां सङ्घातासम्भवेन तत्तदङ्ग-जन्यान्यनेकान्यपूर्वाणि कल्प्यन्ते, तानि चाङ्गापूर्वपदेन व्यपदिश्यन्ते । एषाऽपूर्वप्रक्रिया "चोदनापुनरारम्भः"[1] इत्यधिकरणे भेदलक्षणे तत्तन्मीमांसाग्रन्थेषु साकल्येन समाकलनीया, सुधीभिः ।

४१ क्रत्वर्थविचारः—एवंविधापूर्वसाधनानि यानि कर्माणि विधीयन्ते वेदे, तेषु कानिचित्पुरुषार्थानि कानिचित्क्रत्वर्थानि । "यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणा-विभक्तत्वात्"[2] इति सूत्रेण शास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशकत्वं पुरुषार्थस्य लक्षणम् । क्रत्वर्थो हि शास्त्रादेव गम्यते, यस्मिन् कृते पुरुषस्य प्रीतिर्भवति स पुरुषार्थः इति तयोः स्वरूपे । पुरुषार्थभिन्नत्वं क्रत्वर्थलक्षणं, क्रत्वर्थो हि क्रतुमुपकरोति, उपकारश्च साद्गुण्य-सम्पादनम् । पुरुषार्थस्तु क्रतुप्रवेशमन्तराऽपि पुरुषमुपकरोति, पुरुषोपकारश्च साक्षात्–अदृष्ट-द्वारा वा पुरुषप्रीतिसम्पादनम् । दर्शपूर्णमासादयो गोदोहनादयश्च पुरुषार्थाः । न हि दर्श-पूर्णमासाभ्यां कस्यचित्क्रतोरुपकारः सम्पद्यते, तयोरेव क्रतुत्वात्, नापि गोदोहनं क्रतूप-कारकम्, तदभावेऽपि चमसेन क्रतूपकारसिद्धेः । किंतु दर्शपूर्णमासाभ्यां स्वर्गस्य, गोदो-हनेन पशूनां च सम्पादनात्पुरुषप्रीतिसिद्धिः । प्रयाजादयस्तु क्रत्वर्थाः, न हि प्रयाजादिभिः पुरुषस्य कश्चित्प्रीतिविशेष उत्पद्यते येनैते पुरुषार्था भवेयुः । किंतु दर्शपूर्णमासरूपक्रतुज-न्यापूर्वसाधकतया क्रतोरेवोपकारकाः । अन्यानि पुनः कानिचित्पुरुषार्थानि च क्रत्वर्थानि च भवन्ति, यथा–अनृतवदननिषेधः । पुरुषेणोद्यमानमनृतं प्रत्यवायमापादयति । दर्श-पूर्णमाससंयुक्तेन पुरुषेण चोच्यमानमनृतं क्रतोरपि वैगुण्यमापादयति, पुरुषमपि प्रत्य-वायभाजं करोति । एवं च क्रत्वर्थपुरुषार्थयोर्विवेकं विज्ञायानुष्ठितानि कर्माणि श्रेयो जन-यन्तीति भगवाञ्जैमिनिः प्रयुक्तिलक्षणे आदित एव निर्णिनाय "अथातः क्रत्वर्थपुरुषार्थ-योर्जिज्ञासा"[3] इत्यादिना ।

४२ अङ्गविचारः—एवंविधैश्च क्रतुभिः पूर्वोक्तापूर्वे जननीये यानि पुनः साक्षात्पर-म्परया वा सहकारीणि भवन्ति तान्यङ्गानीत्याचक्षते मीमांसकाः । अङ्गत्वं च परोद्देशप्रवृ-त्तपुरुषकृतिव्याप्यत्वम् । परः स्वर्गादिः, तदुद्देशेनाग्नेयादियागादौ यः प्रवृत्तः पुरुषः तत्कृ-तिविषयत्वमङ्गानामस्तीति लक्षणसङ्गतिः । न चैतत्प्रधानेष्वतिव्याप्तमिति शङ्क्यम्, अफ-लत्वेन विशेषणीयत्वात् । प्रधानानि हि फलवन्ति, तत्सन्निधौ पठितानामफलानामेव ह्यङ्ग-त्वम् । "फलवत्सन्निधावफलं तदङ्गम्" इति हि न्यायः । न च प्रयाजाद्यङ्गानामपि "वर्म वा एतद्यज्ञस्य क्रियते, यत्प्रयाजानूयाजा इज्यन्ते, वर्म यजमानस्य भ्रातृव्याभिभूत्यै, यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते" इत्यादिना फलसम्बन्धबोधनात्कथमेषामङ्गत्वम् इति वाच्यम्,

---

१ जै. सू. २-१-५ । २ जै. सू. ४-१-२ । ३ जै. सू. ४-१-१ ।
३ भूमिका.

मवते पुरोडाशमष्टाकपालं निर्वपेत्, अस्ते स्नायात्, वैश्वानरं द्वादशकपालं निर्वपे-
ते" इत्यादिवाक्यविहितानि नैमित्तिकानि, गृहदाहग्रहणपुत्रजननादिनिमित्तेषु तेषां
त् । यद्यपि नैमित्तिकानामप्यकरणे प्रत्यवायापादकत्वस्याविशेषेण नित्यत्वं प्रसज्यत
थापि जीवनादिनियतनिमित्तकानि नित्यानि, गृहदाहाद्याकस्मिकनिमित्तकानि नैमित्ति-
तयोर्विवेकः । "चित्रया यजेत पशुकामः, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः,
ः कारीर्या यजेत" इत्यादिवाक्यविहितानि काम्यानि, तत्तत्फलोद्देशेन विहित-
"तस्मान्मलवद्वाससा न संवदेत न सहासीत न तस्यान्नमद्यात्, न सुरां पिबेत्,
ञ्जं भक्षयेत्" इत्यादीनि निषिद्धानि । तत्र काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्ति-
नेनानुषङ्गिकं स्वर्गादिफलं सत्त्वशुद्धिद्वारा विविदिषोत्पादनपुरःसरं ब्रह्मज्ञानमपि
द्यत इति सिद्धान्तः कृतधियाम् । तत्र काम्ये कर्मणि सर्वाङ्गान्युपसंहर्तव्यानि, अङ्ग-
नानुष्ठीयमानं काम्यं कर्म न जातु फलं प्रसोष्यति । नित्येषु तु यदा यावन्त्यङ्गानि
युपसंहर्तुं तदा तावद्भिरुपेतं प्रधानं कुर्वन्नपि फलाय कल्पते ।

७ गौणमुख्यविचारः—एवं श्रुत्युक्तेषु कर्मसु प्रधानं वाऽङ्गं वा यन्मुख्यतया श्रूयते,
व महता प्रयत्नेनानुष्ठेयम् । सर्वथा तदलाभे शास्त्रोक्ताः प्रतिनिधयः समाहर्तव्याः ।
मुख्यमुख्यसदृशा एव, तथापि मुख्यसदृशलाभे मन्दसदृशं नोपादेयम् । वैकल्पिकयोर्मुख्य-
। प्रक्रान्ते प्रयोगे यदि तस्यापचारो भवति, तदा वैकल्पिकं मुख्यान्तरं नोपादेयम्,
प्रक्रान्तपूर्वद्रव्यस्य मुख्यसदृशमेव वस्तु प्रतिनिधातव्यम् । क्वचिन्मुख्य[illegible]
त्वादसदृशमपि प्रतिनिधीयते, यथा "यदि सोमं न विन्देत पूतीकानभिषुणुयात्"
स्पष्टं चैतत्सर्वमधिकारलक्षणे प्राच्यां मीमांसायाम् ।

८ धर्माधिकारनिर्णयः—अखिलेषु वैदिकेषु कर्मणि त्रैवर्णिकस्यैवाधिकारो न [illegible],
चाग्निसाध्यत्वात्, अग्नेश्चाधानसम्पाद्यत्वेनाधानस्य "वसन्ते ब्राह्मणोऽग्नीनादधीत,
राजन्यः, शरदि वैश्यः" इति त्रयाणामेवानुशिष्टत्वेन [illegible] । [illegible]
तानसाध्यत्वेनार्थज्ञानस्य चाध्ययनसम्पाद्यत्वात्, [illegible]
नस्य च "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम्" इति [illegible]
[illegible]ऽधिक्रियतेऽध्ययनाद्यविधि [illegible] । [illegible]
[illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible]

याध्ययनोपात्तविद्यांस्त्रैवर्णिकांल्लभन्ते, तदा तैरेव निराकाङ्क्षत्वान्न चतुर्थस्य विद्यामाक्षिपन्ति। तस्मात्त्रैवर्णिकानामेवाधिकारः कर्मणि ।

४९ स्त्रीणामधिकारः—ननु शूद्रस्याध्ययनाधिकाराभावेन कर्मानधिकारवत् स्त्रीणामपि कर्मस्वनधिकारः । युक्तं चैतत्, स्वर्गकामादिवाक्ये पुंलिङ्गनिर्देशात् । कर्मणां द्रव्यसाध्यत्वेन स्त्रीणां "भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः" इति स्मृत्याऽधनत्वाभिधानाच्चेति चेन्न, तत्र स्वर्गकामपदेन पुंस्त्वस्याविवक्षितत्वात्। उद्देश्यगतं पुंस्त्वैकत्वादि न विवक्ष्यते । यथा-ग्रहैकत्वादि । न च निर्धनत्वमनधिकारे तन्त्रम्, फलकामनायाः प्रयोजकत्वात् । दानकाले "धर्मे च, अर्थे च, कामे च, नातिचरितव्या" इति संवादकरणाद्भर्तृधनेनैवास्याधनवत्त्वाच्च । अथैवं स्त्रिया अधिकारे सिद्धे स्वातन्त्र्येणैव तस्याः कर्मणि प्रवृत्तिः स्यात्, कस्तां निरोद्धुमीष्टे; इति चेन्नैवम्-"क्षौमे वसानौ जायापती अग्निमादधीयाताम्" इत्यादिना दम्पत्योः सहैवाधिकारनिरूपणात् । उभयोः पार्थक्येन कर्मानुष्ठाने क्रतोर्वैगुण्यमापद्येत । तथाहि—तत्र तत्र कर्मणि पत्न्यवेक्षणं यजमानावेक्षणं चेत्युभयमाम्नायते । तत्र यजमानप्रयोगे पत्न्यवेक्षणं लुप्येत, पत्नीप्रयोगे च यजमानावेक्षणं लुप्येत । अतो द्वयोः सहाधिकारः । न च यजेतेत्यत्रैकत्वं विरुद्ध्यते इति वाच्यम्, "अग्नीषोमौ देवता" इत्यत्र यथा देवतात्वं व्यासज्यवृत्ति, तथा कर्तृत्वमपि दम्पत्योर्व्यासज्यवृत्ति, एकमेवेत्यङ्गीकारात् । आज्यावेक्षणादिकर्मसु पुनर्यावदुपयुक्तं तावत्तादात्विकमध्ययनं स्त्रीभिः कार्यम् । यथा रथकारेणाग्न्याधाने । "वर्षासु रथकार आदधीत" इत्यत्र त्रैवर्णिकस्य शिल्पोपजीवित्वप्रतिषेधादत्रैवर्णिक एव कश्चन सौधन्वनापरपर्यायो माहिष्येण करण्यां जातः प्रतिलोमसंकरो जातिविशेषो रथजीवी रथकारसंज्ञक आधानाधिकृतत्वेन निर्दिश्यते । शब्दबलाच्च तस्याध्ययनादावनधिकृतस्याप्याधानेऽधिकारः प्राप्नोति । तच्च विधीयमानमाधानं स्वमात्रोपयुक्तमध्ययनमर्थादाक्षिपति । एवमेव "वास्तुमयं रौद्रं चरुं निर्वपेत्" इति प्रकृत्य "एतया निषादस्थपतिं याजयेत्" इत्यनेन निषादस्थपतेर्यजनाधिकारो दृश्यते । तत्र षष्ठीसमासे आश्रीयमाणे लक्षणा प्रसज्येतेति निषाद एव स्थपतिरिति सामानाधिकरण्येन व्युत्पत्तिराश्रिता । ततश्च रौद्रेष्टिमात्रोपयोगिन्यध्ययनेऽधिकार आक्षेपाल्लभ्यते । सर्वमेतदधिकारलक्षणे निर्णीतम् ।

५० वेदव्यवहारः—सोऽयं मन्त्रब्राह्मणात्मको वेदः पूर्वकाण्डे यज्ञमेव सप्रपञ्चमुपवर्णयन्नुपक्षीणः । नैतावताऽन्यानैहिकामुष्मिकव्यवहारगोचरान् विषयान् न प्रतिपादयति, येन स व्यवहारमात्रप्रधानैर्नाद्रियेत, किन्तु दत्तपुत्रस्वीकारदायविभागसप्तमर्यादापालनान्नदानप्रपाप्रवर्तनमातुलकन्यापरिणयनप्रभृतीन् सर्वजनोपकारकान् विषयान् विधिमुखेन निषेधमुखेन वा प्रतिपादयन् भगवान् वेदकल्पद्रुमः कथं नु नाम सचेतसामनादरणीयतामावहेत्? । तत्र कांश्चिद्विषयान् सङ्क्षेपत उदाहरिष्यामः ।

हि प्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।
अधाचिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः" ॥ (ऋ०५।२।७)
इति दत्तके (१)

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः"॥ (२।१।८)

"अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥" (निरुक्ते अ० ३ खं० ५)

इति च दायभागे (२)

सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।
आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ"(ऋ०७।५।३३।६)

इति सुरापानादिसप्तमर्यादापरिपालने ।

---

१ पूर्वस्यामृच्युक्त एवार्थोऽत्र प्रपञ्च्यते—अरणोऽरममाणोऽन्योदर्यः सुशेवः सुखतमः सन् प्रभाय पुत्रत्वेन मनसा मन्तवा उ मनसापि मन्तव्यो न भवति । अधा चित् अपि च सोऽन्योदर्यः ओकः स्वं स्थानमेव प्राप्नोति । अतो वाजी अन्नवान् अभीषाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोऽस्मान् आ एतु ॥

२ अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन् प्रतीची स्वकीयस्थानात्प्रतिनिवृत्तमुखी [illegible] एति गच्छति, [illegible] भ्रातृरहिता योषित्स्वोचितवासोलङ्कारादिलाभाय पितॄनेति नाति भ्रातरि स [illegible] [illegible], तदभावात्पितरमेव प्राप्नोति । यद्वा सति स्वभ्रातरि स एव पितुः पिण्डदानादिकं [illegible] करोति, [illegible]वात्स्वयमेव तत्कर्तुं पित्रादीन् गच्छति, तद्वदियमुषा अपि [illegible] पितृभूतं सूर्यमाभिमुख्येन गच्छति, अयमेको दृष्टान्तः । तथा धनानां [illegible] दृष्टान्तः । गर्त इति गृहनाम कूपरोगर्त इति तन्नामसु पाठात् । [illegible] [illegible]स्थानमुच्यते, तदारोहतीति गर्तारुक् । यथा लोके [illegible] लाभाय गर्तमागच्छति तां तु सभ्या विचार्य [illegible] [illegible] अपि धनानां [illegible] [illegible]

[illegible]

"मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥"
(ऋ० सं० ८।६।२३।१)

इत्यवदाने (३)

"यन्वग्निव प्रपा असि"

इति प्रपाप्रवर्तने (४)

"आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व ।
तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वस्रेयी वपामिव ॥"

इति मातुलकन्यापरिणये (५)

५१ मीमांसाशास्त्रम्—भगवत्या श्रुत्या यागादीनां स्वर्गादिसाधनत्वे प्रमीयमाणे कथं यागोऽनुष्ठेयः, कानि च तदङ्गानि, किमत्र प्रधानम्, कर्मणः प्रयोजनं किम्, कश्चात्राधिकारी, कथमूहः कार्यः, क्व वा बाधोऽनुसरणीयः, इत्यादयः शङ्काः समुत्पद्यमानाः प्रतिबध्नन्ति वैदिकस्य कर्मणोऽनुष्ठानमिति सर्वथा महतीयमनर्थपरम्परा कर्मानुतिष्ठासून् तत्फलं च प्रेप्सून् वैदिकानहर्निशं बाधत इति निपुणं निभालयन् भगवान् सर्वतन्त्रस्वतन्त्रः सर्वज्ञशिखामणिर्जैमिनिराचार्यश्चतुरध्यायात्मकेन सङ्कर्षकाण्डेन समं द्वादशलक्षणीं धर्ममीमांसां प्रणिनाय । तत्र नैकविधान्विषयान् प्राप्तपूर्वपक्षप्रत्याख्यानपुरःसरं तैस्तैरनितरबुद्धिसाधारणैर्न्यायजालैर्निर्णीय दयारसवशंवदश्चिराय स्वत्ववमर्णयांचकार वैदिकवर्गम् । धर्ममीमांसा, कर्ममीमांसा, अध्वरमीमांसा, पूर्वमीमांसा, पूर्वतन्त्रमित्येतदस्य शास्त्रस्यानर्थान्तरम्। अत्र हि षोडशाध्यायाः । तत्रादिमेषु द्वादशस्वध्यायेषु निर्णीतानेव विषयान् क्रमशो मन्दमतीनां बुद्ध्यवरोहायेतस्ततो विप्रकीर्णान् पुनश्चतुर्लक्षण्यां विमर्शयाम्बभूव । स एष चतुरध्यायात्मको ग्रन्थः सङ्कर्षकाण्डमित्याख्यायते । तत्र प्रथमं द्वादशाध्यायेषु यथासङ्ख्यं प्रमाणं, भेदः, शेषत्वं, प्रयुक्तिः, क्रमः, अधिकारः, सामान्यातिदेशः, विशेषातिदेशः, ऊहः, बाधः, तन्त्रं, प्रसङ्गश्चेति द्वादश पदार्थाः

श्रकुः लक्वन्त इत्यर्थः । तासां मर्यादानां एकामित् एकामेव अंहुरः पापवान् पुरुषः अभिगात् अभिगच्छति। यस्त्वेवं करोति स पापवान् भवतीत्यर्थः । किंच आयोः तस्य मनुष्यस्य स्कंभः स्कंभयिता निरोधकोऽग्निः उपमस्य समीपभूतस्य आयोर्नीळे स्थाने पर्थां आदित्यरूपस्य सत्य रश्मीनां विसर्गे विसर्जनस्थानेऽन्तरिक्षमध्ये वर्तमाने धरुणेषूदकेषु तस्थौ विद्युदात्मना तिष्ठति अनेन लोकत्रयवर्तित्वमिति ॥

१ अदातारं दूषयति—अप्रचेताः अप्रकृष्टज्ञानः दाने चेतो मनो यस्य न भवति समोघं व्यर्थमेवान्नं विन्दते लभते। विद्लृ लाभे तौदादिकः 'शे मुचादीनाम्' (पा. सू. ७–१–५९) इति नुमागमः। इदं सत्यं यथार्थमेवेति ब्रवीमि, ऋषिरहं वदामि। न केवलं व्यर्थं किंतु तस्य पुरुषस्य स्ववध इत् वध एव अन्नं परामृश्यतः तच्छन्दस्य वधसामानाधिकरण्यात् पुंलिंगता। यथा–'शैरणौ' इत्यत्र यत्कर्म स एव कर्तेति। अथवा स निरर्थको वध एव यः पुरुषः अर्यमणं उपलक्षणमिदं सर्वान् देवान् अर्यमादीन् न पुष्यति हविःप्रदानेन न पोषयति नो नापि सखायं समानख्यानमभ्यागतमतिथिं मित्रवर्गं च न पोषयति पुष-पुष्टौ दैवादिकः यच्छब्दाध्याहारादनिघातः अत एव केवलादी अदेः सुप्यजाताविति णिनिः अत उपधालक्षणा वृद्धिः केवलमतिथिकमन्नं भुंजानः स केवलाघो भवति केवलपापवान्भवति अघमेव केवलं तस्य शिष्यते नैहिकं नामुष्मिकमिति। तस्माद्यथाकथंचिद्दातव्यमित्यभिप्रायः—सायणभाष्यम् ॥

२ शास्त्रस्येति षष्ठ्या वाचकत्वसंबंधोऽर्थः) धर्ममीमांसेत्यादि सर्वं पदजातमेतच्छास्त्रवाचकमनर्थान्तरम् (पर्यायः) इति योजना ।

सप्रपञ्चं निरूपिताः । तदिदं धर्मशास्त्रं कल्पसूत्राख्यं, प्रयोगशास्त्रं चेत्युभयं कर्मण इतिकर्तव्यतां दर्शयति । यथा चोक्तम्—

"धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ १ ॥ इति ॥

महर्षिजैमिनिप्रणीतमीमांसाशास्त्रमिदम् श्रीमदुपवर्षाचार्यभर्तृमित्रशबरस्वामिकुमारिलभट्टप्रभाकरमुरारिमिश्रपार्थसारथिमिश्रशालिकनाथखण्डदेवसोमनाथशम्भुभट्टानन्तभट्टप्रभृतिभिः सर्वदर्शनपारावारपारदृश्वभिर्वृत्तिभाष्यवार्तिकदीपिकारहस्यप्रभृतिभिरूहापोहविचारपरिप्लुतैः प्रबन्धरत्नैः परां किल कोटिं प्रचयस्य समारोपितम् ।

५२ यज्ञनिरूपणम्—देवऋणापाकरणाय योऽयं यज्ञः प्राक् प्रत्यपादि, तस्यैव निरूपणाय साकल्येन प्रवृत्तं पूर्वकाण्डम् । यज्ञमेव च व्यावर्णयितुं मीमांसाशास्त्रं प्रावर्तिष्ट । यज्ञियविषया एव वेदवाक्यान्युदाहृत्य न्यायेन निर्णीयन्ते मीमांसायाम् । नैतावता मीमांसाया यज्ञ एवोपयोगो नान्यत्रेति भ्रमितव्यम् । व्यावहारिकेष्वपि परःशतेषु विषयेषु योजयितुं मीमांसान्यायाः शक्यन्ते । **न हि जामात्रर्थं कृतं मधुरान्नं पररसनां प्राप्य विपरीतं भवति ।** लौकिकेष्वपि राजकीयनियमादिषु तत्र तत्र मीमांसान्यायानुपयुञ्जन्ति विचारचातुरीधुरीणाः । स चायं यज्ञशब्दः "यजि देवपूजासङ्गतिकरणदानेषु" इति धातुना व्युत्पाद्यमानो ज्ञानयज्ञध्यानयज्ञद्रव्ययज्ञतपोयज्ञब्रह्मयज्ञादीनभिदधानोऽपि ज्योतिष्टोमादिश्रौतयज्ञेष्वेव रूढतमः । स तावद्यज्ञ एकविंशतिसंस्थः सप्तपाकयज्ञसंस्थाः, सप्तहविर्यज्ञसंस्थाः, सप्तसोमसंस्थाश्चेति । श्रवणाकर्मसर्पबल्याश्वयुजीकर्मप्रत्यवरोहणाष्टकापार्वणमास्याश्वयुजीरूपाः **सप्त पाकयज्ञसंस्थाः**, आधानाग्निहोत्रदर्शपूर्णमासचातुर्मास्याग्रयणनिरूढपशुबन्धसौत्रामणीरूपाः **सप्तहविर्यज्ञसंस्थाः**, अग्निष्टोमात्यग्निष्टोमोक्थ्यषोडशिवाजपेयातिरात्राप्तोर्यामरूपाः **सप्त सोमसंस्थाः** । इमाः सोमसंस्थाः याज्ञिकमर्यादया सप्त भवन्ति । मीमांसकाः पुनः—अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्र इति चतस्र एव संस्थाः सङ्गिरन्ते । अत्यग्निष्टोममग्निष्टोमे, वाजपेयं च षोडशिनि, अप्तोर्यामं चातिरात्रेऽन्तर्भावयन्ति । तदिदं पुनराध्वरिकं कर्म चतुर्विधं—एकाहसाध्यं, अहीनं, सत्रं, उभयात्मकं चेति । तत्र ज्योतिष्टोमादय एकाहसाध्यक्रतवः, एकसुत्याकत्वं तेषां लक्षणम् । द्विरात्रादयेकादशरात्रान्ता अहीनसंज्ञका गोस्तोमायुष्टोमपौण्डरीकादयः, लक्षणं च तेषां यजतिचोदनाचोदितत्वे सत्यनियतसङ्ख्याकयजमानकत्वम् । त्रयोदशादि सहस्रवर्षसुत्याकं राज्ञिसत्रगवामयनकौण्डपायिनादिकं सत्रम्, तल्लक्षणन्तु—आसनोपायिचोदनाचोदितत्वे सति बहुयजमानकत्वम् । द्वादशाहसुत्याकं तूभयात्मकम् ।

(५) प्रकृतप्रकरणविमर्शः ।

५३ वैदिकानां प्रवृत्तिः—अथ सामान्यतो वैदिकं प्रमेयमनुवर्ण्य प्रस्तुतप्रबन्धप्रका-

१ द्वादशाहसुत्याकं तु सत्राहीनोभयात्मकत्वनिरूपणं, किञ्चिद् द्वादशाहं सत्रे किञ्चिदहीनेऽन्तर्भावयन्ति मतः ।

शनप्रयोजनादिकं परामृशामः । तत्र तावद्विदुषां त्रिधा किल प्रवृत्तिर्दृश्यते वैदिकग्रंथनि-
रीक्षणे । तत्रैके-प्रकृतिप्रत्ययादिसंशोधनपुरःसरमर्थमनुसन्दधाना व्याकरणपरिभूततां वैदि-
कग्रन्थानां निश्चेतुं यतन्ते । अन्ये पुनरैतिह्यान्वेषणे प्रणयमावहंतो वैदिकप्रबन्धेषु हरि-
श्चन्द्रप्रमगन्दादिविषयकान् भूयस इतिहासान् शृण्वन्तः पारिप्लवानि पठन्तः इतिहासमेव
सूक्ष्मेक्षिकया विमृशन्ति । अपरे तु सामान्यतो विशेषतश्च प्रवृत्तानाचारान् निषेकादिसंस्का-
रान् अग्निष्टोमादिसंस्थाः यागहोमदानानि च साध्यसाधनेतिकर्तव्यतानिर्णयपुरःसरं मन्त्रार्थ-
वादादिभिः प्रमिमाणाः वैदिकग्रन्थानालोडयन्तो दृश्यन्ते । त्रिविधांश्चैतान् परीक्षकानुदाज-
हार भगवान् यास्काचार्यो निरुक्ते-"तत्र नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्च"
(१-१२-२) "त्वाष्ट्रोऽसुर इत्यैतिहासिकाः" (२-१६-२) "तत्रैतद्याज्ञिका वेदयन्ते-
त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि तान्येतस्मिन्काले एकेन प्रतिधानेन पिबन्ति
तान्यत्र सप्तांस्युच्यन्ते" इत्यादिना (५-११-१)

५४ यजुर्वेदद्वैविध्यम्—तत्र यज्ञादिकर्मणां बाहुल्येन यजुर्वेद एव वर्णनमुपलभ्यते ।
स च यजुर्वेदः शुक्ल-कृष्णभेदेन द्विधा विभज्यते । तत्र शुक्लयजुर्वेदो भगवता याज्ञवल्क्येन
भगवन्तमादित्यमुपस्थाय वाजीरूपधरात्तस्मादध्यगामि । व्यासादधीतं यजुर्वेदं नैका-
ञ्छिष्यानध्यापयति भगवति वैशंपायनेऽकस्मात्प्रसक्तं बालब्रह्महत्यादिदोषमपाचिकीर्षवः
शिष्या गुरुणाऽनुज्ञाता उग्रं तपश्चेरुः । अतस्तेषां चरकाध्वर्यव इति प्रथाऽऽसीत् । तान-
वजानन्निव याज्ञवल्क्योऽहमेक एव तपश्चरिष्यामि इति सावष्टम्भमुल्ललाप । ततो ब्राह्मणा-
वधीरणात्कुपितेन वैशम्पायनेन "मत्तोऽधीतं यजुर्विसृज्यताम्" इत्याज्ञप्तो याज्ञवल्क्यो गुरो-
रधीतं यजुषां गणं छर्दित्वा निष्क्रान्तः सन्नपराणि यजूंषि गवेषयन् भगवन्तं त्रयीमयं सवि-
तारमुपतस्थे । अथान्ये ऋषयस्तच्छर्दितान् यजुर्गणांस्तित्तिरिपक्षिरूपेणाजक्षन् । सा शाखा
तैत्तिरीयेति पप्रथे । याज्ञवल्क्येन तेजोमयात्सहस्ररश्मेरधिगता शाखा शुक्लेति वाजसनीति
च जेगीयते । वाजी अश्वः तद्रूपेण सूर्येण, वाजिभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यमा
उपदिष्टा वाजसनी, वाजसनेयीत्यपि "अन्नं वै वाजः" इति श्रुतेर्वाजस्यान्नस्य सनिर्दानं अस्ति
सोऽयं वाजसनिः तस्य पुत्रो वाजसनेयो याज्ञवल्क्यः, तेनाधीता शाखा वाजसनेयी तस्या
अध्येतारोऽपि वाजसनेयिनः । याज्ञवल्क्येन च कण्वमध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यो-
ऽध्यापितः सोऽयं शुक्लो यजुर्वेदः । मन्त्रब्राह्मणयोर्विविक्तत्वं चास्मिन् वेदे कृष्णयजुर्वेदा-
द्वैलक्षण्यमिति शुक्लपदं साधु सङ्गच्छते । चरकाध्वर्य्वादिभिरधीतो वेदः कृष्णयजुःसंज्ञकः
तत्राभ्यूहन्ते—सम्यक् शुक्लवर्णेन सूर्येण दत्तः स शुक्लयजुर्वेदः [illegible] वेदोपकर्मणि
[illegible] कृष्णयजुः कृष्णपक्षे [illegible] कृष्णयजुरिति वेति
[illegible]। तत्र शुक्लयजुर्वेदो मध्यभागवर्तिन्या नर्मदाया उत्तरस्मिन् देशे बाहुल्येनाधीयते नर्म-
दाया दक्षिणतश्च कृष्णयजुर्वेदो भूयोऽधीयते ।

म्भवचनं "सूत्रपाठक्रमो विनिर्मितो भट्टोजीदीक्षितैः" इति। तथाविधामेव सिद्धान्तकौमुदी-मधिकृत्य व्यरचिषत प्रौढमनोरमा–शब्देन्दुशेखरप्रभृतयः प्रगल्भतमाः प्रबन्धाः श्रीभट्टोजी-दीक्षितनागेशभट्टप्रभृतिभिर्व्याकरणारण्यानीविहरणपञ्चास्यैः। सूत्रपाठव्युत्क्रमेण कौमुद्यां प्रकरणविभागः समासतः प्रदर्श्यते, यथा—

दशगण्यन्तर्गते भ्वादिगणे–		'झस्य रन्'	इति (२।४।१०५)
,,	,,	'इटोत्'	इति (३।४।१०६)
,,	,,	'आत्मनेपदेष्वनतः'	इति (७।१।५)
समासप्रकरणे	बहुव्रीहौ–	'अप्पूरणीप्रमाण्योः'	इति (५।४।११६)
,,	,,	'केऽणः'	इति (७।४।१३)
तद्धितप्रकरणे		'पीलाया वा'	इति (४।१।११८)
,,		'तत्प्रत्ययस्य'	इति (७।३।२९)
कारके		'सम्बोधने च'	इति (२।३।४७)
,,		'कारके'	इति (१।४।२३) इति।

कृष्णयजुर्वेदप्रकरणकौमुदीविभागाः

६० दार्ष्टान्तिकोपादानम्—एवमत्राप्यनुष्ठातॄणामनुष्ठानसौकर्यायानुष्ठेयक्रममनुरुध्य-

(१) आधानम्
(२) पुनराधानम्
(३) अग्निहोत्रम्(प्रवासोपस्थानादिसहितम्),
(४) अन्वारम्भणीयेष्टिः,
(५) दर्शपूर्णमासौ,
(६) आग्रयणम्
(७) पिण्डपितृयज्ञः,
(८) सौत्रामणी,
(९) सोमः (सौमिकब्रह्मत्वसहितः),
(१०) चयनम्,
(११) जयादिहोमः,
(१२) देविकाहवींषि,
(१३) वाजपेयम्,
(१४) राजसूयम्,
(१५) अश्वमेधः,
(१६) काम्येष्टयः,
(१७) दशहौत्रप्रकरणम्,
(१८) अग्न्यादितत्तद्देवताककर्मसु विनियुक्तानां मन्त्राणां प्रकरणम्,
(१९) सवप्रकरणम्,
(२०) नक्षत्रसत्रप्रकरणम्,
(२१) पुरुषमेधः,
(२२) वृपालम्भः,
(२३) वशागर्भदर्शनादि,
(२४) गवामयनं (द्वादशाहादि सत्रप्रकरणम्),
(२५) हौत्रप्रकरणम्,
(२६) सावित्रचयनादि (नाचिकेतं, चातुर्होत्रं, वैश्वसृजम्, आरुणकेतुकम्),
(२७) उपवीतादिप्रकरणम् (उपवीतसन्ध्याकूष्माण्डहोमब्रह्मयज्ञप्रशंसा),
(२८) पितृमेधब्रह्ममेधौ,
(२९) ब्रह्मविद्या।

चेति प्रकरणानि विभज्य यथोचितं मन्त्रा ब्राह्मणवचनानि च विनिवेशितानि । अध्ययन-पारायण-ब्रह्मयज्ञादा तु पारम्परिकोऽनादिसिद्ध एव क्रमो जागर्तीति न तत्र चोद्यलेशः कश्चिदवतरति । दृश्यन्ते चाद्याप्यर्वाचीनैः पण्डितैरनुष्ठेयकर्मोपयुक्ता मन्त्रा मूलग्रन्थेभ्यः उद्धृत्य सङ्कलिता अध्येतॄणां सौकर्याय । यथा—ऋग्वेदे—मन्त्रसंहिता ।

६१ **सङ्गहीत्रभिनन्दनम्**—तदेवं महता परिश्रमेण मीमांसाविद्यालयाग्निहोत्रशालामीमांसाग्रन्थप्रकाशकसमित्यादिसंस्थाप्रतिष्ठापकैः संस्कारमीमांसाधानपद्धतिदर्शपूर्णमासप्रकाशाग्निहोत्रचन्द्रिकापश्वालम्भमीमांसाप्रभृतिनैकप्रबन्धप्रणेतृभिर्व्याकरणवेदान्तश्रौतविद्यापारदृश्वभिर्मीमांसाशास्त्रोद्धरणगृहीतदीक्षैरग्निष्टोमाप्तोर्यामप्रभृतिश्रौतकर्मप्रवर्तकैर्मीमांसाशिरोमणि-सरस्वतीभूषण-प्रभृत्युपाधिसमलङ्कृतैः किञ्जवडेकरोपाह्व-श्रीवामनशास्त्रिभिः सङ्गृहीतोऽयं कृष्णयजुर्वेदप्रकरणकौमुदीप्रबन्ध इति सुबहु किलोपकृतं वैदिकविद्वन्निवहेषु । न केवलं श्रौतविद्याप्रवीणैः, न वा मीमांसकैः, नापि वा वेदार्थविद्भिरीदृशो ग्रन्थः सङ्गहीतुं पार्यत इति सर्वथा समभिनन्दनीयं शास्त्रिमहोदयानां समुचितं पाण्डित्यम् । प्रशस्यतममिममुद्यमं समभिनन्द्य सर्वेऽपि भारतीयाः पण्डिताः प्रबन्धमिममुपयुञ्जानाः सफलयेयुः श्रमं शास्त्रिवर्याणामिति बलवदाशास्महे ।

१८५९ ईश्वरनामसंवत्सरकार्तिकसुदिप्रतिपत् ।

श्रीजगद्गुरुशङ्कराचार्य
संस्कृतपाठशाला,
ता० ४।११।३७. धारवाड

नागेशशास्त्री उप्पिनबेट्टगिरिः


चेति प्रकरणानि विभज्य यथोचितं मन्त्रा ब्राह्मणवचनानि च विनिवेशितानि । अध्ययन-पारायण-ब्रह्मयज्ञादा तु पारम्परिकोऽनादिसिद्ध एव क्रमो जागर्तीति न तत्र चोद्यलेशः कश्चिदवतरति । दृश्यन्ते चाद्याप्यर्वाचीनैः पण्डितैरनुष्ठेयकर्मोपयुक्ता मन्त्रा मूलग्रन्थेभ्यः उद्धृत्य सङ्कलिता अध्येतॄणां सौकर्याय । यथा—ऋग्वेदे—मन्त्रसंहिता ।

६१ **सङ्गृहीत्रभिनन्दनम्**—तदेवं महता परिश्रमेण मीमांसाविद्यालयाग्निहोत्रशालामीमांसाग्रन्थप्रकाशकसमित्यादिसंस्थाप्रतिष्ठापकैः संस्कारमीमांसाधानपद्धतिदर्शपूर्णमासप्रकाशाग्निहोत्रचन्द्रिकापश्वालम्भमीमांसाप्रभृतिनैकप्रबन्धप्रणेतृभिर्व्याकरणवेदान्तश्रौतविद्यापारदृश्वभिर्मीमांसाशास्त्रोद्धरणगृहीतदीक्षैरग्निष्टोमाप्तोर्यामप्रभृतिश्रौतकर्मप्रवर्तकैर्मीमांसाशिरोमणि-सरस्वतीभूषण-प्रभृत्युपाधिसमलङ्कृतैः किञ्जवडेकरोपाह्व-श्रीवामनशास्त्रिभिः सङ्गृहीतोऽयं कृष्णयजुर्वेदप्रकरणकौमुदीप्रबन्ध इति सुबहु किलोपकृतं वैदिकविद्वन्निवहेषु । न केवलं श्रौतविद्याप्रवीणैः, न वा मीमांसकैः, नापि वा वेदार्थविद्भिरीदृशो ग्रन्थः सङ्ग्रहीतुं पार्यत इति सर्वथा समभिनन्दनीयं शास्त्रिमहोदयानां समुचितं पाण्डित्यम् । प्रशस्यतममिममुद्यमं समभिनन्द्य सर्वेऽपि भारतीयाः पण्डिताः प्रबन्धमिममुपयुञ्जानाः सफलयेयुः श्रमं शास्त्रिवर्याणामिति बलवदाशास्महे ।

१८५९ ईश्वरनामसंवत्सरकार्तिकशुदिप्रतिपत् ।

श्रीजगद्गुरुशङ्कराचार्य
संस्कृतपाठशाला,
ता० ४।११।३७. धारवाड　　}　　नागेशशास्त्री उप्पिनबेट्टगिरिः

आपस्तंबसूत्रविहिताधानविहारः



(१) आधानगतमन्त्रवाक्यविषयाः ।

(२) पुनराधानगतमन्त्रवाक्यविषयाः ।

मीमांसकशिरोमणिसरस्वतीभूषणेत्याद्युपाधिविभूषितैः पण्डितप्रवरैः
किंजवडेकरोपाह्वैः श्रीवामनशास्त्रिभिः प्रणीता

कृष्णयजुर्वेदप्रकरणकौमुदी ।

प्रथमो भागः ।

आधानपुनराधाने ।

(१) आधानगतमन्त्रवाक्यविषयाः ।

(२) पुनराधानगतमन्त्रवाक्यविषयाः ।

आधानप्रकरणम्।

सभाष्यं तैत्तिरीयब्राह्मणम्।

तत्र प्रथमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः।

कृत्तिकास्वग्निमादधीत। एतद्वा अग्नेर्नक्षत्रम्। यत्कृत्तिकाः। स्वायामेवैनं देवतायामाधाय। ब्रह्मवर्चसी भवति। मुखं वा एतन्नक्षत्राणाम्। यत्कृत्तिकाः। यः कृत्तिकास्वग्निमाधत्ते। मुख्य एव भवति। अथो खलु। (१) अग्निनक्षत्रमित्यपचायन्ति। गृहान्ह दाहुको भवति॥ प्रजापती रोहिण्यामग्निमसृजत। तं देवा रोहिण्यामादधत। ततो वै ते सर्वान्रोहानरोहन्। तद्रोहिण्यै रोहिणित्वम्। यो रोहिण्यामग्निमाधत्ते। ऋध्नोत्येव। सर्वान्रोहान्रोहति॥ देवा वै

श्रीमत्सायणाचार्यविरचितमाधानब्राह्मणभाष्यम्।

(१) अथाऽऽधानप्रकरणमारभ्यते—तत्रास्मिन्ननुवाके कालविशेषं विधत्ते—(कृत्तिकास्विति-) अग्निचयनकाण्डेऽम्बादुलानितत्निरित्याद्याः[1] कृत्तिकास्ता यस्मिन्दिने चन्द्रेण संयुज्यन्ते तस्मिन्दिने तासु कृत्तिकासु चन्द्रयोगं प्राप्तासु [अग्निम् आदधीत] अग्न्याधानं कुर्यात्। यत् एतत् कृत्तिकासंपातरूपं तत् एतत् [अग्नेः] अग्निसंबन्धि नक्षत्रम्। अत एवान्यत्राऽऽम्नातम्—“कृत्तिका नक्षत्रमग्निर्देवता”[2] इति। अत आधेयस्याग्नेः कृत्तिकास्वाधाने सति [स्वायाम्] स्वरूपभूतायाम् एव देवतायाम् आधानं कृतं भवति। अग्नेर्ब्राह्मणाभिमानित्वात्तत्प्रसादेन [ब्रह्मवर्चसी भवति] अधीतश्रुताध्ययनरूपब्रह्मवर्चससंपन्नो भवति॥

(२) प्रकारान्तरेण प्रशंसति—(मुखं वा इति-) कृत्तिकाः इति यत् तत् एतत् नक्षत्राणां मध्ये मुखं प्रथमं नक्षत्रम्। अत एव नक्षत्रप्रतिपादकेऽप्यनुवाक आदौ पठ्यते “कृत्तिका नक्षत्रमग्निर्देवता”[3] इत्येकत्र। “अग्नेः कृत्तिकाः। शुक्रं परस्तात्”[4] इत्यन्यत्र। “अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्”[5] इत्यन्यत्र। तदेतत्सर्वं मन्त्रानुवाकेष्विष्टिविधायकेऽप्यनुवाके एतदीयेष्टिरादावाम्नाता—“अग्निर्वा अकामयत। अन्नादो देवानाꣳ स्यामिति। स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत्”[6] इति। अतो मुखभूतासु कृत्तिकास्वादधानः पुमान्सर्वेषु स्वयं मुख्यो भवति॥

(३) अस्मिन्पक्षे गुणमुक्त्वा दोषमपि कंचिद्दर्शयति—(अथो खल्विति-) पूर्वोक्तगुणसंबन्धद्योतनाय अथो शब्दः। अग्निज्ञाः खलु अग्निदेवताकमिदं नक्षत्रम् इति एतत् [अपचायन्ति] निन्दन्ति। तस्मिन्नक्षत्र आदधानस्य यजमानस्य गृहान् सोऽग्निः दाहुकः दहनशीलो भवति॥

(४) अथ निर्दोषं नक्षत्रं विधत्ते—(प्रजापतिरिति-)[रोहिण्याम्] रोहन्ते आरोहन्ति इति रोहाः कामास्ते च यस्यां रोहन्ते सा रोहिणी। ऋध्नोत्येव समृद्धो भवत्येव। समृद्धिरेव ‘सर्वान्-’ इत्यनेन निर्दिष्टा॥

(५) नक्षत्रान्तरं विधत्ते—(देवा इति) भद्राः धनसंपन्ना आधित्सन्त आधातुमैच्छन्। तेषां धनश्लाघित्वात् अग्निः सम्यक् आहितो न आसीत्। [अथ] अनन्तरं तेन विफलत्वदूषणेन तदिदं

---

१ तै. सं. ४. ४. ५ इत्यत्र अम्बा, दुला, नितत्निः, अभ्रयन्ती, मेघयन्ती, वर्षयन्ती, चुपुणिका इति कृत्तिकाः समाम्नाताः। २ तै. सं. ४. ४. १०. १। ३ तै. सं. ४. ४. १०. १। ४ तै. ब्रा. ३. १. ५. १। ५ तै. ब्रा. ३. १. १. १। ६ तै. ब्रा. ३. १. ४. १।

भद्राः सन्तोऽग्निमाधित्सन्त (२)। तेषामनाहितोऽग्निरासीत्। अथैभ्यो वामं वस्वपाक्रामत्। ते पुनर्वस्वोरादधत। ततो वै तान्वामं वसूपावर्तत। यः पुरा भद्रः सन्पापीयान्त्स्यात्। स पुनर्वस्वोरग्निमादधीत। पुनरेवैनं वामं वसूपावर्तते। भद्रो भवति॥ यः कामयेत दानकामा मे प्रजाः स्युरिति। स पूर्वयोः फल्गुन्योरग्निमादधीत (३)। अर्यम्णो वा एतन्नक्षत्रम्। यत्पूर्वे फल्गुनी। अर्यमेति तमाहुर्यो ददाति। दानकामा अस्मै प्रजा भवन्ति॥ यः कामयेत भगी स्यामिति। स उत्तरयोः फल्गुन्योरग्निमादधीत। भगस्य वा एतन्नक्षत्रम्। यदुत्तरे फल्गुनी। भग्येव भवति॥ कालकञ्जा वै नामासुरा आसन् (४)। ते सुवर्गाय लोकायाग्निमचिन्वत। पुरुष इष्टकामुपादधात्पुरुष इष्ट-

वामं वननीयं मणिमुक्तादिकं [**वसु**] धनं तेभ्योऽपगतम्। **ततस्ते** देवाः श्रद्धालवो भूत्वा पुनर्वसू नक्षत्राव-यवौ तारकाविशेषौ यस्मिन्दिने चन्द्रेण युक्तौ तस्मिन्दिनेऽग्निं सम्यगाधाय तद्धनं पुनर्लब्धवन्तः। ततोऽप्यन्यो-ऽपि पूर्वं धनिकः **सन्** केनापि निमित्तेन पश्चात् **पापीयान् स्यात्** अत्यन्तनिर्धनो भवेत्। **स पुनर्वस्वो-रग्निम्** आधाय पूर्ववद्धनं प्राप्य सर्वेषां मध्ये **भद्रः** पूज्यो **भवति**। **पुनः** अपि **वसु** [**उपावर्तते**] लभ्यते ययोस्तौ **पुनर्वसू**॥

(६) अथ नक्षत्रान्तरं विधत्ते—(**यः कामयेतेति**–) सर्वाः **प्रजाः मे** मह्यं धनं दातुमिच्छन्त्विति **यः** यजमानः **कामयेत सः** अयं **पूर्वयोः फल्गुन्योः** आधाय प्रजाभिर्दत्तं धनं लभते। एतच्च नक्षत्रमर्य-मदेवताकम्। "फल्गुनीनक्षत्रमर्यमा देवता" इत्यन्यत्राऽऽम्नानात्। अरीन्यमयति धनदानेन वशीकरोति इति **अर्यमा** धनस्य दाता॥

(७) नक्षत्रान्तरं विधत्ते—(**यः कामयेतेति**–) **भगी** ऐश्वर्यादिगुणषट्ककामः। तथा च स्मर्यते— "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा" इति॥ तत्काम **उत्तरयोः फल्गुन्योः** आधाय तत्फलं प्राप्नोति। उत्तरयोः फल्गुन्योर्भगदेवताकत्वमन्यत्राऽऽम्नातम्। "फल्गुनी नक्षत्रं भगो देवता" इति॥

(८) अथ नक्षत्रान्तरं विधत्ते—(**कालकञ्जा इति**–) कालकञ्जशब्दोऽसुरविशेषनामधेयम्। ते च **असुराः** यदा स्वर्गार्थम् **अग्निं** चेतुं प्रारभन्त तदानीमेकैकोऽसुर एकैकाम् **इष्टकामुपादधात्**। तानसुराञ्जेतुकाम **इन्द्रो** वेषान्तरं कृत्वा **ब्राह्मणः** अहमिति **ब्रुवाणः** तन्मध्ये प्रविश्य कांचित् **इष्टकामुपाधत्त**। तदानीं मनसि **एषा मे** मदीयेष्टका **चित्रा** इति नामधेयेन युक्ताऽपेक्षितविचित्रफलप्रदातृत्वात् **इति** अमन्यत। तेन चाग्नि-चयनेनासुराः स्वर्गमारोढुं प्रारभन्त। तदानीं **स इन्द्रः** स्वकीयां ताम् **इष्टकां** [**आवृहत्**] चितेरुद्धृतवान्। चितिभ्रंशेन मार्गमध्य एवासुराः [**अवाकीर्यन्त**] भ्रष्टाः। **ते** चोर्णनाभिनामका लूताः कीटा **अभवन्**। तेन कीटेन संसृष्टं तन्तुजालमूर्णशब्देनोच्यते। ऊर्णां तस्मिन्नूर्णे सूत्रजाले स्थिता अभयो भीतिरहिता आसते। ते द्यावापृथिव्योः काष्ठयोर्मध्य आकाशे तन्तुजालं सृष्ट्वा तत्र निर्भयास्तिष्ठन्तीत्येतत्सर्वं लोकप्रसिद्धम्। **ऊर्णाव-भयः** इति पदद्वयं मिलित्वैकं नामधेयम्। अपांनपादिति पदद्वयं यथैकस्याग्नेर्नाम तद्वत्। तेषामसुराणां मध्ये **द्वौ** असुरौ श्रद्धातिशयात्स्वर्गं प्राप्य चितिभ्रंशात्तत्र देवलोके **श्वानौ** अभूताम् यस्मादेवमिन्द्रश्चित्रेष्टकापातेन तानसुरा-न्विनाशितवान्। तस्माद्यजमानश्चित्रानक्षत्रे **अग्निम्** आधाय भ्रातृव्यान्विनाश्य स्वस्मिन्नोजआदिकं स्थापयति। **ओजः** बलहेतुरष्टमो धातुः। **बलं** प्रसिद्धम्। **इन्द्रियं** चक्षुरादिकम्। **वीर्यं** तदीयव्यवहारपाटवम्॥

१ तै. सं. ४. ४. १०. । २ तै. सं. ४. ४. १०. ।

कामम् । स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त । एषा मे चित्रा नामेति । ते सुवर्गं लोकमाप्रारोहन् । स इन्द्र इष्टकामावृहत् । तेऽवाकीर्यन्त । येऽवाकीर्यन्त । त ऊर्णावभयोऽभवन् । द्वावुदपतताम् (५) । तौ दिव्यौ श्वानावभवताम् । यो भ्रातृव्यवान्त्स्यात् । स चित्रायामग्निमादधीत । अवकीर्यैव भ्रातृव्यान् । ओजो बलमिन्द्रियं वीर्यमात्मन्धत्ते ॥ वसन्ता ब्राह्मणोऽग्निमादधीत । वसन्तो वै ब्राह्मणस्यर्तुः । स्व एवैनमृतावाधाय । ब्रह्मवर्चसी भवति । मुखं वा एतदृतूनाम् (६) । यद्वसन्तः । यो वसन्ताऽग्निमाधत्ते । मुख्य एव भवति । अथो योनिमन्तमेवैनं प्रजातमाधत्ते ॥ ग्रीष्मे राजन्य आदधीत । ग्रीष्मो वै राजन्यस्यर्तुः । स्व एवैनमृतावाधाय । इन्द्रियावी भवति ॥ शरदि वैश्य आदधीत । शरद्वै वैश्यस्यर्तुः (७) । स्व एवैनमृतावाधाय । पशुमान्भवति । न पूर्वयोः फल्गुन्योरग्निमादधीत । एषा वै जघन्या रात्रिः संवत्सरस्य । यत्पूर्वे फल्गुनी । पृष्टित एव संवत्सरस्याग्निमाधाय । पापीयान्भवति ॥ उत्तरयोरादधीत । एषा वै प्रथमा रात्रिः संवत्सरस्य । यदुत्तरे फल्गुनी । मुखत एव संवत्सरस्याग्निमाधाय । वसीयान्भवति ॥ अथो खलु । यदेवैनं यज्ञ उपनमेत् । अथाऽऽदधीत । सैवास्यर्द्धिः (८) ॥

खल्वाधित्सन्तु फल्गुन्योरग्निमादधीतासन्नपतताम्तूनां वैश्यस्यर्तुरुत्तरे फल्गुनी षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

---

(९) इत्थं नक्षत्राणि विधायाधिकारिविशेषादृतून्विधत्ते—(वसन्तेति) वसन्तः वसन्तर्तुस्तस्य च ब्राह्मणस्य प्राथम्यसाम्यात्स्वस्वामिभावात्स्वकीय ऋतावादधानस्य ब्राह्मणस्य च स्वोचितं ब्रह्मवर्चसमेव फलम् । किंच 'मधुश्च माधवश्च वासन्तिकावृतू' इत्याम्नानान्मुखत्वं प्राथम्यं वसन्तस्याप्यवगन्तव्यम् । अपि च यथा स्त्रीणामृतुविशेषे प्रवृत्तः पुरुषः प्रजननसमर्थो भवति तथर्तुविशेषे योनिमन्तं प्रजननसामर्थ्यवन्तं प्रादुर्भूतं प्रजातं चाग्निमाधत्ते । एवं ग्रीष्मशरद्वाक्ययोरपि व्याख्येयम् ॥

(१०) पूर्वं काम्य आधाने पूर्वोत्तरफल्गुनीनक्षत्रद्वयं विहितम् । इदानीं तु नित्य आधाने नक्षत्रमेकं निषिध्येतरद्विधत्ते—(न पूर्वयोरिति-) फाल्गुनमासे येयं पूर्णिमा तत्र प्राप्तं यत्पूर्वफल्गुनीनक्षत्रं तद्युक्ता रात्रिः पूर्वसंवत्सरस्य समाप्तिस्थानीया । अतस्तत्राऽऽदधानः संवत्सरस्य पृष्टितः पृष्ठभागेऽनुष्ठानादेव दरिद्रो भवति । उत्तरफल्गुनीनक्षत्रे भाविसंवत्सरादित्वात्तत्राऽऽदधानः संवत्सरारम्भ एवाऽऽधानादत्यन्तधनिको भवति ।

(११) पक्षान्तरं विधत्ते—(अथो खल्विति) अन्येऽभिज्ञा एवमाहुः खलु यस्मिन्नेव काले एनं पुरुषं सोमयागः [उपनमेत्] आभिमुख्येन प्राप्नुयात्सोमयागं करिष्याम्यहमिति बुद्धिरुदियात्तदानीमेव आदधीत । न तु नक्षत्रादिकं परीक्षितव्यम् । सैव सोमयागबुद्धिरेव अस्य पुरुषस्य नक्षत्रादिकल्पनाविहीना समृद्धिः । अत एव सूत्रकारेणोक्तम्—"सोमेन यक्ष्यमाणो नर्तुं सृक्षेत न नक्षत्रम्" इति ॥

अत्र मीमांसा-तृतीयाध्यायस्य षष्ठपादे चिन्तितम्—"आधानं किं प्रधानं स्यात्संस्कारो वा क्रतुर्न वा । [illegible] ॥ [illegible] श्रुतिः । [illegible]

---

१ तै. सं. ४. ४. ११. । २ आप. श्रौ. सू. ५. ३. २१. ।

शास्त्रीयेऽस्तु स्वतन्त्रता" ॥ अनारभ्याधीतं पर्णमयीत्वं यथा जुह्वनाम्न्या प्रकृतौ निविष्टम्, तथैवाग्निनाम्ना तत्संस्काररूपमाधानं प्रकृतौ निविशत इति चेत्। मैवम्। वैषम्यात्। द्विविधो हि जुह्वा आकारः। लौकिकः शास्त्रीयश्च। अरत्निमात्रदैर्घ्यहंसमुखत्वाग्रबिलत्वादिरूपो दृश्यमानो लौकिकः। अपूर्वीयत्वाकारस्तु शास्त्रीयः। तयोरपूर्वीयत्वं क्रतुप्रवेशमन्तरेण नास्ति। तच्च यदि लौकिकाकारमात्रे पर्यवस्येत्तदा पर्णमयीत्वं विफलं भवेत्। काष्ठान्तरेणापि तदाकारस्य सुसंपादकत्वात्। अतोऽपूर्वीयत्वाय पर्णता क्रतौ प्रविष्टा। आहवनीयादीनां त्वेक एव शास्त्रीयाकारः। स च विधिबलादाधानेनैव जन्यते नान्यथा। तस्मादाधानस्य क्रतुप्रवेशं विनैव शास्त्रीयाहवनीयाद्याकारसंपादनसमर्थत्वादग्निमात्रेण तत्संयुज्यते। तथा सति पर्णवैषम्यादप्रकृतावप्रविश्याग्नीनुत्पाद्य क्रतुबलादाद्यत्वेनावतिष्ठते। ततो लौकिकोपायसंपादितस्रुवर्णव्रीह्यादिवदाधानसंपादितानां स्वतन्त्राणामेवाऽऽहवनीयाद्यग्नीनां पश्चाद्वाक्यैः क्रतुषु विनियोगोऽस्तु" ॥

तत्रैवान्यच्चिन्तितम्—"आधानं पवमानादेरिष्टेरङ्गं न वा भवेत्। अग्नीनामिष्टिशेषत्वात्तद्द्वाराऽस्य तदङ्गता ॥ अनारभ्य विधानात्तु नाङ्गं कस्यचिदाहितिः। अग्न्यर्थत्वात्तत्समेष्टिरग्नयस्त्वग्निहोत्रगाः" ॥ इदमाम्नायते— "अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये" इति। "वसन्ता ब्राह्मणोऽग्निमादधीत" इति च। तत्राधानं पवमानादीनामिष्टीनामङ्गं भवेत्। कुतः। दर्शपूर्णमासविकृतिषु पवमानादीष्टिषु चोदकप्राप्तानामाहवनीयाद्यग्नीनामिष्ट्यङ्गत्वे सत्यग्निद्वारा तत्संस्काररूपस्याऽऽधानस्यापि तदङ्गताया अनिवार्यत्वादिति चेत्। मैवम्। न ह्येतदाधानं कस्यचित्क्रतोः प्रकरणे पठितं किंत्वनारभ्याधीतम्। अतो न कस्याप्येतदङ्गम्। किंत्वाधानवदिष्टीनामप्यग्निसंस्कारार्थत्वात्परस्परं नास्त्यङ्गाङ्गिभावशङ्का। ननु पवमानेष्ट्यङ्गत्वाभावेऽग्निसंस्कारवैयर्थ्यादग्निद्वारेण तदङ्गत्वं युक्तमिति चेत्। न। संस्कृतानामग्नीनामग्निहोत्राद्युत्तरक्रतुषु तत्तद्वाक्यैर्विनियोगावगमात्। तस्मान्नाऽऽधानमङ्गम् ॥

द्वितीयाध्यायस्य तृतीयपादे चिन्तितम्। "वसन्ते विप्र आदध्यात्तत्रैवोपनयीत तम्। अनुवादः प्राप्तवाऽनुवादः कार्यसिद्धये ॥ अन्तरेणाग्निविद्याभ्यां कर्मानुष्ठित्यसंभवात्। कृते आधानोपनीती प्राप्ता विप्रादयस्ततः ॥ लौकिकाग्निः पुमन्काच तत्सिद्धेर्नास्ति कल्पनम्। कालविप्रादिसंयुक्तमतोऽप्राप्तं विधीयते" "वसन्ते ब्राह्मणोऽग्निमादधीत। ग्रीष्मे राजन्यः। शरदि वैश्यः" इति श्रूयते। "वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम्" इति च। तत्र वसन्तादिकालविशेषं विधातुं ब्राह्मणादयोऽनूद्यन्ते। न च तेषामप्राप्तिः। कर्मानुष्ठानान्यथानुपपत्त्या कृप्तत्वात्। न ह्याहुत्याधारभूतमग्निमनुष्ठानप्रकारज्ञापिकां विद्यां च विना कर्मानुष्ठानं संभवति। अग्निश्च नाऽऽधानमन्तरेणास्तीति ब्राह्मणादिकर्तृकमाधानं कल्पयति, विद्या चोपनयनपूर्वकाध्ययनमन्तरेण न संभवतीति ब्राह्मणादुपनयनं कल्पयतीति तत्प्राप्तिरिति चेत्। मैवम्। लौकिकाग्नि[illegible] पुस्तकादिनाधिगन्तुं च शक्यत्वेनाऽऽधानोपनयनयोरकल्पने ब्राह्मणादीनामप्राप्तेः। तस्माद्वसन्तादिकालविशिष्टं ब्राह्मणादिकर्तृकं आधानोपनयनं अत्र विधीयते ॥

षष्ठाध्यायस्य प्रथमपादे चिन्तितम्—"पुंसोरेकस्य वाऽऽधानं वसानाविदुषो द्वयोः। एष क्षौमविधिर्लिङ्गं दम्पत्योरेकता ततः" ॥ आधाने श्रूयते—"क्षौमे वसानावग्निमादधीयाताम्" इति। तत्र वसानावितिद्विवचनश्रुतेः पुंसोराधानेऽधिकार इति चेत्। मैवम्। क्षौमस्याप्राप्तस्य विधेयतया पुंद्वित्वस्यापि विधाने वाक्यभेदः प्रसज्येत। किंतु दम्पत्योः सहाधिकारेण प्राप्तं द्वित्वमनूद्यते। पतिश्च पत्नी चेति विग्रहे [illegible] द्वित्वसंख्यावत्त्वम्। तस्मादाधानेऽधिकारिणः पुंस एकत्वमेव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

१ '[illegible]' इति पाठः। २ '[illegible]। [illegible]' इति पाठः। ३ 'सुसंपादकत्वात्' इति पाठः। ४ '[illegible]' इति पाठः। ५ जै. न्या. मा. ३. ६. ८. । ६ तै. सं. २. २. ४. । ७ 'अग्नये पवमानाय [illegible] [illegible]' इति। [illegible] इति पाठः। ८ तै. ब्रा. १. १. २. ३. [illegible] ९ '[illegible]' इति पाठः। १० '[illegible]' इति पाठः। ११ जै. न्या. मा. ... १२ [illegible] १३ '[illegible]' इति पाठः। १४ '[illegible]' इति पाठः। १५ आप. श्रौ. सू. ५. ४. १०. ।

अथ प्रथमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥

[12]उद्धन्ति । यदेवास्या अमेध्यम् । तदपहन्ति । [13]अपोऽवोक्षति शान्त्यै ॥ [14]सिकता निवपति । एतद्वा अग्नेर्वैश्वानरस्य रूपम् । रूपेणैव वैश्वानरमवरुन्द्धे ॥ [15]ऊषान्निवपति । पुष्टिर्वा एषा प्रजननम् । यदूषाः (१) । पुष्ट्यामेव प्रजननेऽग्निमाधत्ते । अथो संज्ञान एव । संज्ञानꣳ ह्येतत्पशूनाम् । यदूषाः । [16]द्यावापृथिवी सहाऽऽस्ताम् । ते वियती अब्रूताम् । अस्त्वेव नौ सह यज्ञियमिति । यदमुष्या यज्ञियमासीत् । तदस्यामदधात् । त ऊषा अभवन् (२) । यदस्या यज्ञियमासीत् । तदमुष्यामदधात् । तददश्चन्द्रमसि कृष्णम् । ऊषान्निवपन्नदो

---

(१२) द्वितीयानुवाके आधानार्थं नक्षत्रादिकालोऽभिहितः । तृतीये देवयजनार्थाः संभारा उच्यन्ते । यदुक्तं सूत्रकारेण—"प्राचीनप्रवणं देवयजनमुद्धत्य" इति तदिदं विधत्ते-(उद्धन्तीति-) भूमेरूर्ध्वभागं खनित्रादिना खनेत् । तेन निष्ठीवनादिनिमित्तं यदमेध्यं तत् अपहतं भवति । उद्धननमन्त्रस्तु "उद्धन्यमानम्" इत्यादि । स चोपरितनप्रपाठकादावाम्नातत्वात्तत्रैव व्याख्यास्यते । एवमुत्तरेष्वपि विधिषु द्रष्टव्यम् ॥

(१३) अथ विधत्ते—(अपो वोक्षतीति-) उद्धननकृता भूमेर्वेदना जलेन शाम्यति । 'आपो वै शान्ताः' इत्यन्यत्रोपशमहेतुत्वश्रवणात् ॥

(१४) विधत्ते—(सिकता इति-) सिकतानां तद्रूपत्वं 'वैश्वानरस्य रूपम्' इति मन्त्रादवगन्तव्यम् । सिकतादयो द्रव्यविशेषा देवयजमानभूमौ प्रक्षेपणीयाः संभाराः । अत एव सूत्रकारेणोक्तम्—'पञ्च पार्थिवान्संभारानाहरत्येवं वानस्पत्यान्' इति । तत्र पार्थिवेषु सिकतारूप एकः संभार उक्तः ॥

(१५) द्वितीयं संभारं विधत्ते—(ऊषानिति-) पशवो गृहक्षेत्रोत्पन्नं तृणादिकं [illegible] भक्षयित्वा पुष्टाः सन्तोऽपत्यान्युत्पादयन्ति । तस्मात् ऊषाः लवणाम्भसा मिश्रिता भूम्यवयवा इति [illegible] । सा एषा पुष्टिः प्रजननं च तस्मादूषनिवापेन तदुभयप्राप्तिः । अपि च संज्ञाने [illegible] भवति । एतत् चोषरक्षेत्रं पशूनां संज्ञानम् । पशवो घ्राणेन तत्संस्थानं जानन्ति । तस्मादूषा आधाने [illegible] निवपनीयाः ॥

(१६) एतन्निवपनकाले ध्यानविशेषं विधत्ते—(द्यावापृथिवी इति-) [illegible] अन्तरिक्षव्यवधानरहिते अभूताम् । तदा प्राणिनामवकाशार्थं [illegible] वियोगं गते, [illegible] परस्परमेवम् अब्रूताम् आवयोर्यद्योग्यं [illegible] तत् सह एव [illegible] । [illegible] वियोगो मा भूत् द्युलोकस्य च भूमेर्वियोगो मा भूदिति । ततः अमुष्याः दिवः [illegible] यज्ञियं [illegible] तदस्यां पृथिव्यां सा धारयापयत् । ते च द्युलोकसारांशा एते [illegible] [ऊषाः] [illegible] अभवन् । तस्यां पृथिव्यां तत् यज्ञियं सारम् आसीत् तदमुष्यां दिवि [illegible] । तत् च [illegible] भूसारम् अदो [illegible] चन्द्रमसि [illegible] कृष्णम् । [illegible] ध्यायेत् । तथा सति [illegible] ॥

---

१ आ. श्रौ. ५. ४. १ । २ [illegible] । ३ [illegible] । ४ [illegible] १. । ५ [illegible] । ६ [illegible] १. ४. ।

पुन्र्यमज्जत् । स पृथिवीमध आर्च्छत् । तस्या उपहत्योदमज्जत् । तत्पुष्करपर्णेऽप्रथयत् । यदप्रथयत् (६) । तत्पृथिव्यै पृथिवित्वम् । अभूद्वा इदमिति । तद्भूम्यै भूमित्वम् । तां दिशोऽनु वातः समवहत् । ताᳶ शर्कराभिरदृᳶहत् । शं वै नोऽभूदिति । तच्छर्कराणाᳶ शर्करत्वम् । यद्वराहविहतᳶ संभारो भवति । अस्यामेवाच्छम्बट्कारमग्निमाधत्ते । शर्करा भवन्ति धृत्यै (७) । अथो शंत्वाय ॥ [२२] सरेता अग्निराधेय इत्याहुः । आपो वरुणस्य पत्नय आसन् । ता अग्निरभ्यध्यायत् । ताः समभवत् । तस्य रेतः पराऽपतत् । तद्धिरण्यमभवत् । यद्धिरण्यमुपास्यति । सरेतसमेवाग्निमाधत्ते । [२३] पुरुष इन्वै स्वाद्रेतसो बीभत्सत इत्याहुः (८) । उत्तरत उपास्यत्यबीभत्सायै ॥ [२४] अति प्रयच्छति । आर्तिमेवातिप्रयच्छति । [२५] अग्निर्देवेभ्यो निलायत । अश्वो रूपं कृत्वा । सोऽश्वत्थे संवत्सरमतिष्ठत् । तदश्वत्थस्याश्वत्थत्वम् । यदाश्वत्थः संभारो भवति । यदेवास्य तत्र न्यक्तम् । तदेवावरुन्धे ॥ (९) [२६] देवा वा ऊर्जं व्यभजन्त । तत उदुम्बर उदतिष्ठत् । ऊर्ग्वा

भूमिनाम संपन्नम् । **ताम्** आर्द्रां भूमिम् अनुलक्ष्य शोषयितुं चतस्रो **दिशः** अप्यनु प्रजापतिसंकल्पाद्वायुः स प्रवृत्तः । शुष्यन्तीं **तां** भूमिं स प्रजापतिः **शर्कराभिः** क्षुद्रपाषाणैः [**अदृंहत्**] दृढीचकार । कृत्वा च **नः** अस्माकं **शं** सुखम् **अभूत् इति** उवाच । तस्मात्कारणाच्छं सुखं कृतमाभिरिति व्युत्पत्त्या शर्करेति नाम संपन्नम् । यस्माद्वराहेणाऽऽनीताया मृद ईदृशो महिमा तस्मात् [**वराहविहतम्**] वराहेण भूमौ विहतं खनितमस्यां मृत्स्वरूपं संभरणीयम् । तथा सति **अस्यां** भूम्यामेव वैयर्थ्यं यथा न भवति तथाऽग्निमाधत्ते । यस्माच्छर्कराभिर्भूमिर्दृढीकृता तस्मादत्रापि **धृत्यै** दार्ढ्याय **शर्कराः** प्रक्षेप्तव्याः, **अथो** अपि च **शंत्वाय** सुखसिद्धये शर्कराः कार्याः ॥

(२२) अथ सप्तमं संभारं विधत्ते—(**सरेता इति-**) या अब्देवता **वरुणस्य** भार्याः, **ताः** कामुकः **अग्निः** ध्यात्वा [**समभवत्**] संभोगं कृतवान् । तदानीं व्यग्रस्य **तस्य रेतः** भूमौ पतित्वा **हिरण्यम्** अभूत् । अतोऽत्र हिरण्ये प्रक्षिप्ते सति सरेतस्कोऽग्निराहितो भवति ॥

(२३) एतस्य हिरण्यस्य प्रक्षेपस्थानं विधत्ते—(**पुरुष इति-**) **इन्वै** इति निपातत्रयं मिलित्वा प्रसिद्धिमाचष्टे । लोके सर्वोऽपि **पुरुषः** स्वकीयं रेतो हस्तेन स्प्रष्टुं जुगुप्सते । तदेतत्प्रसिद्धम् **इति** अभिज्ञा **आहुः** । तस्मादत्राग्निस्थापनप्रदेशं विहायोत्तरस्मिन्पार्श्वे हिरण्यं प्रक्षिपेत् । तच्च **अबीभत्सायै** संपद्यते ॥

(२४) यदुक्तं सूत्रकारेण—"द्वेष्याय रजतं प्रयच्छति" इति । तदिदं विधत्ते—(**अति प्रयच्छतीति-**) देवयजने प्रक्षिप्तं सुवर्णम् **अति**क्रम्यान्यद्रजतं प्रयच्छेत् । तथा सति स्वात्मानम् **अति**क्रम्यान्यस्मै द्वेष्याय स्वकीयाम् **आर्तिम्** दत्तवान्भवति ॥

(२५) तदेवं पार्थिवाः संभारा विहिताः । अथ वानस्पत्येषु सप्तसु संभारेषु प्रथमं संभारं विधत्ते—(**अग्निरिति-**) कदाचित् **अग्निर्देवेभ्यः** अपक्रम्य **अश्वः** भूत्वा तदीयं **रूपं** स्वस्य **कृत्वा** अश्वत्थवृक्षे निगूढः **संवत्सर**मात्रम् **अतिष्ठत्** । अश्वस्तिष्ठत्यस्मिन्निति व्युत्पत्त्या तस्य वृक्षस्याश्वत्थनाम संपन्नम् । तस्मादश्वत्थसंभारेण तत्र निरूढमग्नेस्तेजः प्राप्नोति ॥

(२६) द्वितीयं संभारं विधत्ते—(**देवा वा ऊर्जमिति-**) **देवाः** सर्वे कदाचिदेकत्रोपविश्याहारमूर्जं विभजन्तस्तदा तस्मिन्स्थाने पतितादन्नरसात् **उदुम्बर**वृक्ष **उदतिष्ठत्** । तस्मादन्नरसरूपोदुम्बरस्य तत्संभारेणान्नरसं प्राप्नोत्येव ॥

---

१ आप. श्रौ. सू. ५. १०. ४. । २ इत्-ह-वै इति छेदः ।

उदुम्बरः । यदौदुम्बरः संभारो भवति । ऊर्जमेवावरुन्धे ॥ [२७]तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्याहरत् । तस्य पर्णमच्छिद्यत । तत्पर्णोऽभवत् । तत्पर्णस्य पर्णत्वम् । (१०) यस्य पर्णमयः संभारो भवति । सोमपीथमेवावरुन्धे । [२८]देवा वै ब्रह्मन्नवदन्त । तत्पर्ण उपाशृणोत् । सुश्रवा वै नाम । यत्पर्णमयः संभारो भवति । ब्रह्मवर्चसमेवावरुन्धे ॥ [२९]प्रजापतिरग्निमसृजत । सोऽबिभेत्प्र मा धक्ष्यतीति । तꣳ शम्याऽशमयत् । (११) तच्छम्यै शमित्वम् । यच्छमीमयः संभारो भवति । शान्त्या अप्रदाहाय ॥ [३०]अग्नेः सृष्टस्य यतः । विकङ्कतं भा आर्च्छत् । यद्वैकङ्कतः संभारो भवति । भा एवावरुन्धे ॥ [३१]सहृदयोऽग्निराधेय इत्याहुः । मरुतोऽद्भिरग्निमतमयन् । तस्य तान्तस्य हृदयमाच्छिन्दन् । साऽशनिरभवत् । यदशनिहतस्य वृक्षस्य संभारो भवति । सहृदयमेवाग्निमाधत्ते (१२) ॥

ऊर्वा अभवन्नभवद्वल्मीकोऽश्राम्यदप्रथयद्भूत्यै बीभत्सत इत्याह रुन्धे पर्णत्वम-

शमयदच्छिन्दꣳस्त्रीणि च ॥ ३ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(२७) अथ तृतीयं संभारं विधत्ते—(तृतीयस्यामिति-) इतः भूलोकादारभ्य गणनायामन्तरिक्षमतिक्रम्य परतो वर्तमाना या द्यौस्तृतीया तस्यां सोमवल्ली स्थिता । तं च सोमं गायत्री देवता तत्रत्यैः सोमरक्षकैः सह युद्धं कृत्वा समाऽऽहरत् । अयं च वृत्तान्तः "कद्रूश्च वै सुपर्णी च" इत्यनुवाके प्रपञ्चितः । सहसा समानीयमानस्य तस्य सोमस्य [illegible] पर्णं छिन्नं सद्भूमौ पतित्वा पलाशवृक्षः अभवत् । पर्णजन्यत्वात्तस्य वृक्षस्य पर्णनाम संपन्नम् । सोमजन्यस्य तस्य संभरणेन सोमपानम् एव प्राप्नोति ॥

(२८) पुनरपि तमेव संभारं प्रशंसति—(देवा इति-) देवाः कदाचिदेकान्ते पलाशवृक्षच्छायायामुपविश्य [illegible] संवादं कृतवन्तः । तत् सर्वं समीपे स्थितः पलाशवृक्षः अशृणोत् । शोभनं वस्तु श्रुतवानिति [illegible] सुश्रवा इति नाम संपन्नम् । तस्मात्परं ब्रह्म श्रुतवतो वृक्षस्य संभरणेन ब्रह्मवर्चसमेव प्राप्नोति ॥

(२९) अथ चतुर्थं संभारं विधत्ते—(प्रजापतिरिति-) प्रजापतिरग्निं सृष्ट्वा मामयमग्निः प्रधक्ष्यतीति भीतः [illegible] अशमयत् । शमयत्वेनेति व्युत्पत्त्या शमीति नाम संपन्नम् । अतस्तत्संभारः पूर्वं [illegible], इतः परम् अप्रदाहाय च संपद्यते ॥

(३०) अथ पञ्चमं संभारं विधत्ते—(अग्नेरिति-) प्रजापतिना सृष्टोऽग्निर्यस्माद् गच्छति [illegible] तत्रत्यं तेजो [illegible] प्राप्नोत् । अतस्तत्संभारे सति भा एव दीप्तिमेव अवरुन्धे ॥

(३१) अथ षष्ठं संभारं विधत्ते—(सहृदय इति-) मरुतः कदाचिदग्निना सह विरोधे सति तम् अग्निम् [illegible] । [illegible] हृदयम् आच्छिन्दन् । तस्य हृदयमशनिरूपेण [illegible] । [illegible] अशनिहतस्य वृक्षस्य संभारेण सहृदयोऽग्निराहितो भवति ॥

इति श्री[illegible] कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

१ [illegible]

अथ प्रथमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ।

द्वादशसु विक्रामेष्वग्निमादधीत । द्वादश मासाः संवत्सरः । संवत्सरादेवैनमवरुध्याऽऽधत्ते । यद्द्वादशसु विक्रामेष्वादधीत । परिमितमवरुन्धीत । चक्षुर्निमित आदधीत । इयद्द्वादशविक्रामा३ इति । परिमितं चैवापरिमितं चावरुन्द्धे । अनृतं वै वाचा वदति । अनृतं मनसा ध्यायति । (१) चक्षुर्वै सत्यम् । अद्रा३गित्याह । अदर्शमिति । तत्सत्यम् । यश्चक्षुर्निमितेऽग्निमाधत्ते । सत्य एवैनमाधत्ते ॥ तस्मादाहिताग्निर्नानृतं वदेत् । नास्य ब्राह्मणोऽनाश्वान्गृहे वसेत् । सत्ये ह्यस्याग्निराहितः ॥ आग्नेयी वै रात्रिः । (२) आग्नेयाः पशवः ।

(३२) तृतीये देवयजनदेशे प्रक्षेप्तव्याः संभारा उक्ताः । अथ चतुर्थे तैः संभारैर्युक्तेष्वायतनेषु वह्न्याधानमभिधीयते । यदुक्तं सूत्रकारेण—"प्राचीनप्रवणं देवयजनमुद्धत्य तस्मिन्नुदीचीनवꣳशꣳ शरणं करोति तस्याग्रेण मध्यमं वꣳशं गार्हपत्यायतनं भवति तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याऽऽहवनीयायतनमेकादशसु राजन्यस्य द्वादशसु वैश्यस्य चतुर्विꣳशत्यामपरिमिते वा यावता वा चक्षुषा मन्यते तस्मान्नातिदूरमाधेय इति सर्वेषामविशेषेण श्रूयते" इति । तत्रैकं पक्षं विधत्ते—(द्वादशस्विति-) विक्रामः प्रक्रमः । स च द्विपदः । तथा चोक्तम्—"प्रक्रमो द्विपदस्त्रिपदो वा" इति । गार्हपत्यात् द्वादशसु विक्रामेषु समतीतेष्वाहवनीयायतनं कृत्वा तत्र अग्निम् आदध्यात् । संख्यासाम्येन मासद्वारा [संवत्सरात्] संवत्सररूपात् एनम् अग्निम् अवरुध्य आधानं कृतवान् ॥

(३३) पक्षान्तरं विधत्ते—(यदिति-) द्वादशसु विक्रामेषु आधाने सति देशस्य पादेन परि[illegible]त्वादग्निरपि परिमितमेव भवति । तस्माद्देशो न पादेन परिमातव्यः । किंतु चक्षुषा दृष्ट्वा [illegible] द्वादशविक्रामः संभवतीति निश्चित्य तत्र आदधीत । एवं सति पादेन [illegible] भविष्यति । चक्षुषा परिमितत्वात्तदीयगुणश्च भविष्यति । चाक्षुषनिश्चयस्योत्तमत्वं [illegible] ॥

(३४) इममेव पक्षं पुनः प्रशंसति—(अनृतमिति-) [illegible] । [illegible] पुरोवर्तिवस्तुनो याथात्म्यमेव पश्यतीति तत्सत्यस्वरूपम् । अत एव लोकेऽपि [illegible] किं त्वमेव दृष्टवानुत श्रुतवानसीत्येवं सत्यत्वनिश्चयाय पृच्छन्ति । [illegible] यदा दृष्टं तदा तत्सत्यमिति निश्चिन्वन्ति । [illegible] लोके [illegible]दर्शनं, तद [illegible] ।

(३५) इदानीं प्रसङ्गादाहिताग्नेर्धर्मविशेषं दर्शयति—(तस्मादिति-) [illegible] तस्मादाहिताग्निः सत्यमेव वदेत् । न तु अनृतम् । [illegible]

[illegible]

(३६) [illegible] विधत्ते—(आग्नेयीति-) [illegible] आग्नेयी । [illegible]

[illegible]

ऐन्द्रमहः । नक्तं गार्हपत्यमादधाति । पशूनेवावरुन्द्धे । दिवाऽऽहवनीयम् । इन्द्रियमेवावरुन्द्धे । अर्धोदिते सूर्ये आहवनीयमादधाति । एतस्मिन्वै लोके प्रजापतिः प्रजा असृजत । प्रजा एव तद्यजमानः सृजते । अथो भूतं चैव भविष्यच्चावरुन्द्धे ॥ (३) इडा वै मानवी यज्ञानूकाशिन्यासीत् । साऽशृणोत् । असुरा अग्निमादधत इति । तदगच्छत् । त आहवनीयमग्र आदधत । अथ गार्हपत्यम् । अथान्वाहार्यपचनम् । साऽब्रवीत् । प्रतीच्येषाꣳ श्रीरगात् । भद्रा भूत्वा पराभविष्यन्तीति । (४) यस्यैवमग्निराधीयते । प्रतीच्यस्य श्रीरेति । भद्रो भूत्वा पराभवति ॥ साऽशृणोत् । देवा अग्निमादधत इति । तदगच्छत् । तेऽन्वाहार्यपचनमग्र आदधत । अथ गार्हपत्यम् । अथाऽऽहवनीयम् । साऽब्रवीत् । (५) प्राच्येषाꣳ श्रीरगात् । भद्रा भूत्वा सुवर्गं लोकमेष्यन्ति । प्रजां तु न वेत्स्यन्त इति । यस्यैवमग्निराधीयते । प्राच्यस्य श्रीरेति । भद्रो भूत्वा सुवर्गं लोकमेति । प्रजां तु न विन्दते ॥ साऽब्रवीदिडा मनुम् ॥ तथा वा अहं तवाग्निमाधास्यामि । यथा प्र प्रजया पशुभिर्मिथुनैर्जनिष्यसे । (६) प्रत्यस्मिँल्लोके

(३७) अह्न्यपि विशेषं विधत्ते—(अर्धोदित इति-) लोक्यतेऽवगम्यत इति व्युत्पत्त्या लोकशब्दः कालपरः । अर्धोदयकाले प्रजानां सृष्टत्वात्तत्राऽऽधानं प्रजार्थं भवति । अपि चोदयस्यासंपूर्णत्वात् भूतम् अतीतं रात्रिरूपं न भविष्यन् आगाम्यहः च इत्युभयं प्राप्तं भवति ॥

(३८) अथाऽऽधानस्थानामग्नीनां क्रमं निर्णेतुमाहवनीयस्य प्राथम्यं निराचष्टे—(इडान्मसेति-) इडा नाम गोरूपा काचिद्देवता । सा च [मानवी] मनुसंबन्धिनी । तत्संबन्धश्च 'मानवी घृतपदी मैत्रावरुणी' इतीडोपाह्वानस्य मन्त्रे समाम्नातः—"मानवीत्याह मनुर्ह्येतामग्रेऽपश्यत्" इति । सा चेडा यज्ञानूकाशिनी यज्ञतत्त्वप्रकाशनसमर्था आसीत् । सा कदाचिदसुराणामग्न्याधानवार्तां श्रुत्वा द्रष्टुं गता । दृष्ट्वा मनोः पार्श्वं समागत्येदमुवाच—असुराः प्रथमं पूर्वदिगवस्थितमाहवनीयमाधाय ततः पश्चिमदिगवस्थितं गार्हपत्यमाधाय दक्षिणदिगवस्थितमन्वाहार्यपचनं चाऽऽहितवन्तः । तथा चाऽऽधानयुक्तेन केनचित्कालं धनिका भूत्वा पश्चाद्विनाशं प्राप्स्यन्ति । एतेषां पश्चिमाग्निमुख्यत्वेन प्रवृत्तत्वात् एषां श्रीः अपि प्रतीची प्रतिकूलगमना सती तेभ्योऽसुरेभ्यो निर्गच्छत् इति । अतोऽसुरवदिदानीन्तनस्याऽऽहिताग्नेरप्यन्ते पराभवो भवति ॥

(३९) अथान्वाहार्यपचनस्य प्राथम्यं निराचष्टे—(सेति-) पूर्ववद्व्याख्येयम् । अत्र गार्हपत्यादूर्ध्वं प्राङ्मुखप्रवृत्तत्वात् श्रीः अपि प्राची प्राप्ता । प्रकृष्टं पूर्वदिगवस्थितं स्वर्गमग्रतः गच्छतीति प्राची । तस्माद्देवाः स्वर्गं प्राप्स्यन्ति किं तु प्रजाहेतोर्गार्हपत्यस्य पूर्वमाधानाभावात् प्रजां न लप्स्यन्ते । एवं तादृगाधानकर्तर्यपि द्रष्टव्यम् ॥

(४०) अथ गार्हपत्यस्य प्राथम्यं विधत्ते—(साऽब्रवीदिति-) गार्हपत्यस्य [illegible] [illegible] । [illegible] [illegible] [illegible] ॥

१ तै. सं. २.६.७. । २ '[illegible]' इत्यधिकः पाठः । ३ '[illegible]' इति पाठः ।

स्थास्यसि । अभि सुवर्गं लोकं जेष्यसीति । गार्हपत्यमग्र आदधात् । गार्हपत्यं वा अनु प्रजाः पशवः प्रजायन्ते । गार्हपत्येनैवास्मै प्रजां पशून्प्राजनयत् । अथान्वाहार्यपचनम् । तिर्यङ्ङिव वा अयं लोकः । अस्मिन्नेव तेन लोके प्रत्यतिष्ठत् । अथाऽऽहवनीयम् । तेनैव सुवर्गं लोकमभ्यजयत् । (७) यस्यैवमग्निराधीयते । प्र प्रजया पशुभिर्मिथुनैर्जायते । प्रत्यस्मिँल्लोके तिष्ठति । अभि सुवर्गं लोकं जयति ॥ यस्य वा अयथादेवतमग्निराधीयते । आ देवताभ्यो वृश्च्यते । पापीयान्भवति । यस्य यथादेवतम् । न देवताभ्य आ वृश्च्यते । वसीयान्भवति—भृगूणां त्वाऽङ्गिरसां व्रतपते व्रतेनाऽऽदधामीति भृग्वङ्गिरसामादध्यात् । आदित्यानां त्वा देवानां व्रतपते व्रतेनाऽऽदधामीत्यन्यासां ब्राह्मणीनां प्रजानाम् । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनाऽऽदधामीति राज्ञः । इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनाऽऽदधामीति राजन्यस्य । मनोस्त्वा ग्रामण्यो व्रतपते व्रतेनाऽऽदधामीति वैश्यस्य । ऋभूणां त्वा देवानां व्रतपते व्रतेनाऽऽदधामीति रथकारस्य—यथादेवतमग्निराधीयते । न देवताभ्य आवृश्च्यते । वसीयान्भवति (८) ॥

ध्यायति रात्रिश्चावरुन्द्धे भविष्यन्तीत्यब्रवीज्जनिष्यसेऽजयद्वसीयान्भवति नव च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

---

(४१) अथाधिकारिभेदेनाऽऽधानमन्त्रविशेषान्विधत्ते—(**यस्येति-**)**यस्य** पुरुषस्य याऽभिमानिनी देवता तामनतिक्रम्याऽऽधानं तस्य पुरुषस्य **यथादेवतम्** इत्युच्यते । तदतिक्रमे सति देवताद्रोहो दारिद्र्यं च भवति । अनतिक्रमे तु देवताप्रसादो धनसंपत्तिश्च भवति । ये मनुष्या भृगुगोत्रोत्पन्ना ये चाङ्गिरोगोत्रोत्पन्नास्तेषामुभयेषां तत्प्रतिपादकेन **भृगूणाम् इति** मन्त्रेणाऽऽधानम् । हे **व्रतपते !** कर्मस्वामिन्नग्ने ! **भृगूणामङ्गिरसां** च संबन्धिना **व्रतेन** कर्मविशेषेण निमित्तभूतेन त्वाम् **आदधामि** इहाऽऽयतने स्थापयामीति मन्त्रार्थः । एवमुत्तरत्रापि योज्यम् । गोत्रान्तरगतानां ब्राह्मणानामादित्या एव देवताः ॥ अभिषिक्तस्य राज्ञो वरुणो देवता ॥ इतरस्य क्षत्रियस्येन्द्रो देवता ॥ **इन्द्रियेण व्रतेन** इन्द्रियाभिवृद्धिहेतुना कर्मणेत्यर्थः । वैश्यस्य ग्रामनिर्वाहको मनुर्देवता ॥ रथकारोऽनुलोमजः संकीर्णजातिः । तस्य ऋभवो देवता ॥ एतैर्मन्त्रैः **यथादेवतम्** आधानं संपद्यते ॥

अत्र **मीमांसा** । षष्ठाध्यायस्य प्रथमपादे चिन्तितम् । "विप्रादिरेव रथकृदन्यो वाऽऽद्योऽस्तु योगतः । रूढेर्वर्णान्तरं तस्याऽऽधाने वर्षर्तुरुच्यते" ॥ आधाने श्रूयते—"वर्षासु रथकार आदधीत" इति । तत्र रथं करोतीति व्युत्पत्त्या त्रैवर्णिको रथकार इति चेत् । नैवम् । संकीर्णजातिविशेषे रूढत्वात् । वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः । शूद्रायां वैश्यादुत्पन्ना करिणी तस्यां करिण्यां माहिष्यादुत्पन्नो रथकारः । तथा च याज्ञवल्क्यः—"माहिष्येण करिण्यां तु रथकारः प्रजायते" इति । तस्य च रथकारस्याऽऽधानकालो वर्षर्तुः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

---

१ जै. न्या. मा. ६. १. १२. । २ 'करणी' इति पाठः । ३ 'करण्याम्' इति पाठः ।
४ 'करण्याम्' इति पाठः । ५ क्वचिच्च 'च' इति नास्ति ।

अथ प्रथमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः ।

[४२]प्रजापतिर्वाचः सत्यमपश्यत् । तेनाग्निमाधत्त । तेन वै स आर्ध्नोत् । भूर्भुवः सुवरित्याह । एतद्वै वाचः सत्यम् । य एतेनाग्निमाधत्ते । ऋध्नोत्येव । अथो सत्यप्राशूरेव भवति । अथो य एवं विद्वानभिचरति । स्तृणुत एवैनम् । (१) [४३]भूरित्याह । प्रजा एव तद्यजमानः सृजते । भुव इत्याह । अस्मिन्नेव लोके प्रतितिष्ठति । सुवरित्याह । सुवर्गे एव लोके प्रतितिष्ठति । [४४]त्रिभिरक्षरैर्गार्हपत्यमादधाति । त्रय इमे लोकाः । एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते । सर्वैः पञ्चभिराहवनीयम् । (२) सुवर्गाय वा एष लोकायाऽधीयते । यदाहवनीयः । सुवर्ग एवास्मै लोके वाचः सत्यꣳ सर्वमाप्नोति । [४५]त्रिभिर्गार्हपत्यमादधाति । पञ्चभिराहवनीयम् । अष्टौ संपद्यन्ते । अष्टाक्षरा गायत्री । गायत्रोऽग्निः । यावानेवाग्निः । तमाधत्ते । (३) [४६]प्रजापतिः प्रजा असृजत । ता अस्मात्सृष्टाः पराचीरायन् । ताभ्यो ज्योतिरुदगृह्णात् । तं ज्योतिः पश्यन्तीः प्रजा अभिसमावर्तन्त । उपरीवाग्निमुद्गृह्णीयादुद्धरन् । ज्योतिरेव पश्यन्तीः प्रजा यज-

---

(४२) चतुर्थे त्रयाणामाहवनीयादीनामाधानमुक्तम् । पञ्चमे तत्रैव कंचिद्विशेषं पवमानहवींषि चाभिधत्ते । तत्राऽऽदौ व्याहृतिमन्त्रान्विधत्ते—(प्रजापतिरिति-) वाचः संबन्धि यत् सत्यम् अवश्यंभाविफलसाधनं मन्त्ररूपं तच्छास्त्रमुखेन(ण) दृष्ट्वा प्रजापतिः तेन अग्निमाधाय समृद्धोऽभूत् । किं तत्सत्यमिति पृच्छद्भ्यः शिष्येभ्यो भूर्भुवः सुवरिति मन्त्रस्वरूपं प्राह । एतस्य वाक्संबन्धिसत्यत्वात् एतेनाग्निम् आदधानः समृद्धो भवति । अपि चासौ सत्यप्राशूर्भवत्येव । प्रकर्षेणाश्यते व्याप्यतेऽभिमतमनेनेति प्राशूः । पराक्रमः सत्यः । कदाचिदप्यविसंवादी प्राशूः । अपि च एवं व्याहृतिमहिमानं विद्वान् शत्रुं मारयितुमभिचरन् एनं हिनस्त्येव ॥

(४३) सामर्थ्यप्रदर्शनेन व्याहृतित्रयं प्रशंसति—(भूरिति-) योऽयं भूरिति मन्त्रमुच्चारयत्यसौ तन्मन्त्रसामर्थ्येन प्रजाः पुत्रपौत्रादिका उत्पादयति । एवमुत्तरयोरपि योज्यम् ॥

(४४) सामान्येन विहितं व्याहृतित्रयं पुनर्विशेषाकारेण विधत्ते—(त्रिभिरिति-) भूर्भुव इत्येतानि त्र्यक्षराणि, तैराधीयमानस्त्रित्वसाम्याल्लोकत्रये प्रतिष्ठितोऽग्निराहितो भवति । भूर्भुवः सुवरिति पञ्चाक्षराणि, तैराधीयमानस्याऽऽहवनीयस्य स्वर्गाश्रयत्वात्स्वर्गे वाक्संबन्धि कृत्स्नं सत्यमसौ प्राप्नोति ॥

(४५) अथ त्रयं पञ्चकं च मिलित्वा प्रशंसति—(त्रिभिरिति-) अग्नेर्मुखजत्वेन गायत्रीसंबन्धित्वम् ।

(४६) उक्तं सूत्रकारेण—"गार्हपत्ये प्रणयनीयमाधायैध्ममादीपयति सिकताश्चोपयमनीरुपकल्पयते [illegible]" इति । तदेतद्विधत्ते—(प्रजापतिरिति-) प्रजापतिना सृष्टाः प्रजाः पराच्यः पुनरागमनरहिता यदा गतास्तदा प्रजापतिः ताभ्यो ज्योतिरुदगृह्णात् । अन्धकारे पलायमानानां प्रजानां दर्शनार्थं कंचिदग्निमूर्ध्वं धृतवान् । तत्र प्रजा ज्योतिः दृष्ट्वा तं प्रजापतिम् अभिलक्ष्य समागताः । अतो गार्हपत्यादाहवनीयं प्रणेतुमग्निमुपरीवेव गृह्णीयात् न त्वधो धारयेत् । तेन सर्वाः प्रजा ज्योतिः पश्यन्त्यो यजमानं समावर्तन्ते ॥

---

१ आप. श्रौ. सू. ५. १३. ३-८. । २ °ध्व प्रत्याकृत्ताः अ° इति पाठः । ३ °नं प्रतिसमा-
वर्तन्ते । इति पाठः ।

मानमभिसमावर्तन्ते । प्रजापतेरक्ष्यश्वयत् । तत्पराऽपतत् । तदश्वोऽभवत् । तदश्वस्याश्वत्वम् । (४) एष वै प्रजापतिः । यदग्निः । प्राजापत्योऽश्वः । यदश्वं पुरस्तान्नयति । स्वमेव चक्षुः पश्यन्प्रजापतिरनूदेति । वज्री वा एषः । यदश्वः । यदश्वं पुरस्तान्नयति । जातानेव भ्रातृव्यान्प्रणुदते । पुनरावर्तयति । (५) जनिष्यमाणानेव प्रतिनुदते । न्याहवनीयो गार्हपत्यमकामयत । नि गार्हपत्य आहवनीयम् । तौ विभाजं नाशक्नोत् । सोऽश्वः पूर्ववाड्भूत्वा । प्राञ्चं पूर्वमुदवहत् । तत्पूर्ववाहः पूर्ववाट्त्वम् । यदश्वं पुरस्तान्नयति । विभक्तिरेवैनयोः सा । अथो नानावीर्यावेवैनौ कुरुते । (६) यदुपर्युपरि शिरो हरेत् । प्राणा-

---

(४७) यदुक्तं सूत्रकारेण—"प्राञ्चोऽश्वप्रथमा अभिप्रव्रजन्ति"[1] इति । तदेतद्विधत्ते—(**प्रजापतेरिति-**) पुरा कदाचित् **प्रजापतेः अक्षि**गोलकं केनापि व्याधिनोच्छूनं भूत्वा भूमौ पतितं सदश्वरूपेणोदभूत् । अश्वयदयमिति व्युत्पत्त्या तस्य **अश्वनाम** संपन्नम् । **अग्निः** च प्रजापतिसृष्टत्वात्प्रजापतिरेव । **अश्वः** चोक्तरीत्या **प्राजापत्यः** । तस्मादाहवनीयं प्रति गच्छन् **अश्वं पुरस्तात्** नयेत् । तथा सति [**स्वमेव**] स्वकीयमेव **चक्षुः पश्यन्** प्रजापतिरूपोऽग्निः **अनुगच्छति** ॥

(४८) एतदेवाश्वस्य पुरोगमनं पुनः प्रशंसति—(**वज्री वेति-**) वज्रिवद्युद्धे[2] शत्रुविनाशहेतुत्वात् **अश्वः वज्री** । स च **पुरस्तात्** नीयमानो यजमानस्य पूर्वमुत्पन्नान् **भ्रातृव्यान्** विनाशयति । वज्रसमानदन्तोपेतत्वाद्वाऽस्य वज्रित्वम् । एतदेवाभिप्रेत्याग्निब्राह्मणे समाम्नातम्—"वज्री वा एष यदश्वो दद्भिरन्यतोदञ्चो भूयान्"[3] इति ॥

(४९) आहवनीयपर्यन्तं नीतस्याश्वस्य तेनैव पथा पुनरावृत्तिं विधत्ते—(**पुनरावर्तयतीति-**) आहवनीयात्पुनरावृत्त्या भविष्यतः शत्रून्प्रतिबध्नाति ॥

(५०) यदुक्तं सूत्रकारेण—"पूर्ववाडश्वो भवति"[4] इति । तदिदं विधत्ते—(**न्याहवनीय इति-**) पुरा कदाचित् **आहवनीयः गार्हपत्यं नितराम् अकामयत** गार्हपत्यधर्मं धृतवानित्यर्थः । **गार्हपत्यः** च **नितराम् आहवनीय**धर्मं धृतवान् । ततः **तौ** उभावग्नी संकीर्णधर्मतया प्रजापतिः **विभाजं** विभक्तुं **नाशक्नोत्** । ततस्तद्विभागाय स्वयं **पूर्ववाट्** अश्वो **भूत्वा** धर्मसांकर्यं परिहृत्य **प्राञ्चं** प्राग्देशनिवासयोग्यमाहवनीयं **पूर्वमुदवहत्** पूर्वदेशं प्रत्युद्धृत्य नीतवान् । पूर्ववाडित्यश्वविशेषः । सेनामध्य इतरेभ्योऽश्वेभ्यः पूर्वं वहतीति वा पूर्वस्मिन् वयस्यत्यन्तबाल्य एव वहतीति वा **पूर्ववाट्** । अतस्तादृशम् **अश्वम्** अत्र **पुरस्तात्** नयेत् । तस्य च विभागक्षमत्वात् **एनयोः** अग्न्योः **सैव विभक्तिः** विभागः संपद्यते । पूर्वदेशेऽवस्थित आहवनीयः पश्चिमदेशेऽवस्थितो गार्हपत्य इति विभागः । अपि च धर्मसांकर्यपरिहारादेनावुभावग्नी भिन्नवीर्यावेव करोति । पत्नीसंयाजहोमाधारत्वलक्षणं वीर्यं गार्हपत्यस्यैव । आग्नेयादिहविराधारत्वलक्षणमाहवनीयस्यैव ॥

(५१) यदुक्तं सूत्रकारेण—"नै कर्णदघ्नमत्युद्गृह्णाति"[5] इति । तदिदं विधत्ते—(**यदुपर्युपरीति-**) हस्तेनोद्धृत्याऽऽहवनीयं प्रति नीयमानमग्निं **शिर उपर्युपरि** शिरःसमीपवर्तिन्यूर्ध्वभागे धृत्वा यदि **हरेत्** तदा प्राणा विच्छियेरन् । अतः प्राणरक्षणाय शिरसः समीपवर्तिन्यधःप्रदेशे धृत्वा नयेत् ॥

---

१ आप. श्रौ. सू. ५. १४. ५. । २ °वज्रवधु°–पाठः । ३ तै. सं. ५. १. २. । ४ आप. श्रौ. सू. ५. १४. १७. । ५ आप. श्रौ. सू. ५. १४. ८. ।

पति । पुनात्येवैनम् । यद्ग्नयें पावकार्य । पूत एवास्मिन्नन्नाद्यं दधाति । यद्ग्नये शुर्चये । ब्रह्मवर्चसमेवास्मिन्नुपरिष्टाद्दधाति । (१०)

पुनमाहवनीयं धत्तेऽधर्त्वं वर्तयति कुरुत इतिं रुद्रो दंधाति यद्ग्नये शुर्चय एकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अत्र मीमांसा—तृतीयाध्यायस्य षष्ठपादे चिन्तितम्—"संस्कृते पवमानेष्ट्या वह्नौ सेष्टिर्न वेष्टयः । वह्नौ तत्संस्कृते कार्याश्चोदकस्यानुरोधतः ॥ चोदकः पवमानेष्टौ न तां प्रापयितुं प्रभुः । अनङ्गत्वेष्ट्यसिद्धिभ्यामिष्टयस्तदसंस्कृते" ॥ पवमानादीष्टिभिराहवनीयाद्यग्नयः संस्क्रियन्ते । संस्कृतेष्वग्निहोत्रदर्शपूर्णमासादिकतवः प्रवर्तन्ते । तथा सति—विमताः पवमानेष्टयस्ताभिरिष्टिभिः संस्कृते वह्नौ कर्तव्याः, इष्टित्वात् । इतरेष्टिवत्—। चोदकोऽप्येवं सत्यनुगृहीतो भवति । एताभिरिष्टिभिः संस्कृते वह्नौ प्रकृत्यनुष्ठानात्—इति प्राप्ते ब्रूमः—यद्यपि पवमानेष्टिर्विकृतिस्तथाऽपि चोदको न तस्यां पवमानेष्टौ तां पवमानेष्टिमतिदेष्टुं प्रभवति । प्रकृतौ प्रयाजादिवत्पवमानेष्टेरङ्गत्वाभावात् । किं च 'एतस्याः पवमानेष्टेः संस्कृताग्निसिद्ध्यर्थं पवमानेष्ट्यन्तराङ्गीकारे तत्रापि तथा' इत्यनवस्थायामिष्टिरेव न सिध्येत् । तस्मात्ताभिरिष्टिभिरसंस्कृते वह्नौ पवमानेष्टयः कर्तव्याः ।

दशमाध्यायस्य द्वितीयपादे चिन्तितं—"लुप्यते पवमानेष्टौ निर्वापः क्रियतेऽथवा । लुप्यते साधनाभावात्तेन मुख्यो न लुप्यते" ॥ आधानप्रकरणाम्नातायां पवमानेष्टौ निर्वापसाधनं नास्ति । **अग्निहोत्रहवणी** हि प्रकृतौ निर्वापसाधनम् । सा चाऽऽधानकाले न संभवति । अग्निहोत्रस्याऽऽधानोत्तरकालीनत्वेन तद्धोमसाधनभूताया-स्तस्या अपि तथात्वादिति प्राप्ते ब्रूमः—मुख्यो निर्वापः । तं प्रति गुणभूताऽग्निहोत्रहवणी । न हि गुणलोपेन मुख्यो लोप्तुमर्हति । किंचाऽऽधानकाले स्वरूपेणाविद्यमानाया अग्निहोत्रहवण्याः साधनत्वं दुर्गमेतम् । ततः साधनाभावादित्यनुपन्यासः । तस्मान्निर्वापो न लुप्यते ।

पञ्चमाध्यायस्य तृतीयपादे चिन्तितम्—"आहिते पवमानेष्टिसंस्कृते वाऽग्निहोत्रकम् । [illegible] स्तन्मात्रे कर्म संभवेत् ॥ आधानस्यानपेक्षस्य नाग्न्युत्पादकता मता । [illegible]" ॥ अग्न्याधानादूर्ध्वं विलम्ब्य पवमानेष्टयः क्रियन्ते । "द्वादशसु रात्रिषु [illegible]" [illegible] । [illegible] द्वादशसु दिनेष्वग्निहोत्रमनुष्ठेयम् । आधानमात्रेणाऽऽहवनीयादयो[illegible] [illegible]—[illegible] पवमानेष्टिनिरपेक्षेण नाऽऽहवनीयाद्यग्निरुत्पद्यते । अन्यथा पवमानेष्टि[illegible] । [illegible] । [illegible] नमुपजीव्य तस्मादुत्तरकाले विधानात् । तत इष्टिभिः [illegible] [illegible] पश्चादग्निहोत्रानुष्ठानम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय[illegible] प्रथमकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

---

१ तै. सा. सा. ३. ६. ६. । २ तै. सा. [illegible] । ३ [illegible] । ४ [illegible] । ५ [illegible] । ६ [illegible] । ७ [illegible] सा. ५. ३. ९. । ८ [illegible] ।

अथ प्रथमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः ।

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नौ वामं वसु संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तदग्निर्नोत्सहमशक्नोत् । तत्त्रेधा विन्यदधात् । पशुषु तृतीयम् । अप्सु तृतीयम् । आदित्ये तृतीयम् । (१) तद्देवा विजित्य । पुनरवारुरुत्सन्त । तेऽग्नये पवमानाय पुरोडाशमष्टाकपालं निरवपन् । पशवो वा अग्निः पवमानः । यदेव पशुष्वासीत् । तत्तेनावारुन्धत । तेऽग्नये पावकाय । आपो वा अग्निः पावकः । यदेवाप्स्वासीत् । तत्तेनावारुन्धत । (२) तेऽग्नये शुचये । असौ वा आदित्योऽग्निः शुचिः । यदेवाऽऽदित्य आसीत् । तत्तेनावारुन्धत । ब्रह्मवादिनो वदन्ति । तनुवो वा एता अग्न्याधेयस्य । आग्नेयो वा अष्टाकपालोऽग्न्याधेयमिति । यत्तं निर्वपेत् । नैतानि । यथाऽऽत्मा स्यात् । (३) नाङ्गानि । तादृगेव तत् । यदेतानि निर्वपेत् । न तम् । यथाऽङ्गानि स्युः । नाऽऽत्मा । तादृगेव तत् । उभयानि सह निरुप्याणि । यज्ञस्य सात्मत्वाय । उभयं वा एतस्येन्द्रियं वीर्य-

माप्यते । (४) यो॑ऽग्निमा॑धत्ते । ऐ॒न्द्रा॒ग्नमेका॑दशकपाल॒मनु॒निर्व॑पेत् । आ॒दि॒त्यं च॒रुम् । इ॒न्द्रा॒ग्नी वै दे॒वाना॒मया॑तयामानौ । ये ए॒व दे॒वते॒ अया॑तयाम्नी । ताभ्या॑मे॒वास्मा॑ इन्द्रि॒यं वी॒र्य॑मव॑रुन्धे । आ॒दि॒त्यो भ॑वति । इ॒यं वा अदि॑तिः । अ॒स्यामे॒व प्रति॑तिष्ठति । [1]धे॒न्वै वा ए॒तद्रेतः॑ । (५) यदाज्य॑म् । अ॒न॒डुह॑स्त॒ण्डु॒लाः । मि॒थु॒नमे॒वाव॑रुन्धे । घृ॒ते भ॑वति । य॒ज्ञस्या॒ल॑क्षान्तत्वाय । [2]च॒त्वार॒ आर्षे॑याः प्राश्ञ॑न्ति । दि॒शामे॒व ज्योति॑षि जुहोति । [3]प॒श॒वो वा ए॒तानि॑ ह॒वीꣳषि॑ । ए॒ष रु॒द्रः । यद॒ग्निः । (६) यत्स॒द्य ए॒तानि॑ ह॒वीꣳषि॑ नि॒र्वपे॑त् । रु॒द्राय॑ प॒शू॒नपि॑ दध्यात् । अ॒प॒शुर्यज॑मानः स्यात् । यन्नानु॑नि॒र्वपे॑त् । अन॑वरुद्धा अस्य प॒शवः॑ स्युः । द्वा॒द॒शसु॒ रात्री॒ष्वनु॒निर्व॑पेत् । सं॒व॒त्स॒रप्र॑तिमा॒ वै द्वाद॑श॒ रात्र॑यः । सं॒व॒त्स॒रेणै॒वास्मै॑ रु॒द्रꣳ श॑मयि॒त्वा । प॒शूनव॑रुन्धे । यदेक॑मेकमे॒तानि॑ ह॒वीꣳषि॑ नि॒र्वपे॑त् । (७) यथा॒ त्रीण्या॒वप॑नानि पू॒रये॑त् । ता॒दृक्तत् । न प्र॒जन॑न॒मुच्छि॒ꣳ-

---

ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयताम्" इति । आदित्यचरुनिर्वापेण भूम्यां प्रतितिष्ठति । भूमेरखण्डनीयत्वेनादितित्वात् ॥

(६१) अस्य चरोः सहकारिद्रव्यं घृतं विधत्ते—(धेन्वै वेति-) आज्यस्य धेनुनि[illegible]त्वात्तद्रेतस्त्वम् । तण्डुलानां चानडुहाकृष्टायां भूमौ निष्पाद्यत्वात्तद्रेतस्त्वम् । अत उभयमेलनं सति मिथुनं संपद्यते । तत्[illegible]निष्पत्तये घृते तण्डुलाः प्रक्षेप्तव्याः । एतेन घृतेन यज्ञस्यालक्षान्तत्वं संपद्यते । [illegible] परुषः । तद्विपरीतोऽप्यलक्षः । तादृशोऽन्तः समीपवर्ती द्रव्यविशेषो यज्ञस्य सोऽयमलक्षान्त[illegible]न्तत्वं तत्सिद्धये घृतस्वीकारः ॥

(६२) यदुक्तं सूत्र[कारे]ण—"चतुर्धाकरणकाल आदित्यं ब्रह्मणे परिहरति [illegible]" इति । तदिदं विधत्ते—(चत्वार इति-) योऽयमादित्यश्चरु[illegible] [illegible] एवं सर्वं दत्त्वा चत्वार ऋत्विजः प्राश्नीयुः । तेषां श्रुताध्ययन[illegible] । [illegible]नम्—"आर्षेयो यः शुश्रुवान्" इति चतुःसंख्यासाम्येन दिशां [illegible] ॥

(६३) उक्तानां हविषां कालविशेषं विधत्ते—(पशव इति-) [illegible] आदित्यान्तानि किम् एतानि हवींषि निर्वपेदिति [illegible] । [illegible] पशुसाधनत्वेन पशुरूपत्वात् । आदित्यस्य [illegible] अपशुः स्यात् । अनिर्वापपक्षे तु पशवो न संपादिताः स्युः । [illegible] द्वादशसु रात्रीषु गतासु पश्चादपि निर्वपेत् । [illegible] संवत्सरेणैव [illegible] पशून् आप्नोति ॥

(६४) [illegible]—(यदेकमेकमेतानीति-) एतानि [illegible] निर्वपेत् इति [illegible] यथा [illegible] [illegible] प्रथमम् [illegible] निरुप्य [illegible] पेत् । [illegible]

[1] [illegible] । [2] [illegible] । [3] [illegible] ।
[illegible]

पेत्। एकं निरुप्यं। उत्तरे समस्येत्। तृतीयमेवास्मै लोकमुच्छिꣳषति प्रजननाय। तं प्रजया पशुभिरनुप्रजायते। अथो यज्ञस्यैवैषाऽभिक्रान्तिः। रथचक्रं प्रवर्तयति। मनुष्यरथेनैव देवरथं प्रत्यवरोहति। ब्रह्मवादिनो वदन्ति। होतव्यमग्निहोत्रा३ं न होतव्या३मिति। यद्यजुषा जुहुयात्। अयथापूर्वमाहुती जुहुयात्। यन्न जुहुयात्। अग्निः पराभवेत्। तूष्णीमेव होतव्यम्। यथापूर्वमाहुती जुहोति। नाग्निः पराभवति। अग्नीधे ददाति। (९) अग्निमुखानेवर्तून्प्रीणाति। उपबर्हणं ददाति। रूपाणामवरुद्ध्यै। अश्वं ब्रह्मणे। इन्द्रियमेवावरुन्द्धे। धेनुꣳ

ततस्तं लोकमनु यजमानः प्रजापशुसमृद्धो भवति। अपि च यत्तृतीयलोकावशेषणमेषा **यज्ञस्यैषाभिक्रान्तिः** अभितो व्याप्तिः। प्रजापशुरूपस्य तत्फलस्य निष्पन्नत्वात् ॥

(६५) यदुक्तं सूत्रकारेण—"प्राञ्चोऽश्वप्रथमा अभिप्रव्रजन्ति दक्षिणतो ब्रह्मा रथं रथचक्रं वा प्रवर्तयति यावच्चक्रं त्रिः परिवर्तते"[1] इति। तदेतद्विधत्ते—(**रथचक्रमिति**–) गार्हपत्यादाहवनीयं प्रत्यग्नेः प्रणयनकाले **रथचक्रस्य प्रवर्तनम्**। अनेन **मनुष्यरथ**प्रवर्तनेन नीयमानाग्न्यर्थं **देवरथ एव** प्रवर्तितो भवति ॥

(६६) अथ मीमांसामुखेन होमनिर्णयं करोति—(**ब्रह्मवादिन इति**–) नेयं नित्याग्निहोत्रविषया मीमांसा। तस्य पवमानेष्टिभ्य ऊर्ध्वं प्रवर्तयिष्यमाणत्वात् किंत्वाधानाङ्गमेतत्किंचित्कर्म। "पूर्णाहुतेः प्राक्प्रवर्तमानत्वात्। पूर्णाहुत्यन्तमग्न्याधेयम्"[2] इत्याश्वलायनेनोक्तम्। अस्य चाऽऽधानाङ्गस्याग्निहोत्रस्य मन्त्रेण होमे सत्ययथापूर्वत्वं प्रसज्येत। तथा हि। अग्निहोत्रशब्दोऽत्र नित्याग्निहोत्रधर्मानतिदिशति। नित्याग्निहोत्रे च—"सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा"[3] इति। अयमहनि पठितो होममन्त्रः सोऽत्र प्रसक्तः। अहन्येव हूयमानत्वात्। प्रकृतिभूते त्वग्निहोत्रे रात्रावेवोपक्रमात्। "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा"[4] इति मन्त्रस्य रात्रिहोमाङ्गत्वात्तेन मन्त्रेण प्रथममनुष्ठाय पश्चात्प्रातःकाले "सूर्यो ज्योतिः"[5] इति मन्त्रेणानुष्ठानमित्येष क्रमः। इह त्वादावेव "सूर्यो ज्योतिः"[6] इति मन्त्रेणानुष्ठाने प्रकृतिवैलक्षण्यादयथापूर्वत्वम्। अहोमपक्षे त्वाधानेनोत्पन्नः **अग्निः** आहाराभावात् **पराभूतो भवेत्**। अतो दोषद्वयं परिहर्तुं मन्त्रं परित्यज्य **तूष्णीमेव होतव्यम्**। तथा सति मन्त्रवैपरीत्याभावादयथापूर्वत्वदोषो न भवति। होमस्यानुष्ठितत्वादग्नेः पराभवोऽपि न भवति ॥

(६७) यदुक्तं सूत्रकारेण—"आग्नेयस्य दक्षिणाकाले दक्षिणां ददात्यजं पूर्णपात्रमुपबर्हणꣳसार्वसूत्रमित्यग्नीध उपबर्हणं दद्यादश्वं ब्रह्मणेऽध्वर्यवे वाऽऽहवनीयदेशेऽनड्वाहमध्वर्यवेऽपरेण गार्हपत्यं धेनुꣳ होत्रे वासो गावौ मिथुनौ गावौ नवं च रथं ददाति तानि साधारणानि सर्वेषामा द्वादशभ्यो ददातीत्युक्त्वाऽऽह काममूर्ध्वं देयमपरिमितस्यावरुद्ध्या इति विज्ञायते ऊर्ध्वमादिष्टदक्षिणाभ्यो वदति षड्देया द्वादश देयाश्चतुर्विंशतिर्देया इति ता विकल्प्यन्ते"[7] इति। तदेतत्सर्वं क्रमेण विधत्ते—(**अग्नीध इति**–) आग्नीध्रेण तत्तद्दतावग्नेरिष्यमाणत्वात्तस्मै दत्तेन द्रव्येणाग्निसहितानामृतूनां प्रीतिः तस्मै यद्देयम् **उपबर्हणं** शिरसः पृष्ठस्य वाऽऽधारभूतं तस्य कार्पासशाणोर्णादिमयैः शुक्लनीलपीतादिवर्णैः सर्वैः सूत्रैर्निष्पन्नत्वात्तेन **रूपाणां** प्राप्तिः। अश्वस्य प्रजापतिचक्षुर्जन्यत्वात्तेनेन्द्रियप्राप्तिः। दातव्याया धेनोः कामधेनुरूपत्वादाशिषां प्राप्तिः। **अनड्वान्**शकटं वहति। **अग्निश्च** हव्यं वहति। **अध्वर्यु**रप्यनुष्ठानं वहति। ततः समानत्वाद्बलीवर्दरूपेणाध्वर्युरूपेण च **वह्निनैव यज्ञस्य** वह्नियज्ञ-

१ आप. श्रौ. सू. ५. १४. ५–६.। २ आश्व. श्रौ. सू. २. १.। ३ तै. ब्रा. २. १. २.। ४ तै. ब्रा. २. १. २.। ५ तै. ब्रा. २. १. २.। ६ तै. ब्रा. २. १. २.। ७ आप. श्रौ. सू. ५. २०.। ८ द्रव्यं व° इति पाठः.।

होत्रे । आशिषं एवावरुन्द्धे । अनड्वाहमध्वर्यवे । वह्निर्वा अनड्वान् । वह्निरध्वर्युः । (१०) वह्निनैव वह्नियज्ञस्यावरुन्द्धे । मिथुनौ गावौ ददाति । मिथुनस्यावरुद्ध्यै । वासो ददाति । सर्वदेवत्यं वै वासः । सर्वा एव देवताः प्रीणाति । आ द्वादशभ्यो ददाति । द्वादश मासाः संवत्सरः । संवत्सर एव प्रतितिष्ठति । काममूर्ध्वं देयम् । अपरिमितस्यावरुद्ध्यै । (११)

आदित्ये तृतीयमुप्स्यासीत्तेनावारुन्धत स्यादाप्यते रेतोऽग्निरेकमेतानि हवीꣳषि निर्वपेत्प्रत्यवरोहति ददात्यध्वर्युर्देयमेकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

संबन्धिहविर्वाहनमग्निं प्राप्नोति । गोमिथुनेन मनुष्यमिथुनप्राप्तिः । वाससः सर्वदेवत्यत्वं दीक्षाप्रकरणे—"अग्नेस्तूपाधानं वायोर्वातपानम्" इत्यादिवाक्येन प्रतिपादितम् । आ द्वादशभ्यो गोभ्य इति शेषः । उक्तदक्षिणाभ्य ऊर्ध्वम्—"षड् देया द्वादश देयाः" इत्यादिशाखान्तरोक्तं बहुपक्षानुसारेण स्वाभिमतं यावत्तावद्देयम् । तेनापरिमितफलप्राप्तिः ।

अत्र मीमांसा । एकादशाध्यायस्य चतुर्थपादे चिन्तितम्—"पवमानेष्टिहविषां तन्त्रं भेदोऽथ वाऽग्रिमः । साध्यदेशाद्यभेदेन काम्ये भेदोक्तितोऽन्तिमः ॥ आधानप्रकरणे पठ्यते—"अग्नये पवमानायाष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये" इति । तैरेतैर्हविर्भिः साध्यस्याग्नेरेकत्वाद्देशाद्यभेदाच्चाङ्गानां तन्त्रमिति प्राप्ते ब्रूमः—"यः कामयेतोत्तरं वसीयाञ्छ्रेयान्स्यामिति तस्याग्नये पवमानाय निरुप्याथ पावकाय शुचये चोत्तरे हविषी समानबर्हिषि निर्वपेत्" इति वचनात्काम्यप्रयोगे प्रथमस्य हविषोऽङ्गभेदः । उत्तरयोस्तन्त्रम् । नित्यप्रयोगे तु त्रयाणां तन्त्रम् ।

द्वादशाध्यायस्य चतुर्थपादे चिन्तितम्—"एका देया समुच्चेयं विकल्प्यं वाऽऽद्य आनतेः । सौलभ्यादन्तिमो नैरपेक्ष्यात्संख्यान्तरादपि" ॥ आधाने श्रूयते—"एका देया षड् देया द्वादश देयाः" इत्यादि । तत्र सोमक्रयन्यायेनाऽऽनतेः सौलभ्यात्समुच्चय इति चेत् । मैवम् । संख्यानां व्रीह्यादिवत्परस्परनैरपेक्ष्यावगमात् । समुच्चये तु श्रूयमाणाभिः संख्याभिः संख्यान्तरस्य दुर्वारत्वाच्च । तस्माद्विकल्पः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

---

१ तै. सं. ६. १. १. । २ आप. श्रौ. सू. ५. २०. १३. । ३ जै. न्या. मा. ११. ४. ४. ४. । ४ तै. सं. २. २. ४. । ५ आप. श्रौ. सू. ५. २१. ७. । ६ जै. न्या. १२. ४. ६. । ७ आप. श्रौ. सू. ५. २०. १३. । ८ 'तु' इति कुत्रचिन्नास्ति ।

अथ प्रथमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ।

घर्मः शिरस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । छर्दिस्तोकाय तनयाय यच्छ । वातः प्राणस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । स्वदितं तोकाय तनयाय पितुं पच । प्राचीमनु प्रदिशं प्रेहि विद्वान् । अग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो विभाहि । ऊर्जं नो धेहि द्विपदे चतुष्पदे (१) अर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः । शुक्रं ज्योतिरजस्रम् । तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाग्ने ब्रह्मणा । आनशे व्यानशे सर्वमायुर्व्यानशे । ये ते अग्ने शिवे तनुवौ । विराट् च स्वराट् च । ते मा विशतां ते मा जिन्वताम् (२) ये ते अग्ने

शिवे तनुवौ । सम्राट् चाभिभूश्च । ते मा विंशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । विभूश्च परिभूश्च । ते मा विंशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । प्रभ्वी च प्रभूतिश्च । ते मा विंशतां ते मा जिन्वताम् । यास्ते अग्ने शिवास्तनुवः । ताभिस्त्वाऽऽदधे । यास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ (३) ॥

चतुष्पदे जिन्वतां तनुवस्त्रीणि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

अथ प्रथमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।

इमे वा एते लोका अग्नयः । ते यदव्यावृत्ता आधीयेरन् । शोचयेयुर्यजमानम् । घर्मः शिर इति गार्हपत्यमादधाति । वातः प्राण इत्यन्वाहार्यपचनम् । अर्कश्चक्षुरित्याहवनीयम् । तेनैवैनान्व्यावर्तयति । तथा न शोचयन्ति यजमानम् । रथन्तरमभिगायते गार्हपत्य आधीयमाने । राथन्तरो वा अयं लोकः । (१) अस्मिन्नेवैनं लोके प्रतिष्ठितमाधत्ते । वामदेव्यमभिगायत उद्ध्रियमाणे । अन्तरिक्षं वै वामदेव्यम् । अन्तरिक्ष एवैनं प्रतिष्ठितमाधत्ते । अथो

दिभिः प्रभृतिपर्यन्तैरष्टाभिः शब्दैरुक्ता अग्नेः शिवाः शान्तास्तनुवः । हेऽग्ने ! ते त्वदीये विराट्स्वराडाख्ये ये शान्ते तनू ते उभे मां प्रविश्य प्रीणयताम् । एवमुत्तरत्रापि । विविधं राजत इति **विराट्** । स्वयमेव राजत इति **स्वराट्** । सम्यग्राजत इति **सम्राट्** । वैरिणोऽभिभवति इति **अभिभूः** । विशिष्टेन रूपेण भवतीति **विभूः** । परितो भवतीति **परिभूः** । आज्ञालक्षणेन प्रभुत्वेन युक्ता **प्रभ्वी** । प्रकृष्टेनैश्वर्येणोपेता **प्रभूतिः** । हेऽग्ने ! या एतास्ते त्वदीयाः **शिवास्तनुवस्ताभिः** युक्तं त्वामिह **आदधे** ॥

(७४) **(यास्त इति-)** कल्पः—"यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छ इति यजमानो द्वेष्याय प्रहिणोति" इति । घोरतनवः क्षुत्तृष्णादिरूपाः । तथा चाऽऽरण्यकाण्डे समाम्नातम्—"यास्ते अग्ने घोरास्तनुवः क्षुच्च तृष्णा च" इत्यादि । **ताभिः** घोराभिः **तनुभिरमुं** शत्रुं **गच्छ** प्राप्नुहि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

(७५) आधानमन्त्राः सप्तमेऽभिहिताः । अष्टमे तद्ब्राह्मणमुच्यते । तत्र त्रीनाधानमन्त्रान्विनियुङ्क्ते— **(इमे वा इति-)** एते त्रयः **अग्नयः** त्रित्वसाम्यात् **इमे** त्रयो **लोका** भवन्ति । **ते** यदि परस्परम् **अव्यावृत्ताः** समुदिता **आधीयेरन्** तदा दाहाधिक्येन **यजमानं** संतापयेयुः । अतस्त्रिभिर्मन्त्रैः पृथगादध्यात् । तेन व्यावृत्ताः सन्तस्तापाधिक्याभावाद्यजमानं नैव संतापयन्ति ॥

(७६) अथाऽऽधानकाले सामगानं विधत्ते—**(रथन्तरमिति-)** "अभि त्वा शूर नोनुमः" इत्यस्यामृच्युत्पन्नं **'रथन्तरम्'** । "कया नश्चित्र आभुवत्" इत्यस्यामृच्युत्पन्नं **'वामदेव्यम्'** । "त्वामिद्धि हवामहे"

---

१ आप. श्रौ. सू. ५. १५. ३ । २ आ. श्रौ. सू. ५. २. ४ । ३-५ तै. सं. २. ४. ११. ४ तै. सं. २. ४. १४.

शान्तिर्वै वामदेव्यम् । शान्तमेवैनं पशव्यमुद्धरते । बृहदभिगायत आहवनीय आधीयमाने । वार्हतो वा असौ लोकः । अमुष्मिन्नेवैनं लोके प्रतिष्ठितमाधत्ते । प्रजापतिरग्निमसृजत । (२) सोऽश्वो वारो भूत्वा पराङैत् । तं वारवन्तीयेनावारयत । तद्वारवन्तीयस्य वारवन्तीयत्वम् । श्यैतेन श्येती अकुरुत । तच्छ्यैतस्य श्यैतत्वम् । यद्वारवन्तीयमभिगायते । वारयित्वैवैनं प्रतिष्ठितमाधत्ते । श्यैतेन श्येती कुरुते । घर्मः शिर इति गार्हपत्यमादधाति । सशीर्षाणमेवैनमाधत्ते । (३) उपैनमुत्तरो यज्ञो नमति । रुद्रो वा एषः । यदग्निः । स आधीयमान ईश्वरो यजमानस्य पशून्हिँसितोः । संप्रियः पशुभिर्भुवदित्याह । पशुभिरेवैनँ संप्रियं करोति । पशूनामहिँसायै । छर्दिस्तोकाय तनयाय यच्छेत्याह । आशिषमेवैतामाशास्ते । वातः प्राण इत्यन्वाहार्यपचनम् । (४) सप्राणमेवैनमाधत्ते । स्वदितं तोकाय तनयाय पितुं पचेत्याह । अन्नमेवास्मै स्वदयति । प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह । विभक्तिरेवैनयोः सा । अथो नानावीर्यावेवैनौ कुरुते । ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याह । आशिषमे-

---

इत्यस्यामृच्युत्पन्नं 'बृहत्' रथन्तरादीनां भूरादिलोकभोगहेतुत्वात्तल्लोकत्वम् । अत एतेषां गाने सति तत्तल्लोकेऽग्निः प्रतिष्ठितो भवति । अपि च वामदेव्यस्योपद्रवशान्तिकरत्वात्पशुप्राप्तिहेतुत्वाच्चैनमुद्धियमाणमग्निं शान्तं पशुसाधनं च कृत्वोद्धरति ॥

(७७) पुनरपि सामद्वयं विधत्ते—(**प्रजापतिरिति-**) यः प्रजापतिना सृष्टोऽग्निः **स वारः अश्वो भूत्वा** पुनरावृत्तिरहितः पलायनमकरोत् । यो हस्तद्वयेन खलिनं गृहीत्वा बलान्निवारणीयः स **वारः** तं वारमश्वं पलायमानं **वारवन्तीयेन** साम्ना प्रजापतिर्निवारयामास । "अश्वं नत्वा वारवन्तम्" इत्यस्यामृच्युत्पन्नं '**वारवन्तीयम्**' । निवारणहेतुत्वात्तस्य वारवन्तीयं नाम संपन्नम् । निवारितमश्वं श्यैतसाम्ना स्वाधीनं कृतवान्स्वाधीनं कृतवानित्यर्थः । "अभि प्र वः सुराधसम्" इत्यस्यामृच्युत्पन्नं **श्यैतम्** । स्वाधीनकरणहेतुत्वात्तस्य श्यैतनाम संपन्नम् । अतो वारवन्तीयसाम्ना पलायनं निवार्य प्रतिष्ठितमग्निमाधाय श्यैतगानेनाग्निं स्वाधीनं करोति ॥

(७८) आधानमन्त्रे शिरःशब्दतात्पर्यं दर्शयति—(**घर्मः शिर इति-**) अग्नेः शिरःसहितत्वे सति न्यूनत्वाभावादुत्तरो दर्शपूर्णमाससोमादिरेनं प्राप्नोति ॥

(७९) संप्रियशब्दतात्पर्यं दर्शयति—(**रुद्रो वा एष इति-**) आधीयमानस्याग्नेः क्रूरत्वेन पशून्हिंसितुं समर्थत्वादहिंसार्थं पशुभिः सह संप्रीतिं मन्त्रेण करोति ॥

(८०) यच्छेति पदस्याऽऽशीरर्थं दर्शयति—(**छर्दिरिति-**) ॥

(८१) प्राणशब्दस्य तात्पर्यं दर्शयति—(**वात इति-**) ॥

(८२) स्वदितपितुशब्दयोस्तात्पर्यं दर्शयति—(**स्वदितमिति-**) ॥

(८३) प्राचीं प्रेहीति पदद्वयस्य तात्पर्यं दर्शयति—(**प्राचीमिति-**) येयं प्राच्यां दिशि गतिरस्त्येषैवानयोराहवनीयगार्हपत्ययोर्विभागः । अपि च विभागे सति पृथक्स्थित्या द्वयोः पृथक्सामर्थ्यं भवति ॥

(८४) धेहीति पदस्याऽऽशीरर्थत्वं दर्शयति—(**ऊर्जं नो धेहीति-**) ॥

ेतामाशास्ते । अर्कश्चक्षुरित्याहवनीयम् । अर्को वै देवानामन्नम् । (५) अन्नमेवावरुन्द्धे । [८६]तेन मे दीदिहीत्याह । समिन्ध एवैनम् । [८७]आनशे व्यानश इति त्रिरुदिङ्गयति । त्रय इमे लोकाः । एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते । [८८]तत्तथा न कार्यम् । वीङ्गितमप्रतिष्ठितमादधीत । उद्धृत्यैवाऽऽधायाभिमन्त्र्यः । अवीङ्गितमेवैनं प्रतिष्ठितमाधत्ते । [८९]विराट् च स्वराट् च यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वाऽऽदध इत्याह । एता वा अग्नेः शिवास्तनुवः । ताभिरेवैनꣳ समर्धयति । [९०]यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छेति ब्रूयाद्यं द्विष्यात् । ताभिरेवैनं पराभावयति (६) ॥

लोकोऽसृजतैनमाधत्तेऽन्वाहार्यपचनं देवानामन्नमेनं प्रतिष्ठितमाधत्ते पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

---

(८५) अर्कशब्दस्य तात्पर्यं दर्शयति—(**अर्क इति**-) अर्चनीयत्वव्युत्पत्त्या देवानामन्नकारित्वादन्नप्राप्तिः ॥

(८६) दीदिहिशब्दस्य समिन्धनार्थत्वं दर्शयति—(**तेनेति**-) ॥

(८७) पूर्वपक्षहेतुत्वेन मन्त्रस्य कंचिद्विनियोगं दर्शयति—(**आनश इति**-) हस्ते धृतस्याग्नेस्त्रिवारमूर्ध्वचलनेन लोकत्रयप्रतिष्ठा ॥

(८८) तमेतं दूषयित्वा विनियोगान्तरं दर्शयति—(**तत्तथेति**-) त्रिरूर्ध्वचलनेन **वीङ्गितं** विविधं चालितम् **अप्रतिष्ठितम्** अग्निमाहितवान्भवेत् । तस्मात्तथोर्ध्वचलनं **न कार्यम्** । किं तु हस्ते सकृत् **उद्धृत्यैव** आयतने तमग्निम् **आधाय** पश्चात्सोऽग्निरनेन मन्त्रेण मन्त्रणीयः । तथा सति विविधचलनरहितं स्थिरत्वेन प्रतिष्ठितमग्निमाहितवान्भवति ॥

(८९) विराडादिशब्दानां तात्पर्यं दर्शयति—(**विराडिति**-) ॥

(९०) मन्त्रान्तरं विनियुङ्क्ते—(**यास्ते इति**-) **यं** पुरुषमसौ यजमानो **द्विष्यात्** तं प्रत्येतं मन्त्रं **ब्रूयात्** । तथा सति **ताभिरेव** घोराभिस्तनुभिः **एनं** द्वेष्यं विनाशयति ॥

अथ मीमांसा—दशमाध्यायस्याष्टमपादे चिन्तितम्—"उभयो ब्रह्मगानस्य निषेधो [illegible] । निन्दितो वा शत्रोऽपि वपोत्खेद इव स्तुतिः ॥ विध्यनन्वयतोऽस्तोत्रं ब्रह्मोद्गाता यथा [illegible] । [illegible]ऽत्र षोडशिग्रहवन्मतः" ॥ आधाने वामदेव्यादिसाम्नां गानानि विहितानि । आधाने [illegible]— "उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामानि गायति" इति । [illegible] सूते । वीता विगताः कार्यफलम्बमन्तरेण परित्यक्ता इत्यर्थः । अनया निन्दया ब्रह्मणः सामगाननिषेधं [illegible] । स निषेध उद्गातृविहितं वामदेव्यादिसामगानं स्तौति । ननु ब्रह्मणः सामगानमप्रसक्तम् । [illegible] नरसंभावितत्वाच्छशविषाणवत्तुच्छः । न हि वन्ध्यापुत्रो वा तद्धर्मो वा संभावयितुं शक्यते । तथा सति तादृशेन निषेधेन कथं स्तुतिरिति चेत् । वपोत्खेदवदिति ब्रूमः । स आत्मनो [illegible] संभावितलोपेन यथा प्राजापत्यस्य तूपरस्याजस्य विधिः स्तूयते [illegible] । [illegible] विधीनां स्तोतुं भवितुमर्हति । विधीनामनेकस्येन [illegible] । [illegible] वाक्यस्य [illegible] । [illegible] सूते । [illegible] विधिनिषेधाभ्यां [illegible] ॥

---

१ तै. ब्रा. ना. १०. ८. ६. । २ [illegible] । ३ [illegible] ।

अथ प्रथमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ।

[९१]शमीगर्भादग्निं मन्थति । एषा वा अग्नेर्यज्ञिया तनूः । तामेवास्मै जनयति । [९२]अदितिः पुत्रकामा । साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्या उच्छेषण-मददुः । तत्प्राऽऽश्नात् । सा रेतोऽधत्त । तस्यै धाता चार्यमा चाजायेताम् । सा द्वितीयमपचत् (१) । तस्या उच्छेषणमददुः । तत्प्राऽऽश्नात् । सा रेतोऽधत्त । तस्यै मित्रश्च वरुणश्चाजायेताम् । सा तृतीयमपचत् । तस्या उच्छेषणमददुः । तत्प्राऽऽश्नात् । सा रेतोऽधत्त । तस्या अꣳशश्च भगश्चाजाये-ताम् । सा चतुर्थमपचत् (२) । तस्या उच्छेषणमददुः । तत्प्राऽऽश्नात् । सा रेतोऽधत्त । तस्या इन्द्रश्च विवस्वाꣳश्चाजायेताम् । ब्रह्मौदनं पचति । रेत एव तद्दधाति । [९३]प्राश्नन्ति ब्राह्मणा ओदनम् । [९४]यदाज्यमुच्छिष्यते । तेन समि-

---

एकादशाध्यायस्य तृतीयपादे चिन्तितम्—"प्रतिकर्म पृथक्कार्यमाधानं यदि वा सकृत् । अन्याङ्ग-वत्पृथङ्नैवं स्वकालत्वसमत्वतः" ॥ 'वसन्ते ब्राह्मणोऽग्निमादधीत' इति विहितमाधानं प्रयाजादिव-त्प्रतिकर्म पृथक्कार्यमिति चेत्, मैवम् । आधानस्य स्वातन्त्र्येण वसन्तादिकाले विहिते तत्तत्कर्मकालेषु पृथग-नुष्ठानायोगात् । स्वकालेऽनुष्ठितस्य सर्वैः कर्मभिः संबन्धः समानः । न च प्रकरणेन विशेषो नियन्तुं शक्यः । आधानस्यानारभ्याधीतत्वात् । "आहवनीये जुहोति" इत्यादिवाक्येन त्वैष्टिकपाशुकसौमिकदार्विकहोमेषु संबन्धः साधारणः प्रतिपाद्यते । तस्मात्तन्त्रेणानुष्ठेयम् । यद्यप्याधानं नेष्ट्यादिकर्मणां साक्षादङ्गं तथाऽपि पृथ-क्फलाभावादाहवनीयादिद्वारा कर्मोपकारित्वाच्चाङ्गत्वमभ्युपेत्येयं चिन्ता ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

---

(९१) अष्टम आधानमन्त्रव्याख्यानमुक्तम् । अथ नवमे ब्रह्मौदनमुच्यते । तत्राऽऽदौ तावद्ब्रह्मौदना-त्पराचीनमाधानात्प्राचीनमग्निमन्थनमुच्यते । यदुक्तं सूत्रकारेण—"ब्राह्मौदनिकाद्भस्मापोह्य तस्मिञ्शमीगर्भा-दग्निं मन्थति" इति । तदिदं विधत्ते—(**शमीगर्भादिति-**) आधानदिनात्पूर्वेद्युर्ब्रह्मौदनं पक्त्वाऽपरेद्युरुदया-त्पूर्वं तस्माद्ब्राह्मौदनिकात् **अग्नेः** भस्मापोह्य तस्मिन्स्थाने शमीवृक्षस्य गर्भगतेनाश्वत्थेन निष्पादितामरणिमव-स्थाप्य **अग्निं** मन्थेत् । तस्मात् **शमीगर्भात्** उत्पन्ना याऽग्नेस्तनूरेषा यज्ञार्हाऽतः **तामेव जनयति** ॥

(९२) अथ ब्रह्मौदनं विधत्ते—(**अदितिरिति-**) ब्रह्माणं देवमुद्दिश्य होमार्थं ब्राह्मणानामृत्विजां प्राश-नार्थं च पच्यमान ओदनो **ब्रह्मौदनः**, तं कदाचित् **अदितिः** देवी **पुत्रकामा** सती **साध्येभ्यो देवेभ्यः** उत्पादनीयधात्रादिदेवार्थम् **अपचत्** । तदानीमृत्विजो होमं प्राशनं च कृत्वा शिष्टमोदनं **तस्या** अदित्यै प्रायच्छन् । सा च **तत्** उच्छेषणं **प्राद्य गर्भम् आधत्त** । तस्माद्गर्भाद्द्वादशादित्यानामादिभूतौ धाता चार्यमा चेत्युभावजायेताम् । एवमुत्तरेषु त्रिष्वपि पर्यायेषु योज्यम् । तस्मादाधित्सुः **ब्रह्मौदनं** पचेत् । तेन पुत्रोत्पा-दकं **रेत एव तद्धाति** ॥

(९३) ऋत्विजां प्राशनं विधत्ते—(**प्राश्नन्तीति-**) ॥

(९४) तस्मात् प्राशनात्पूर्वं समिदाधानं विधत्ते—(**यदिति-**) ॥

---

१ °चेत् न, आ° इति पाठः । २ °मेपृथग्योगः मा° इति पाठः । ३ °कारत्वाच्चा° इति पाठः ।
४ आप. श्रौ. सू. ५. १०. ७. ।

धोऽभ्यज्याऽऽदधाति । उच्छेपणाद्वा अदितो रेतोऽधत्त (३) । उच्छेपणादेव तद्रेतो धत्ते । अस्थि वा एतत् । यत्समिधः । एतद्रेतः । यदाज्यम् । यदाज्येन समिधोऽभ्यज्याऽऽदधाति । अस्थ्येव तद्रेतसि दधाति । तिस्र आदधाति मिथुनत्वाय । इयतीर्भवन्ति । प्रजापतिना यज्ञमुखेन संमिताः (४) । इयतीर्भवन्ति । यज्ञपरुषा संमिताः । इयतीर्भवन्ति । एतावद्वै पुरुषे वीर्यम् । वीर्यसंमिताः । आर्द्रा भवन्ति । आर्द्रमिव हि रेतः सिच्यते । [1] चित्रियस्याश्वत्थस्याऽऽदधाति । चित्रमेव भवति । घृतवतीभिरादधाति (५) । एतद्वा अग्नेः प्रियं धाम । यद्घृतम् । प्रियेणैवैनं धाम्ना समर्धयति । अथो तेजसा । गायत्रीभिर्ब्राह्मणस्याऽऽदध्यात् । गायत्रछन्दा वै ब्राह्मणः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । त्रिष्टुग्भी राजन्यस्य । त्रिष्टुप्छन्दा वै राजन्यः । स्वस्य छन्दसः प्रत्ययनस्त्वाय (६) । जगतीभिर्वैश्यस्य । जगतीछन्दा वै वैश्यः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । [2,3] तꣳ संवत्सरं गोपायेत् । संवत्सरꣳ

---

(९५) होमोच्छिष्टं समिदञ्जनसाधनमाज्यं प्रशस्य तेनाभ्यक्ताः समिधः प्रशंसति—(**अस्थि वा एतदिति-**) काठिन्यसाम्यात्समिधामस्थित्वम् ॥

(९६) समित्संख्यां विधत्ते—(**तिस्र इति-**) सपुत्रयोर्मातापित्रोर्मिथुनरूपयोस्त्रित्वसाम्यम् । अत एवान्यत्राऽऽम्नातम्—"माता पिता पुत्रस्तदेव तन्मिथुनम्" इति ॥

(९७) प्रादेशाभिनयेन समिधां परिमाणं विधत्ते—(**इयतीभिरिति-**) इयत्यः प्रादेशमात्राः परिमिताः प्रजापत्यवतारस्य यज्ञपुरुषस्य मुखं मूर्धानमारभ्य चुबुकपर्यन्तं प्रादेशपरिमितं भवति । अतस्तत्तुल्यत्वम् । यज्ञस्य परुः पर्वावयवविशेषः पवित्ररूपः । तस्य च प्रादेशप्रमाणं तन्मन्त्रे समाम्नातम्—"त्रिवृत्पलाशे दर्भ इयान्प्रादेशसंमितः" इति । अतो यज्ञपर्वणा तुल्यत्वम् । किं च पुरुषविशेषे चक्षुःश्रोत्रादिज्ञानेन्द्रियसामर्थ्यं प्रादेशपरिमिते मुखे वर्तते । अतस्तेन वीर्येण तुल्यत्वम् ॥

(९८) तासां समिधां शुष्कत्वं वारयितुं विधत्ते—(**आर्द्रेति-**) इव शब्द एवकारार्थः ॥

(९९) समिधां वृक्षविशेषं विधत्ते—(**चित्रियस्येति-**) अश्वत्थग्रामोऽश्वत्थचित्रक इत्युच्यते । योऽश्वत्थो ग्रामादेर्धिष्ठीभूतस्तदीयाः समिध आदध्यात् । तेन **विचित्रमेव ऐश्वर्यं भवति** ॥

(१००) समिदाधानार्थान्मन्त्रविशेषान्विधत्ते—(**घृतवतीभिरिति-**) घृतशब्दो यास्वृक्षु स्थितस्ता घृतवत्यः । घृतैर्बोधयतातिथिमित्येवं घृतशब्दस्तत्र श्रूयते । घृतेन ज्वालाभिवृद्धेरग्नेर्घृतप्रियत्वम् । अतस्तेन घृतयुक्तेन मन्त्रेण समिध आदधानः **प्रियेण** स्थानेन समृद्धो भवति । अपि च **तेजसा** समृद्धो भवति ॥

(१०१) अधिकारिभेदादृग्व्यवस्थां विधत्ते—(**गायत्रीभिरिति-**) "समिधाऽग्निं दुवस्यत" इत्याद्या गायत्र्यः । "समिध्यमानः प्रथमोऽनु धर्मः" इत्याद्यास्त्रिष्टुभः । "त्वामग्ने समिधानम्" इत्याद्या जगत्यः । एताश्चोपरितनप्रपाठके आम्नास्यन्ते । गायत्रीब्राह्मणयोरेकमुखजन्यत्वं संबन्धः । अतः स्वकीयस्यैव गायत्रीछन्दसः प्रत्ययनस्त्वाय पुनःप्राप्तये गायत्रीभिर्ब्राह्मणस्याऽऽदध्यात् । एवमुत्तरयोर्वाक्ययोर्योज्यम् ॥

(१०२) समिद्धस्य ब्राह्मौदनिकाग्नेर्धिरावस्थानं विधत्ते—(**तꣳ संवत्सरमिति-**) यस्माल्लोके गर्भाशये स्थापितं **रेतः संवत्सरं वर्धते** तस्मादग्निरूपस्य गर्भस्य वृद्धये संवत्सरमग्निरक्षेत् ॥

---

[1] तै. ब्रा. १. ६. ३. । [2] तै. ब्रा. ३. ७. ४. । [3] तै. ब्रा. १. २. १. ।

[110]अनाहितस्तस्याग्निरित्याहुः । यः समिधोऽनाधायाग्निमाधत्त इति । ताः संवत्सरे पुरस्तादादध्यात् । संवत्सरादेवैनमवरुध्याऽऽधत्ते । [111]यदि संवत्सरे नाऽऽदध्यात् । द्वादश्यां पुरस्तादादध्यात् । संवत्सरप्रतिमा वै द्वादश रात्रयः । संवत्सरमेवास्याऽऽहिता भवन्ति । [112]यदि द्वादश्यां नाऽऽदध्यात् । त्र्यहे पुरस्तादादध्यात् । आहिता एवास्य भवन्ति (१०) ॥

द्वितीयमपचचतुर्थमपचददितिरेतोऽधत्त संमिता घृतवतीभिरादधाति राजन्यः स्वस्य छन्दसः प्रत्ययनस्त्वायैयाद्गच्छति मन्थति रात्रयश्चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ प्रथमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ।

[113]प्रजापतिः प्रजा असृजत । स रिरिचानोऽमन्यत । स तपोऽतप्यत । स आत्मन्वीर्यमपश्यत् । तदवर्धत । तदस्मात्सहसोर्ध्वमसृज्यत । सा विराडभवत् । तां देवासुरा व्यगृह्णत । सोऽब्रवीत्प्रजापतिः । मम वा एषा (१) । दोहा एव युष्माकमिति । [114]सा ततः प्राच्युदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । अथर्व पितुं मे गोपायेति । सा द्वितीयमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् ।

---

(११०) ब्राह्मौदनिकेऽग्नौ गायत्र्यादिभिर्यः समिदाधानविधौ विधिरुक्तस्तमेव पक्षान्तरविधानाय पुनः परामृशति—(**अनाहित इति-**) समिदाधानाभावे कृतमप्याधानमकृतमेव स्यादित्यभिज्ञा **आहुः** । तस्मादाधानात्पुरस्तात्संवत्सरपरिमिते काले समिदाधानं मुख्यः पक्षः ॥

(१११) तमेतं मुख्यं पक्षमनूद्य तदसंभवेऽनुकल्पं विधत्ते—(**यदीति-**) आधानदिनमारभ्याधस्तनतिथिगणनायां या द्वादशसंख्यापूरणी तिथिस्तस्यां ताः समिध आदध्यात् द्वादशानां रात्रीणां मासस्थानीयत्वेन मिलित्वा संवत्सरसादृश्यम् ॥

(११२) पुनरप्यसंभवेऽनुकल्पान्तरं विधत्ते—(**यदीति-**) पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये प्रथमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

---

(११३) नवमे ब्रह्मौदनोऽभिहितः । अथ दशमे पश्चाद्याधानमभिधीयते । पूर्वं पञ्चमेऽनुवाके यत्रेधाऽग्निराधीयत इत्यग्निप्रयाधानपक्ष एवाभिहितः । इह तु पश्चाद्याधानं विधातुमाख्यायिकामाह—(**प्रजापतिरिति-**) **प्रजापतिः प्रजाः** सृष्ट्वा स्वकीयस्य वीर्यस्योपक्षयेण रिक्तोऽहमिति मत्वा वीर्यलाभाय **स तपः** तप्त्वा स्वात्मनि किंचित् **वीर्यमपश्यत्** । **तत्** च वीर्यं कालेन **अवर्धत** तत्प्रवृद्धं वीर्यं धारयितुमशक्यं तच्छीघ्रमेवास्मात्प्रजापतेरूर्ध्वं निर्गत्य केनचिद्रूपेण स्पष्टमभूत् । सा सृष्टा निष्पन्ना विविधं राजमाना काचिद्गौरभवत् । तामुद्दिश्य **देवाः** च **असुराः** च वयमेवैतां गृह्णीम इत्येव परस्परं विग्रहमकुर्वन् । तदा विग्रहशान्तये **प्रजापतिः** एवम् **अब्रवीत्** । **एषा** गौः **ममैव** इति **युष्माकं** तु **दोहा एव** क्षीराण्येवेति ॥

(११४) अथ पश्चाद्युत्पत्तिप्रकारं दर्शयति—(**सेति-**) येयं गौः प्रजापतिना स्वार्थमेव स्वीकृता विराट् सा प्रजापतेः सकाशात्प्राङ्मुखी सत्युदक्रामत् । तदा प्रजापतिरथर्वेति मन्त्रेण तां विराजं परितो निरुद्धवान् । हे **अथर्व!** चतुर्थवेदप्रवर्तकाचार्यरूप ! दक्षिणाग्ने ! यद्वा हिंसारहित ! **मे पितुं** मदीयमन्नं **गोपाय** । एव

नर्यं प्रजां मे गोपायेति । सा तृतीयमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । शꣳस्य पशून्मे गोपायेति (२) । सा चतुर्थमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । सप्रथ सभां मे गोपायेति । सा पञ्चममुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । अहे बुध्निय मन्त्रं मे गोपायेति । अग्नीन्वाव सा तान्व्यक्रमत । तान्प्रजापतिः पर्यगृह्णात् । अथो पङ्क्तिमेव । पङ्क्तिर्वा एषा ब्राह्मणे प्रविष्टा (३) । तामात्मनोऽधि निर्मिमीते । यदग्निराधीयते । तस्मादेतावन्तोऽग्नय आधीयन्ते । पाङ्क्तं वा इदꣳ सर्वम् । पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोति । अथर्वे पितुं मे गोपायेत्याह । अन्नमेवैतेन स्पृणोति । नर्यं प्रजां मे गोपायेत्याह । प्रजामेवैतेन स्पृणोति । शꣳस्य पशून्मे गोपायेत्याह (४) । पशूनेवैतेन स्पृणोति । सप्रथ सभां मे गोपायेत्याह । सभामेवैतेनेन्द्रियꣳ स्पृणोति । अहे बुध्निय मन्त्रं मे गोपायेत्याह । मन्त्रमेवैतेन श्रियꣳ स्पृणोति । यदन्वाहार्यपचनेऽन्वाहार्यं पचन्ति । तेन सोऽस्याभीष्टः प्रीतः । यद्गार्हपत्य आज्यमधिश्रयन्ति संपत्नीर्याजयन्ति । तेन सोऽस्याभीष्टः प्रीतः । यदाहवनीये जुह्वति (५) । तेन सोऽस्याभीष्टः प्रीतः । यत्सभायां विजयन्ते । तेन सोऽस्याभीष्टः

त्तरेषु चतुर्षु पर्यायेषु योज्यम् । नरेभ्यो मनुष्येभ्यो हितो नर्यो गार्हपत्यः । ऋत्विग्भिः प्रशंसनीयत्वाच्छंस्य आहवनीयः । प्रथया कीर्त्या सह वर्तमानत्वात्सप्रथः सभ्यः । अहिंसकत्वादहिर्बुध्ने मूले जगदाधारत्वात्प्रतिष्ठितत्वाद्बुध्निय आवसथ्यः ऋगादिर्मन्त्रः । इत्थं सैव विराट् तानग्नीन्पञ्चधा विवेक्तुं पञ्चवारं व्यक्रामत् । तानग्नीन्प्रजापतिः परितः स्वीकृतवान् । अपि च क्रमेणावस्थानात्पञ्चसंख्यान्वयाद्वा पङ्क्तिमेव तावदग्निविषयां गृहीतवान् ॥

(११५) इदानीं विधत्ते—(पङ्क्तिरिति-) पूर्वोक्तानामथर्वेत्यादीनां मन्त्राणां ब्राह्मणेनार्थितत्वात्प्रजापतिप्रतिपाद्यत्वाद्वा पङ्क्तिः [ब्राह्मणे] विप्रे प्रविष्टा । तथा सत्याधानेन ताम् पङ्क्तिं तस्मादुत्पादयति । तस्मादेतावन्तः पञ्चामय आधातव्याः । यत् इदं मनुष्यपश्वादिरूपं जगत् सर्वं पञ्चसंख्योपेतत्वात् पाङ्क्तम् । शिरो हस्तौ पादौ चेत्येवं मनुष्याणां पञ्चावयवाः । शिरसा पुच्छेन वा सह चत्वारः पादाः पशूनां पञ्चावयवाः । अतः पञ्चसंख्यायुक्तेनैवाग्निना पञ्चसंख्यायुक्तं जगत्प्रीणयति ॥

(११६) अथ मन्त्राणां तात्पर्यं क्रमेण दर्शयति—(अथर्वेति-) मन्त्रे तानिन्द्रियावत इत्यभिधानादिन्द्रियप्रीतिः । सा हि श्रीरित्यभिधानाच्छ्रियः प्रीतिः ।

(११७) पञ्चानामग्नीनां पृथगुपयोगं दर्शयन्प्रशंसति—(यदिति-) दर्शपूर्णमासकर्मणि ऋत्विजामनु दक्षिणार्थं आह्रियत इत्योदनोऽन्वाहार्यः । स च पच्यते यस्मिन्दक्षिणाग्नौ सोऽयम् अन्वाहार्यपचनः । तेन ओदनपाकेनोपयुक्तत्वात् सः दक्षिणाग्निरस्य यजमानस्य अभीष्टः अपि भवति । एतदीयपरिचर्यया प्रीतः च भवति । एवमुत्तरत्रापि । गार्हपत्ये हि आज्यं विलापयन्ति । देवपत्नीः च संयाजयन्ति । अतः पत्नीसंबन्धाद्गृहपतिना संयुक्त इति गार्हपत्यः । प्रधानाहुतिं जुहोत्यस्मिन्निति आहवनीयः । अथ सभायां मध्येऽधिदेवनमुद्धत्येत्यादिना द्यूतविजयः सूत्रेऽभिहितः । तां द्यूतसभामर्हतीति सभ्यः । "ऐदकं संस्थ

---

१ आप. श्रौ. सू. ५. १९. २–३. ।

प्रीतः । यदावसथेऽन्नꣳ हरन्ति । तेन सोऽस्याभीष्टः प्रीतः । तथाऽस्य सर्वे प्रीता अभीष्टा आधीयन्ते । प्रवसथमेष्यन्नेवमुपतिष्ठेतैकमेकम् । यथा ब्राह्मणाय गृहेवासिने परिदाय गृहानेति । तादृगेव तत् । पुनरागत्योपतिष्ठते । साभागेयमेवैषां तत् । सा तत ऊर्ध्वाऽऽरोहत् । सा रोहिण्यभवत् । तद्रोहिण्यै रोहिणित्वम् । रोहिण्यामग्निमादधीत । स्व एवैनं योनौ प्रतिष्ठितमाधत्ते । ऋध्नोत्येनेन (६) ॥

एषा प्रभून्मे गोपायेति प्रविष्टा प्रभून्मे गोपायेत्याह जुह्वति तिष्ठते सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

सभासद्भ्य उपहरन्त्यावसथे भुञ्जते" इति सूत्रेऽन्नहरणमुक्तम् । तद्गृहमावसथः । तमर्हतीति **आवसथ्यः** । तेनोक्तप्रकारेण सर्वेऽप्यग्नयोऽस्य यजमानस्य प्रीतिपूर्वकमभीष्टं संपादयन्त आहिता भवन्ति ॥

(११८) पूर्वोक्तैरथर्व पितुमित्यादिमन्त्रैरुपस्थानं विधत्ते—(**प्रवसथमिति**-) आहिताग्निर्यदा देशान्तरं गमिष्यति तदा पूर्ववदुपतिष्ठेत । पूर्ववत्प्रजापतिर्विराजः क्रमेणाथर्वपितुमित्यादिमन्त्रैर्विराजं परिगृहीतवानित्यर्थवाद उक्तः । तेनार्थवादेनाऽऽधानकालीनस्योपस्थानस्य विधिरुन्नेयः । अत एव सूत्रकार आधानादूर्ध्वं पवमानेष्टिभ्यः पूर्वमेतदुवाच—"अथ विराट्क्रमैर्यजमान उपतिष्ठते, अथर्व पितुं मे गोपाय" इत्यादि । अत आधानकालीनमुपस्थानं दृष्टान्तीकर्तुमेवमित्युक्तम् । यथा लोके गृहस्वामी कश्चिदन्यं कंचिद्ब्राह्मणं गृहरक्षार्थं वासयित्वा तस्मै **ब्राह्मणाय गृहान् परिदाय** त्वमेवमेवं रक्षेति बुद्धिप्रदानं कृत्वा ग्रामान्तरे गच्छति **तादृगेव तत्** उपस्थानं द्रष्टव्यम् ॥

(११९) उपस्थानान्तरं विधत्ते—(**पुनरिति**-) ग्रामान्तरादागत्य पुनरप्याहितानग्नीनथर्वपितुमित्यादिमन्त्रैरुपतिष्ठेत ते च प्रत्येकमुपस्थानमन्त्राः । संध्योपस्थानमन्त्रस्तु पञ्चधाऽग्नीन्व्यक्रामदित्यादिः । स चैककुम्भरम्बाठके पठिष्यते—"पञ्चधाऽग्नीन्व्यक्रामत् । विराट् सृष्टा प्रजापतेः । ऊर्ध्वाऽऽरोहद्रोहिणी । योनिरग्नेः प्रतिष्ठितिः" इति । एतन्मन्त्रतात्पर्यस्य प्राजापत्योपाख्यानरूपार्थवादं पूर्वमनुक्त्वाऽदिदानीं [illegible] इत्यादिना तदीयतात्पर्यमुच्यते । येयं प्रजापतिसृष्टा विराट् सेयं तदानीमेषामग्नीनां भागरहिताऽभूत् । अन्वाहार्य[illegible]न्तीत्याद्युपयोगो यथाऽग्नीनामभिहितो न तथा विराजः कश्चिदुपयोग उक्तः । तस्मादभागत्वम् । सा च भागरहिता ततो देशादूर्ध्वा भूत्वा दिवम् आरोहत् । आरुह्य च रोहिणीनक्षत्ररूपाऽभूत् । [illegible] **रोहिणी** नाम संपन्नम् । एवं च सति रोहिण्यामग्न्याधानेन स्वकारण एवाग्निः प्रतिष्ठित आहितो भवति । [illegible] रूपेणाग्निकारणत्वात् । तथा च सत्युपस्थुत्याद्विराट् सभागा संपद्यते । [illegible] । [illegible] पूर्वत्र—'यो रोहिण्यामग्निमाधत्ते । ऋध्नोत्येव' इति विहितम् । अत्र तु [illegible] ॥

अस्य प्रपाठकस्य विनियोगसंग्रहः—

अनुवाका दश प्रोक्ताः प्रथमेऽस्मिन्प्रपाठके ॥
[illegible] आधाने कालनिर्णयः ॥ १ ॥
संभार[illegible] ॥
[illegible] ॥
[illegible] ॥ २ ॥
[illegible] ।
[illegible] ॥ ३ ॥

इति [illegible]
[illegible] ॥ १ ॥

१ आप. [illegible]

तत्ते न्य॑क्तमिह सं॒भर॑न्तः । श॒तं जी॑वेम श॒रदः॒ सवी॑राः । ऊर्जं॑ पृथि॒व्या रस॑-
मा॒भर॑न्तः । श॒तं जी॑वेम श॒रदः॑ पु॒रू॒चीः (२) । व॒म्रीभि॒रनु॑वित्तं॒ गुहा॑सु ।
श्रोत्रं॑ त उ॒र्व्य॑बधिरा भवामः । प्र॒जाप॑तिसृष्टानां प्र॒जाना॑म् । क्षु॒धोप॑हत्यै
सुवि॒तं नो॑ अस्तु । उ॒प॒प्र॒भि॒न्नमि॒षमूर्जं॑ प्र॒जाभ्यः॑ । सू॒दं गृ॒हेभ्यो॒ रस॒मा॒भ॑रामि ।
यस्य॑ रू॒पं बिभ्र॑दि॒माम॑विन्दत् । गुहा॒ प्रवि॑ष्ट२ँ सरि॒रस्य॒ मध्ये॑ । तस्ये॒दं विहं॑-
त॒मा॒भर॑न्तः । अछं॑बट्कारम॒स्यां वि॑धेम (३) । यत्प॒र्यप॑श्यत्सरि॒रस्य॒ मध्ये॑ ।

शतं जीवेम शरदः सवीरा इत्याखुकरीषम्" इति । **(ऊतीरिति–)** हेऽग्ने त्वम् **आखुरूपं** मूषकरूपं स्वीकृत्य **गुहाकारं** पर्वतगुहाया आकारो यथा भवति तथा **ऊतीः** बिलानि **कुर्वाणः पृथिवीमन्वरः** भूम्यां चरित-वानसीति यत्तत्र **न्यक्तं** निगूढं ते त्वदीयं सारम् इह देवयजने **संभरन्तः** संपादयन्तो वयं **सवीराः** पुत्रभृत्यसहिताः **शरदः शतं** शतसंख्याकान्संवत्सरान् **जीवेम** ॥

(१२५) कल्पः—"ऊर्जं पृथिव्या रसमाभरन्तः शतं जीवेम शरदः पुरूचीर्वम्रीभिरनुवित्तं गुहासु श्रोत्रं त उर्व्यबधिरा भवाम, इति वल्मीकवपाम्" इति । **(ऊर्जमिति–)** **पृथिव्याः** रसः सारम् **ऊर्जं** क्षीरादिक-रसनानं वल्मीकवपारूपं संभरन्तः वयं **शतं शरदो जीवेम** । कीदृशीः शरदः? **पुरूचीः** पुरूणि बहूनि भोग्यान्यन्नानि संपादयन्तीति पुरूच्यस्तादृशीः । कीदृशं रसम्? **गुहासु** भूच्छिद्रेषु **वम्रीभिः** पिपीलिका सदृशीभिः **अनुवित्तम्** अनुक्रमेण लब्धम् । हे **उर्वि !** तव **श्रोत्रं** त्वदीयश्रोत्रस्थानीयां वल्मीकवपामाहृत-वन्तम् **अबधिराः** अनुपहतश्रोत्रेन्द्रियाः भूयास्म ॥

(१२६) कल्पः—"प्रजापतिसृष्टानां प्रजानां क्षुधोपहत्यै सुवितं नो अस्तु, उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामि, इति सूदम्" इति । **(प्रजापतिसृष्टानामिति–)** याः **प्रजापतिसृष्टाः प्रजा** स्तासां **[क्षुधोपहत्यै]** क्षुन्निवारणाय **नः** अस्मत्संबन्धीदं कर्दमरूपं **सुवितं** सुष्ठु प्राप्तम् **अस्तु** । [illegible] या योऽन्नरसः, उक्तं **प्रजाभ्यः** प्रजार्थम् **उपप्रभिन्नम्** अत्यन्तनाशोऽयं यथा भवति [illegible] **[सूदं] रसम्** [illegible] **गृहेभ्यः** [illegible]र्थम् **[आभरामि]** [illegible] ॥

(१२७) कल्पः—"यस्य रूपं बिभ्रदिमामविन्दद्गुहा प्रविष्टाᳬसरिरस्य मध्ये, तस्येदं [illegible] [illegible]ट्कारमस्यां विधेम, इति वराहविहतम्" इति । **(यस्येति–)** पुरा प्रजापतिः **यस्य** [illegible] **रूपं बिभ्रत्** [illegible] **इमां** पृथिवीम् **अविन्दत्** अलभत । कीदृशीम्? **सरिरस्य मध्ये** [illegible] **गुहा**[illegible] **प्रविष्टाम्** । [illegible]—" [illegible] [illegible] इति । [illegible] **विहतं** [illegible] **इदं** [illegible] **आभरन्तः** [illegible] **अस्यां** [illegible] [illegible] तथा **विधेम** [illegible] ॥

(१२८) कल्पः—"[illegible]" [इति] । **(यदिति–)** **जगतः** [illegible] **प्रतिष्ठाम्** [illegible] **सरिरस्य मध्ये** [illegible] [illegible]**दत्** । [illegible] [illegible] [illegible]

१ [illegible] २ [illegible] ३ [illegible]
४ [illegible] ५ [illegible]

सोमपीथस्यावरुद्ध्यै । देवानां ब्रह्मवादं वदतां यत् । उपाश‍ृणोः सुश्रवा वै श्रुतोऽसि । ततो मामाविशतु ब्रह्मवर्चसम् । तत्संभर॑ंस्तदवरुन्धीय साक्षात् । [१३४]यया ते सृष्टस्याग्नेः । हेतिमशमयत्प्रजापतिः । तामिमामप्रदाहाय (६) । शमीं॑ शान्त्यै हराम्यहम् । [१३५]यत्ते सृष्टस्य यतः । विकङ्कतं भा आर्च्छज्जातवेदः । तया भासा संमितः । उरुं नो लोकमनुप्रभाहि । [१३६]यत्ते तान्तस्य हृदयमाच्छिन्दञ्जातवेदः । मरुतोऽद्भिस्तमयित्वा । एतत्ते तदशनेः संभरामि । सात्मा अग्ने सहृदयो भवेह । [१३७]चित्रियादश्वत्थात्संभृता बृहत्यः (७) । शरीरमभिसं॑स्कृताः स्थ । प्रजापतिना यज्ञमुखेन संमिताः । तिस्रस्त्रिवृद्भिर्मिथुनाः

बलादाह्रियमाणस्य **ते** तव **यत्पर्णं** भूमौ **अपतत् सोऽयं पर्णः** पलाशवृक्षः स च **सोमपर्णाज्जात** इति पर्णनामधेयेनैव प्रसिद्धः । **ततः** तस्मात्कारणात् **सोमपीथस्यावरुद्ध्यै** सोमपानस्य सिद्धये **हरामि** त्वामिहाऽऽनयामि । किं च पलाशवृक्षच्छायायामुपविश्य **ब्रह्मवादं वदताम्** आत्मविषयं संवादं कुर्वतां **देवानां** संबन्धं ब्रह्मवादं **यत्** यस्मात्कारणात् त्वम् **उपाश‍ृणोः** समीपे स्थित्वा श्रुतवानसि । अत एव **सुश्रवा** इति नाम्नैव त्वं **श्रुतोऽसि** प्रसिद्धोऽसि, तत्तस्मात्कारणात्त्वदानयने प्रवृत्तं मां **ब्रह्मवर्चसमाविशतु** । **तत्** तादृशं पर्णरूपं **संभरन्** अहं ब्रह्मवर्चसं साक्षात् **अवरुन्धीय** विलम्बमन्तरेण प्राप्नुयाम् ॥

(१३४) कल्पः—"यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिस्तामिमामप्रदाहाय शमीं॑ शान्त्यै हराम्यहमिति शमीम्" इति । (**ययेति-**) हे शमीवृक्ष ! ते त्वदीयया **यया** शाखया **प्रजापतिः स्वसृष्टस्याग्नेर्हेतिं** प्रदाहरूपमायुधम् **अशमयत् तामिमां शमीं** पूर्वस्य दाहस्य **शान्त्यै** इत ऊर्ध्वम् **अप्रदाहाय** च **हरामि** यज्ञभूमावानयामि ॥

(१३५) कल्पः—"यत्ते सृष्टस्य यतो विकङ्कतं भा आर्च्छज्जातवेदस्तया भासा संमित उरुं नो लोकमनुप्रभाहीति विकङ्कतम्" इति । (**यत्त इति-**) हे **जातवेदः** ! प्रजापतिना **सृष्टस्य यतः** शीघ्रं गच्छतः **ते** तव **भा** या दीप्तिः **विकङ्कतवृक्षम्—आर्च्छत्** प्राप्नोत् । **तया भासा [संमितः]** संयुक्तः **सन्** अस्मदर्थम् **उरुं** विस्तीर्णं **लोकं** स्थानम्—**अनुप्रभाहि** अनुक्रमेण प्रकाशय ॥

(१३६) कल्पः—"यत्ते तान्तस्य हृदयमाच्छिन्दञ्जातवेदो मरुतोऽद्भिस्तमयित्वैतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेहेत्यशनिहतस्य वृक्षस्य शकलानि त्वचो वा" इति । (**यत्त इति-**) हे **जातवेदः** ! पुरा कदाचित् **मरुतः** देवा विद्वेषात् **अद्भिः** त्वदीयां तां ज्वालां **तमयित्वा** शमयित्वा म्लानिं प्रापय्य **तान्तस्य** म्लानिं प्राप्तस्य **ते** तव **यद्धृदयमाच्छिन्दन् तत् एतत् ते हृदयम् अशनेः** सकाशादहं **संभरामि** छिन्नस्य हृदयस्याशनौ प्रविष्टत्वात् । ततः संभरणं युक्तम् । "सोऽशनिरभवत्" इति ब्राह्मणं पुरोदाहृतम् । तस्य हृदयस्य मया संभृतत्वात् **इह** देवयजने हे **अग्ने** ! त्वं **सात्मा** सत्स्वरूपः **सहृदयः** हृदययुक्तश्च **भव** । एतेषूक्तेषु सर्वेष्वपि मन्त्रेषूर्ध्वन्तीत्याद्यनुवाकोक्तं तत्तद्ब्राह्मणमनुसंधेयम् ॥

(१३७) कल्पः—"अथ ब्रह्मौदनशेषं॑सं॑स्कृत्य तस्मिन्नाज्यशेषमानीय तस्मिं॑श्चित्रियाश्वत्थस्य तिस्रस्तिस्रः समिध आर्द्राः सपलाशाः प्रादेशमात्र्यस्तिभिकवलो विवर्तयन्ति—चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसं॑स्कृताः स्थ, प्रजापतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै" इति । (**चित्रियादिति-**) ग्रामतटागादिचिह्नभूतः प्रसिद्धोऽश्वत्थश्चित्रियः । हे समिधो ! यूयं **चित्रियादश्वत्थात्संभृता** मया संपादिताः ।

१ आप. श्रौ. सू. ५. २. ४. । २ आप. श्रौ. सू. ५. २. ४. । ३ आप. श्रौ. सू. ५. २. ४. ४ तै. ब्रा. १. १. ३. । ५ °ध्वन्तीति तृतीयाद्यनु° इति पा० । ६ आप. श्रौ. सू. ५. ५. १०. ।

हव्यान् । [142]समिधाऽग्निं दुवस्यत (९) । घृतैर्बोधयतातिथिम् । आऽस्मिन्हव्या जुहोतन । [143]उप त्वाऽग्ने हविष्मतीः । घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम । [144]तं त्वा समिद्भिरङ्गिरः । घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य । [145]समिध्यमानः प्रथमो नु धर्मः । समक्तुभिरज्यते विश्ववारः (१०) । शोचिष्केशो घृतनिर्णिक्पावकः । सुयज्ञो अग्निर्यजथाय देवान् । [146]घृतप्रतीको घृतयोनिरग्निः । घृतैः समिद्धो घृतमस्यान्नम् । घृतप्रुषस्त्वा सरितो वहन्ति । घृतं पिबन्सुयजा यक्षि देवान् । [147]आयुर्दा अग्ने हविषो जुषाणः । घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारुगव्यम् । पितेव पुत्रमभिर-

---

(१४२) यदुक्तं समिदाधानप्रतिपादके ब्राह्मणे—"गायत्रीभिर्ब्राह्मणस्याऽऽदध्यात्" इति, तत्र प्रथममाह—(**समिधाग्निमिति-**) हे ऋत्विजोऽनया प्रक्षिप्यमाणया **समिधा अग्निं दुवस्यत** प्रीणयत । **अतिथिं** वैश्वदेवान्ते समागतं ब्राह्मणमिव पूजनीयमेनमग्निं घृतैर्बोधयत दीपयत । **अस्मिन्** अग्नौ **हव्या** हवींषि **आजुहोतन** सर्वत्र जुहुत ॥

(१४३) अथ द्वितीयमाह—(**उपेति-**) हे **हर्यत**! भजनीय वह्ने! **हविष्मतीः** ब्रह्मौदनाख्यहविष्मत्यो **घृताचीः** घृताच्यो घृतसंपृक्ता एताः **समिधः** त्वामुपयन्तु **मम समिधो जुषस्व** प्रीत्या सेवस्व ॥

(१४४) अथ तृतीयमाह—(**तमिति-**) हे **अङ्गिरः**! अङ्गसौष्ठवयुक्त वह्ने! **तं** तादृशं सर्वकर्मसु प्रसिद्धं [**त्वा**] त्वां **समिद्भिर्घृतेन** च **वर्धयामसि** वयं वर्धयामः । हे **यविष्ठ्य**! युवतमाग्ने! **बृहच्छोचा** महत्त्वं यथा भवति तथा दीप्यस्व ॥

(१४५) यदुक्तं ब्राह्मणे—"त्रिष्टुब्भी राजन्यस्य" इति, तत्र प्रथममाह—(**समिध्यमान इति-**) अयम् **अग्निः देवान्यजथाय** यष्टुम् **अक्तुभिर्घृ**ताक्ताभिः समिद्भिः **समज्यते** सम्यगज्यते दीप्यते । कीदृशोऽग्निः ? सर्वैर्यजमानैः सर्वत्र **समिध्यमानः प्रथमोऽनु** सर्वासां देवतानां मध्येऽवश्यं प्रथमभावी । अत एवान्यत्राऽऽम्नातम्—"अग्निरग्रे प्रथमो देवतानां" इति । **धर्मः** विश्वस्य धारयिता । **विश्ववारः** अनिष्टं सर्वं निवारयितुं समर्थः । शोचींषि ज्वालाः केशस्थानीया यस्यासौ **शोचिष्केशः** । घृतेन निर्णिज्यते निःशेषेण बोध्यते धूमरहितज्वालायुक्तः क्रियत इति **घृतनिर्णिक्** । **पावकः** सर्वस्य शोधकः । **सुयज्ञः** शोभनज्योतिष्टोमादियज्ञहेतुः ॥

(१४६) अथ द्वितीयमाह—(**घृतप्रतीक इति-**) अयमग्निः **घृतप्रतीकः**, प्रतीकशब्दो मुखवाची "मुखं प्रतीकं" इति वाजसनेयश्रुतेः । घृतं प्रतीकं मुखं यस्यासौ घृतप्रतीकः । तत्तदाहुतिषु घृतं पिबतीत्यर्थः । घृतमेव योनिर्ज्वालोत्पत्तिकारणं यस्येति **घृतयोनिः** । अत एव **घृतैः समिद्धः** सम्यक्प्रज्वालितः । **अन्नम्** अपि **अस्य घृतम्** एव । हेऽग्ने! **घृतप्रुषः** घृतबिन्दुयुक्ताः **सरितः** [**त्वा**] त्वां **वहन्ति** । घृतवाहिनीषु नदीषु वायुना घृतबिन्दवस्तीरे प्रसरन्ति तादृशीषु नदीषु प्लवमानस्त्वं क्रीडस्येत्यर्थः । तथाविधस्त्वमस्मद्दत्तं **घृतं पिबन् सुयजाः** शोभनेन यज्ञेन **देवान्यक्षि** पूजय ॥

(१४७) अथ तृतीयमाह—(**आयुरिति-**) हे **अग्ने** ! **हविषो जुषाणः** हवींषि सेवमानो **घृतप्रतीकः घृतयोनिः** सन् **आयुर्दा एधि**, अस्माकमायुष्प्रदो भव । तथा **मधु** मधुरं **चारुगव्यं** रमणीयं गोसंबन्धिरसं घृतं **पीत्वा** इमं यजमानमभिरक्षतात्सर्वतो रक्ष । यथा **पिता पुत्रं रक्षति** तद्वत् ॥

---

१ तै. ब्रा. १. १. ९. । २ तै. ब्रा. १. १. ९. । ३ °म्यगभिव्यज्यते इति पा० । ४ तै. ब्रा. २. ४. ३. ।

क्षतादिमम् (११) त्वामग्ने समिधानं यविष्ठ । देवा दूतं चक्रिरे हव्यवाहम् । उरुज्रयसं घृतयोनिमाहुतम् । त्वेषं चक्षुर्दधिरे चोदयन्वति । त्वामग्ने प्रदिव आहुतं घृतेन । सुम्नायवः सुषमिधा समीधिरे । स वावृधान ओषधीभिरुक्षितः । उरु ज्रयांसि पार्थिवा वितिष्ठसे । घृतप्रतीकं व ऋतस्य धूर्षदम् । अग्निं मित्रं न समिधान ऋञ्जते (१२) । इन्धानो अक्रो विदथेषु दीद्यत् । शुक्रवर्णामुदु नो यंसते धियम् । प्रजा अग्ने संवासय । आशाश्च पशुभिः सह । राष्ट्राण्यस्मा आधेहि । यान्यासन्सवितुः सवे । मही विश्पत्नी सदने ऋतस्य । अर्वाची एतं धरुणे रयीणाम् । अन्तर्वत्नी जन्यं जातवेदसम् । अध्व-

(१४८) यदुक्तं ब्राह्मणे—"जगतीभिर्वैश्यस्य" इति, तत्र प्रथममाह—(त्वामग्न इति-) हे यविष्ठ! युवतमाग्ने! समिध्यमानं सम्यक्प्रकाशमानं **त्वां देवाः** सर्वे **हव्यवाहं** हविषां वोढारं **दूतं चक्रिरे**। अत एवान्यत्राऽऽम्नातम्—"अग्निर्देवानां दूत आसीत्" इति । **उरुज्रयसम्** उरूणि ज्रयांसि वैरिणामभिभवनानि यस्यासावुरुज्रयास्तादृशं **घृतयोनिं** घृतेनोत्पन्नज्वालम् **आहुतम्** आहुतिभिराराधितं **त्वेषं** दीप्यमानं त्वां **चोदयन्वति** विधायकवाक्ययुक्ते कर्मणि **चक्षुर्दधिरे** चक्षुःस्थानीयं कृतवन्तो देवाः । यथा लोके चक्षुषा रूपं स्पष्टं प्रकाश्यते तथा त्वया विधिवाक्योक्तानि कर्माणि संपाद्यन्त इत्यर्थः ॥

(१४९) अथ द्वितीयमाह— (त्वामग्न इति-) सुम्नं सुखमात्मन इच्छतीति **सुम्नायवः** ऋत्विजः **प्रदिवे** प्रकृष्टस्वर्गार्थं यद्वा प्रदिवः प्रकृष्टस्वर्गान्निमित्तभूतात् । हे **अग्ने!** त्वां घृतेन **आहुतं** सर्वत आराधितं **सुषमिधा** शोभनया समिधा **समीधिरे** सम्यगुद्दीपितवन्तः । **स त्वमोषधीभिः** ओषध्युपलक्षिताभिः **वावृधानः** अत्यन्तं वर्धमान उक्षितो घृतेन सिक्तः । **पार्थिवाः** पार्थिवानि **ज्रयांसि** बाधकानि उरु **वितिष्ठसे** अत्यन्तविश्लिष्टानि स्थापय ॥

(१५०) अथ तृतीयमाह—(घृतप्रतीकमिति-) हे ऋत्विग्यजमानाः! युष्मत्संबन्धिन **ऋतस्य** यज्ञस्य **धूर्षदं** धुरि सीदन्तं निर्वाहकमित्यर्थः । तादृशं **घृतप्रतीकमग्निं समिधानो** दीपयन्नयमध्वर्युः **मित्रं न** मित्रमिव **ऋञ्जते** अलं करोति । **इन्धानः** स्वयं दीप्यमानः **अक्रः** केनापि नाऽऽक्रान्तोऽयमग्निः **विदथेषु दीद्यत्** अस्मान्प्रकाशयन् **नः** अस्मदीयां **शुक्रवर्णां** निर्मलरूपां **धियं** प्रज्ञाम् **उदुयंसते** अत्यन्तमुद्गच्छतेऽभिवर्धयतीत्यर्थः ॥

(१५१) कल्पः—"प्रजा अग्ने संवासयाऽऽशाश्च पशुभिः सह, राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सव इत्युत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नाति" इति । तत्राग्निशब्देनाजः संबोध्यते तस्याग्निसंबन्धित्वात् । "आग्नेयी वा एषा यदजा" इति श्रुत्यन्तरादग्निना सह प्रजापतिमुखादुत्पन्नत्वाच्च । (प्रजा इति-) हे अग्ने! अजात्मन् **प्रजा** अस्मदीयाः **पशुभिः सहाऽऽशा** दिग्वर्तिनः प्राणिनश्च **संवासय** संवासनेन पालय । **यानि राष्ट्राणि सवितुः सवे** परमेश्वरस्याऽऽज्ञायां पूर्वमासंस्तानि राष्ट्राणि **अस्मै** यजमानाय **आधेहि** सर्वतः संपादय ॥

(१५२) कल्पः—"मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणामन्तर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगामित्यरणी आह्रियमाणे यजमानः प्रतीक्षते" इति—(महीति-) **रयीणां** धनानां **धरुणे** धारयित्र्यौ हेऽरणी! **मही** महत्यौ पूजनीये **विश्पत्नी** प्रजानां पालयित्र्यौ **अर्वाची** अभिमुखे युवां

१ तै. १. १. ९. । २ तै. सं. २. ५. ११. । ३ आप. श्रौ. सू. ५. ७. १७. । ४ तै. ब्रा. ३. ७. ३. । ५ आप. श्रौ. सू. ५. ८. ६. ।

राणां जनयथः पुरोगाम् (१३)। [153]आरोहतं दशतꣳ शक्करीर्मम। ऋतेनाग्न आयुषा वर्चसा सह। ज्योग्जीवन्त उत्तरामुत्तराꣳ समाम्। दर्शमहं पूर्णमासं यज्ञं यथा यजै। [154]ऋत्वियवती स्थो अग्निरेतसौ। गर्भं दधाथां ते वामहं ददे। तत्सत्यं यद्वीरं बिभृथः। वीरं जनयिष्यथः। ते मत्प्रातः प्रजनिष्येथे। ते मा प्रजाते प्रजनयिष्यथः (१४)। प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोके। [155]अनृतात्सत्यमुपैमि। मानुषाद्दैव्यमुपैमि। दैवीं वाचं यच्छामि। [156]शल्कैरग्निमिन्धानः। उभौ लोकौ सनेमहम्। उभयोर्लोकयोर्ऋद्ध्वा। अति मृत्युं

ऋतस्य सदने यज्ञस्य स्थाने एतम् आगच्छतम्। अन्तर्वत्नी गर्भिण्यौ युवां जन्यं जनयितारमग्निं जातवेदसं जातानां वेदितारम् अध्वराणां पुरोगां यज्ञानामग्रगामिणं जनयथः उत्पादयतम्॥

(१५३) कल्पः—"आरोहतं दशतꣳशक्करीर्मम ऋतेनाग्न आयुषा वर्चसा सह ज्योग्जीवन्त उत्तरामुत्तराꣳसमां दर्शमहं पूर्णमासं यज्ञं यथा यजा इति हस्ताभ्यां प्रतिगृह्य" इति। (आरोहतमिति-) हेऽरणी! मम मदीयाः शक्करीः शक्तियुक्ता अङ्गुलयो याः सन्ति तासां दशतं दशसंख्यायुक्तवर्गम् आरोहतम् हे अग्ने! अरणिगर्भस्थ! त्वमपि ऋतेन यज्ञेन आयुषा अस्मदीयेन दीर्घायुष्येण वर्चसा बलेन सह दशतमारोह। वयं ज्योक् दीर्घकालं जीवन्त उत्तरामुत्तरां समाम् उत्तरोत्तरसंवत्सरे विच्छेदमन्तरेण दर्शं पूर्णमासं च यज्ञं यथा यजै यथा यजाम तथा त्वमारोहेति पूर्वत्रान्वयः॥

(१५४) कल्पः—"ऋत्वियवतीस्थो अग्निरेतसौ, गर्भं दधाथां ते वामहं ददे, तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथस्ते मत्प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोक इति प्रतिगृह्याभिमन्त्रयते यजमानः" इति। (ऋत्वियवतीति-) हेऽरणी! युवाम् ऋत्वियवती ऋतुः प्राप्तोऽस्येत्यृत्वियो योनिः स ययोररण्योस्ते ऋत्वियवती प्रजननाभिमुखगर्भवत्यौ। अग्निरेव रेतोरूपेण गर्भे ययोस्ते अग्निरेतसौ तादृश्यौ स्थः भवथः। तादृश्यौ युवां गर्भं दधाथां गर्भं पोषयतम्। ते तादृश्यौ वां युवाम् अहं ददे आदत्तवानस्मि। ते युवां वीरं कर्मसु शूरं पुत्रं बिभृथः धारयथः। अतो वीरम् एव जनयिष्यथः इति यत् तत्सत्यं न तु मिथ्या। ते युवां मत् मत्तो निमित्तभूतात् प्रातः प्रजनिष्येथे परेद्युः प्रातःकाले सर्वथा वह्निमुत्पादयिष्यथः प्रजाते वह्निमुत्पादितवत्यौ ते युवामपि प्रजनयिष्यथः प्रजनयितारं करिष्यथः। अतः स्वर्गे लोके प्रजया पशुभिर्ब्रह्मवर्चसेन च युक्तो भविष्यामीति शेषः॥

(१५५) कल्पः—"अथ यजमानो व्रतमुपैति वाचं यच्छति—अनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमि दैवीं वाचं यच्छामि" इति। (अनृतादिति-) अनृतात् अग्निराहित्यलक्षणात् सत्यम् अग्निमत्त्वलक्षणम् उपैमि प्राप्नोमि। मानुषात् मनुष्याचरणात् दैव्यं देवयोग्यमाचरणम् उपैमि प्राप्नोमि। दैवीं देवसंबन्धिनीं वाचं यच्छामि नियतां करोमि। संस्कृतभाषयैव व्यवहरामीत्यर्थः॥

(१५६) कल्पः—"शल्कैरेताꣳरात्रिमेतमग्निमिन्धान आस्ते-शल्कैरग्निमिन्धान उभौ लोकौ सनेमहमुभयोर्लोकयोर्ऋद्ध्वाऽति मृत्युं तराम्यहमित्येतया" इति। (शल्कैरिति-) अहं शल्कैः काष्ठलेशैः अग्निमिन्धानः प्रज्वालयन् उभौ लोकौ एतल्लोकपरलोकौ सनेम् संजयेयम्। तयोः उभयोर्लोकयोर्ऋद्ध्वा समृद्धो भूत्वा मृत्युम् अहम् अति अतिशयेन तरामि॥

---

१ आप. श्रौ. सू. ५. ८. ८.। २ आप. श्रौ. सू. ५. ८. ८.। ३ आप. श्रौ. सू. ५. ८. ९.। ४ आप. श्रौ. ५. ८. ४.।

प्राणो अस्तु वः । [163] सं या वः प्रियास्तनुवः । सं प्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः । संप्रियास्तनुवो मम (१७) । [164] कल्पेतां द्यावापृथिवी । कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथक् । मम ज्यैष्ठ्याय सव्रताः । [165] येऽग्नयः समनसः । अन्तरा द्यावापृथिवी । वासन्तिकावृतू अभिकल्पमानाः । इन्द्रमिव देवा अभिसंविशन्तु । [166] दिवस्त्वा वीर्येण । पृथिव्यै महिम्ना (१८) अन्तरिक्षस्य पोषेण । सर्वपशुमादधे । [167] अजीजनन्नमृतं मर्त्यासः । अस्रेमाणं तरणिं वीडुजम्भम् । दश स्वसारो अग्रुवः समीचीः । पुमांसं जातमभि सꣳरभन्ताम् । [168] प्रजापतेस्त्वा प्राणेनाभिप्राणिमि । पूष्णः पोषेण मह्यम् । दीर्घायुत्वाय शतशारदाय । शतꣳ शरद्भ्य आयुषे वर्चसे (१९) ।

(१६३) "सं या वः" इति [illegible] । (स्यमिति-) [illegible] प्रियास्तनुवः [illegible] । [illegible] प्रियाणि हृदयानि [illegible] । [illegible] मम प्रियास्तनुवः [illegible] ॥

(१६४) [illegible]

(१६५) [illegible]

तराम्यहम् । [१५७]जातवेदो भुवनस्य रेतः । इह सिञ्च तपसो यज्जनिष्यते (१५) । अग्निमश्वत्थादधि हव्यवाहम् । शमीगर्भाज्जनयन्यो मयोभूः । [१५८]अयं ते योनिर्ऋत्वियः । यतो जातो अरोचथाः । तं जानन्नग्न आरोह । अथा नो वर्धया रयिम् । [१५९]अपेत वीत वि च सर्पतातः । येऽत्र स्थ पुराणा ये च नूतनाः । अदादिदं यमो वसानं पृथिव्याः । अक्रन्निमं पितरो लोकमस्मै (१६) । [१६०]अग्नेर्भस्मास्यग्नेः पुरीषमसि । [१६१]संज्ञानमसि कामधरणम् । मयि ते कामधरणं भूयात् । [१६२]सं वः सृजामि हृदयानि । सꣳसृष्टं मनो अस्तु वः । सꣳसृष्टः

---

(१५७) कल्पः—"तस्मिन्नुपव्युपमरणां निवपति—जातवेदो भुवनस्य रेत इह सिञ्च तपसो यज्जनिष्यते-ऽग्निमश्वत्थादधि हव्यवाहं शमीगर्भाज्जनयन्यो मयोभूरयं ते योनिर्ऋत्विय इत्येताभ्याम्" इति । द्वितीयमन्त्रः संहितायामपि पठितत्वात्सूत्रकारेण सर्वोऽपि न पठितः । (जातवेद इति-) हे जातवेदः! जातवेदनिकाग्ने! भुवनस्य रेतः सर्वलोकस्य कारणभूतमाधातव्याग्निरूपम् इह सिञ्च अनयोररण्योर्निषिञ्च । यत् रेतस्तपसोऽस्मात्संतापनाज्जनिष्यत उत्पत्स्यते तादृशं रेतः सिञ्चेति पूर्वत्रान्वयः । योऽग्निराधातव्यो मयोभूः सुखस्य भावयिता हव्यवाहं हविषो वोढारं शमीगर्भात् अरणिरूपादश्वत्थात् जनयन् जनयितुकामो निषिञ्चेति पूर्वत्रान्वयः ॥

(१५८) द्वितीयमन्त्रपाठस्तु—(अयमिति-) हे जनयितव्याग्ने! अयम् अरणिद्वयसंघः ते तवोत्पत्त्यर्थम् ऋत्वियः योनिः ऋतुयुक्तमुत्पत्तिस्थानं यतो योनेः जातः त्वम् अरोचथाः लोके दीप्तिमानाभूः । योनिमेतदरणिरूपं जानन्नारोह । अथ अनन्तरं नः अस्माकं रयिं धनं वर्धय ॥

(१५९) कल्पः—"अपेत वीतेति गार्हपत्यायतनमुद्धत्य" इति । यमपुरुषाः संबोध्यन्ते । "येनमेव देवयजनमस्मै निर्याच्य" इत्येतन्मन्त्रब्राह्मणे समाम्नानात् । (अपेतेति-) हे यमपुरुषाः! अत्र अस्मिन्देशे पुराणा ये यूयं स्थ नूतनाः च ये यूयं स्थ ते सर्वेऽप्यतो देशात् अपेत अपगच्छत । अपगम्य च वीत परस्परं वियुक्ता गच्छत । पुनरपि वि दूरं सर्पत । यमो राजेदमवस्थानम् अदात् यजमानाय दत्तवान् । पितरः चेमं लोकं स्थानविशेषम् अस्मै यजमानार्थम् अक्रन् कृतवन्तः ॥

(१६०) कल्पः—"सिकतानामर्धं द्वैधं विभज्यार्धं गार्हपत्यायतने निवपत्यर्धं दक्षिणाग्नेरर्धं त्रेधं विभज्य पूर्वेष्वेतेनैव कल्पेन सर्वान्पार्थिवान्निवपति । अग्नेर्भस्मासीति सिकता निवपति" इति । पाठस्तु—हे सिकते! अग्नेर्भस्म भासमानहेतुः त्वम् असि तथा अग्नेः पुरीषं पूरणहेतुस्त्वम् असि ॥

(१६१) कल्पः—"संज्ञानमित्यूषांस्तान्निवपन्यददश्चन्द्रमसि कृष्णं तदिहास्त्विति मनसा ध्यायति" इति । पाठस्तु—(संज्ञानमिति-) हे ऊष! संज्ञानं सम्यग्ज्ञानहेतुः कामधरणं कामानां धारणहेतुश्च त्वम् असि । ते त्वदीयं यत् कामधरणं कामधारणसामर्थ्यं तत् मयि अपि भूयात् ॥

(१६२) कल्पः—"सं या वः प्रियास्तनुव इत्येषा । सं वः सृजामि हृदयानि सꣳसृष्टं मनो अस्तु वः सꣳसृष्टः प्राणो अस्तु व इत्येताभ्यां वानस्पत्यान्सꣳसृज्य सिकतावन्निवपति" इति । अत्र "सं वः सृजामि" इति मन्त्रः पूर्वमाम्नातः । (सं व इति-) हे वानस्पत्यसंभाराः! वः युष्माकं हृदयानि संसृजामि परस्परमनुरक्तानि करोमि । तथा वः युष्माकं मनः वचश्च संसृष्टमस्तु । हृदयवाक्येन परस्परस्नेहोऽपि विवक्षितः । मनोवाक्येन कार्येष्वैकमत्यम् । तथा वः युष्माकं प्राणः च संसृष्टोऽस्तु । अनेनैकविधा प्रवृत्तिर्विवक्षिता ॥

---

१ आप. श्रौ. सू. ५. ८. ५. । २ आप. श्रौ. सू. ५. ९. १. । ३ तै. सं. २. ५. ११. । ४ आप. श्रौ. सू. ५. ९. ४-५-६. । ५ आप. श्रौ. सू. ५. ९. ६. । ६ आप. श्रौ. सू. ५. १०. २. । ७ वद्विभज्य निवप° इति पा० ।

वृत्रतूः । यस्ते देवेषु महिमा सुवर्गः (२१) । यस्त आत्मा पशुषु प्रविष्टः । पुष्टिर्या ते मनुष्येषु पप्रथे । तया नो अग्ने जुषमाण एहि । [१७४]दिवः पृथिव्याः पर्यन्तरिक्षात् । वातात्पशुभ्यो अध्योषधीभ्यः । यत्र यत्र जातवेदः संबभूथ । ततो नो अग्ने जुषमाण एहि । [१७५]प्राचीमनु प्रदिशं प्रेहि विद्वान् । अग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो विभाहि (२२) । ऊर्जं नो धेहि द्विपदे चतुष्पदे । [१७६]अन्वग्निरुषसामग्रमख्यत् । अन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीन् । अनु द्यावापृथिवी आततान । [१७७]विक्रमस्व महाँ असि । वेदिषन्मानुषेभ्यः । त्रिषु लोकेषु जागृहि । [१७८]यदिदं दिवो यददः पृथिव्याः । संविदाने रोदसी संबभूवतुः (२३) । तयोः पृष्ठे सीदतु जातवेदाः ।

हेऽग्ने त्वं **सपत्नतूरसि** वैरिहिंसकोऽसि । तथा **वृत्रतूः** धर्मबुद्धेरावरकाणां पापानां हिंसकोऽसि । सोऽयमेको मन्त्रः । हेऽग्ने **देवेषु** मध्ये कर्मफलभूतः स्वर्गरूपो **यस्ते महिमा पशुषु** क्षीरादिहविःस्वरूपेण **प्रविष्टो** यस्तव **आत्मा**ऽत्यन्तप्रियः पदार्थो मनुष्येषूदराग्निजनिता **या [ते]** त्वदीया पुष्टिः **पप्रथे** प्रसिद्धा वर्तते । **तया** पुष्ट्या तदुपलक्षितस्वर्गक्षीराभ्यां च **नः** अस्मान् **जुषमाण एहि** ॥

(१७४) असौ द्वितीयो मन्त्रः—**(दिव इति-)** **दिवः पृथिव्या अन्तरिक्षात्** वा उपरि **वातात्पशुभ्य ओषधिभ्यः** चोपरि तथा **यत्र यत्र** देशविशेषे हे **जातवेदः संबभूथ** उत्पन्नोऽसि । हे **अग्ने ततः** सर्वस्मात्स्थानात् **नः** अस्मान् **जुषमाणः एहि** ॥

(१७५) अनन्तरभाविनस्त्रयो मन्त्राः प्रणयनकाले गमनार्थाः । तत्र प्रथममाह—**(प्राचीमिति-)** हे **अग्ने! प्राचीं** पूर्वां **प्रदिशं** प्रकृष्टां दिशमनुलक्ष्य **विद्वान्** मार्गाभिज्ञः **प्रेहि** प्रकर्षेण गच्छ । **अग्नेः** गार्हपत्यस्येह **पुरः अग्निर्भव** अस्मिन्देवयजने पूर्वदिग्वर्ती वह्निर्भव । **दीद्यानः** स्वयं प्रकाशमानो **विश्वा आशा विभाहि** सर्वा दिशः प्रकाशय । **नः** अस्मदीयाय **द्विपदे** मनुष्याय **चतुष्पदे** पशवे च **ऊर्जं** रसं **धेहि** संपादय । अयं मन्त्रो "धर्मः शिरः" इत्यनुवाकेऽपि समाम्नातः । प्रयोजनं तु द्विराम्नातस्य सूत्रान्तरे द्रष्टव्यम् ॥

(१७६) अथ द्वितीयमाह—**(अन्वग्निरिति-)** अयम् **अग्निरुषसामग्रम्** प्रातःकालेऽपक्रमम् **अन्वख्यत्** अनुक्रमेण प्रकाशितवान् । **प्रथमः** देवेषु मुख्योऽयं **जातवेदाः अहानि** दिवसानन्वख्यत् । किंच **सूर्यस्य पुरुत्रा** सर्वानपि **रश्मीन्** अन्वख्यत् तथा **द्यावापृथिव्यावनु** क्रमेण **आततान** सर्वतो व्याप्तवान् । यद्यप्ययं मन्त्रो नाऽऽपस्तम्बेन विनियुक्तस्तथापि सूत्रान्तरानुसारेणात्र विनियोगो द्रष्टव्यः ॥

(१७७) अथ तृतीयमाह—**(विक्रमस्वेति-)** हेऽग्ने **विक्रमस्व** अनिष्टनिवारणे पराक्रमं कुरु । त्वं **महानसि** अधिकशक्तियुक्तोऽसि **मानुषेभ्यः** मनुष्याणामर्थे **वेदिषन्** वेद्यामुपविष्टः सन् **त्रिषु लोकेषु जागृहि** यजमानं नेतुं सावधानो भव ॥

(१७८) कल्पः—"यदिदं दिवो यददः पृथिव्याः, संविदाने रोदसी संबभूवतुस्तयोः पृष्ठे सीदतु जातवेदाः, शंभूः प्रजाभ्यस्तनुवे स्योन इत्यभिमन्त्र्य" इति । **(यदिदमिति-)** **यदिदम्** [illegible] **दिवः** [illegible] पृथिव्यां वर्तते, **यत्** च **अदः** कृष्णाख्यं **पृथिव्याः** संबन्धि दिवि चन्द्रमसि वर्तते तेनोभयेन [illegible] । **रोदसि** द्यावापृथिव्यौ **संविदाने** ऐकमत्यं गते **संबभूवतुः** । पूर्वमेकी [illegible] **तयोः** [illegible] द्यावापृथिव्योः **पृष्ठे** उपरि **जातवेदाः सीदतु** । कीदृशः **प्रजाभ्यः शंभूः** प्रजानां सुखस्य भावयिता **तनुवे स्योनः** स्वशरीराय च सुखकरः ॥

---

१ तै. सा. १. १. ५. । २ 'प्रमू [illegible]' इति पा. ३ अप. [illegible] ५. १५. ५. ।

शंभूः प्रजाभ्यस्तनुवे स्योनः । [१७९]प्राणं त्वाऽमृत आदधामि । अन्नादमन्नाद्याय । गोप्तारं गुप्त्यै । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः । शुक्रं ज्योतिरजस्रम् । तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाऽग्ने ब्रह्मणा । आनशे व्यानशे सर्वमायुर्व्यानशे । (२४) । [१८०]नर्य प्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्यमाणां च । अमृते सत्ये प्रतिष्ठिताम् । [१८१]अथर्व पितुं मे गोपाय । रसमन्नमिहाऽऽयुषे । अदब्धायोऽशीततनो । अविषं नः पितुं कृणु । [१८२]शꣳस पशून्मे गोपाय । द्विपादो ये चतुष्पदः (२५) । अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । [१८३]सप्रथ सभां मे गोपाय । ये च सभ्याः सभासदः । तानि-

(१७९) अनन्तरमन्त्रा आहवनीयाधाने सूत्रकारेणोदाहृताः । तत्पाठस्तु—(प्राणमिति-) हे! आहवनीय प्राणरूपं [त्वा] त्वाम् अमृते स्थाने विनाशरहिते आदधामि । अस्माकमन्नाद्यसिद्ध्यर्थम् अन्नादं त्वामादधामि । रक्षणार्थं गोप्तारं त्वामादधामि । सोऽयमेको मन्त्रः ॥ हे शुक्र! दीप्यमानाग्ने [ते] तव यच्छुक्रं वर्चः निर्मला कान्तिर्या च शुक्रा तनूः निर्मलो देहो यच्च अजस्रं निरन्तरं शुक्रं ज्योतिः निर्मलमितरभासकत्वं तेन सर्वेण युक्तो मे मदर्थं दीदिहि प्रकाशस्व तेन कारणेन हे अग्ने! अग्निना ब्रह्मणाग्निप्रकाशकेन मन्त्रेण[त्वा]त्वाम् आदधे । अयं द्वितीयो मन्त्रः । अयमग्निः आनशे भोक्तृदेहं व्याप्तवान् व्यानशे विविधं भोग्यजातं व्याप्तवान् । तथा सर्वमायुः अपमृत्युपरिहारेण व्यानशे व्याप्तवान् । अयं तृतीयो मन्त्रः । तावेतौ द्वितीयतृतीयौ "घर्मः शिरः" इत्यनुवाकेऽप्याम्नातौ । तयोः प्राचीमिति मन्त्रवत्स्थयुपयोगः सूत्रान्तरे द्रष्टव्यः । यद्वाऽस्यानुवाकस्य मन्त्रकाण्डानुरूपत्वाद् घर्मः शिर इत्यादिकमप्यत्रलमेवेति दर्शयितुं तदेकदेशोऽत्र पठितः । ब्राह्मणसंबन्धार्थं तत्राऽऽम्नानं द्रष्टव्यम् ॥

(१८०) यदुक्तं सूत्रकारेण—"अथ विराट्क्रमैर्यजमान उपतिष्ठते" इति, तत्र प्रथमं विराट्क्रममन्त्रमाह—(नर्य इति-) हे नर्य! मनुष्येभ्यो हित गार्हपत्य मे मदीयां प्रजां गोपाय । किमर्थम् अमृतत्वाय जीवसे अपमृत्युरहितजीवनाय । कीदृशीं प्रजाम्? [जाताम्] पूर्वमुत्पन्नाम् [जनिष्यमाणां] इतःपरमुत्पत्स्यमानां च । तथा [अमृते] अमृतत्वहेतौ सत्ये प्रतिष्ठितां सर्वदा सत्यवादिनीमित्यर्थः ॥

(१८१) अथ द्वितीयमाह—(अथर्व इति-) अथर्व! पूर्वमथर्वाख्येण महर्षिणा मथितत्वात्तद्रूपत्वम् । तथा चान्यत्राऽऽम्नातम्—"अथर्वा त्वा प्रथमो निरमन्थदग्ने" इति । तादृश हे दक्षिणाग्ने मे पितुं मदीयमन्नं गोपाय । यो रसः क्षीरादिर्यच्चान्नं व्रीहियवादिकं तदुभयमिह शरीर आयुषे आयुरर्थं स्थापयेति शेषः । हे अदब्धायः! केनाप्यहिंसितागमन न खलु त्वदीयमागमनं केनचिदपि निवारयितुं शक्यम् । हे अशीततनो! उष्णशरीर नः अस्मदीयं पितुम् अन्नम् अविषं विषरहितं [कृणु] कुरु ॥

(१८२) अथ तृतीयमाह—(शꣳस्येति-) हे शंस्य! ऋत्विग्भिः प्रशस्यमानाऽऽहवनीय मे मम पशून्गोपाय ये पशवो द्विपादः मनुष्यरूपाः येऽपि चतुष्पदः गवादिरूपास्तेष्वपि चतुष्पात्सु अष्टाशफाः गोमहिष्यादय एकशफाः [आशुगाः] आशुगामिनश्वाश्वादयो ये सन्ति तान्सर्वान् इह लोके हे अग्ने! गोपाय ॥

(१८३) अथ चतुर्थमाह—(सप्रथेति-) प्रथया ख्यात्या सहितः सप्रथः । तादृश हे सभ्य मे सभाम् अधिदेवनस्थानं गोपाय । ये च सभ्याः सभायोग्याः सभासदः सभायामुपविष्टाः सन्ति तान् सर्वान् इन्द्रियावतः चक्षुरादीन्द्रियपाटवयुक्तान् कुरु । ते च सभ्याः सर्वमायुः शतसंवत्सरमायुः उपासताम् ...ाम् ॥

१ °वत्स्थयुपयोगः सू° इति पा० २ आप. श्रौ. सू. ५. १८. २. । ३ °क्रमहे° इति पा० तै. सं. ४. १. ३. ।

(तै. ब्रा. कां. २ प्र. ५ अ. ८)

उपावरोह जातवेदः पुनस्त्वम्। देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजाꣳरयिमस्मासु धेहि। अजस्रो दीदिहि नो दुरोणे ॥

(तै. आ. प्र. ४ अ. २२)

यास्ते अग्ने घोरास्तनुवः। क्षुच्च तृष्णा च। अस्नुक्चानाहुतिश्च। अशनया च पिपासा च। सेदिश्चामतिश्च। एतास्ते अग्ने घोरास्तनुवः। ताभिरमुं गच्छ। योऽस्मान्द्वेष्टि। यं च वयं द्विष्मः।

(तै. आ. प्र. ४ अ. २३)

निर्क्षच्च लीहितिश्च निहितिश्च। उष्णा च शीता च। उग्रा च भीमा च। सदाम्नी सेदिरनिरा। एतास्ते अग्ने घोरास्तनुवः। ताभिरमुं गच्छ। योऽस्मान्द्वेष्टि। यं च वयं द्विष्मः ॥

---

(१८६) (उपावरोहेति-) हे **जातवेदः!** पुनरपि **त्वमुपावरोह** अरण्योः सकाशादुत्पन्नो भव। अवरोहं च **प्रजानन्** अस्य देवस्येदं हविरिति प्रकर्षेण जानन् नः अस्मदीयं **हव्यं देवेभ्यो वह** प्रापय। आयुरादिकमस्मासु संपादय। **अजस्रः** निरन्तरं वर्तमानस्त्वं **नो दुरोणे** अस्मदीये गृहे **दीदिहि** दीप्यस्व। एतस्य विनियोगमापस्तम्ब आह—"उपावरोह जातवेद इति वर्तमानमभिमन्त्रयते" इति ॥

(१८७) कल्पः—"व्याख्याता घोरास्तन्वोऽरण्योऽनुवाक्यो गण उत्तरौ चानुवाकौ" इति। घोरतनूनां प्रतिपादकौ द्वावनुवाकौ, तयोश्चापस्तम्ब आधानप्रतिपादके सूत्रे व्याख्याताः। अरण्योऽनुवाक्यो गणस्तौ हि तत्सूत्रेऽभिहितम्। तथा द्वयोरनुवाक्ययोर्गणत्वम् उक्तः। स च विकल्पितः। तस्य विनियोगो राजसूयप्रकरणे सूत्रकारेणाभिहितः—"मारुतमेकविंशतिकपालं निर्वपति वैश्वदेवीमामिक्षां तस्यामरण्येऽनुवाक्यैर्गणैः कपालान्युपदधाति" इति। ब्राह्मणं चाऽऽम्नातम्—"योऽरण्येऽनुवाक्यो गणस्तं मध्यत उपदधाति" इति। तत्र घोरतनुप्रतिपादकं प्रथममनुवाकमाह—(यास्त इति-) हे **अग्ने ते** तव सम्बन्धिन्यो **घोराः** क्रूराः **तनुवः याः** सन्ति। कास्ता इति चेत् क्षुदादिभिरनन्तरश्रुताभिः शब्दैः प्रतिपादिताः। हे **अग्ने! ते** तव संबन्धिन्य **एता** उक्ता **घोरास्तनुवः, ताभिः** तनुभिः सह **यः** अस्माकं द्वेष्टा यश्च द्वेष्यः **अमुं** द्विविधं पुरुषं गच्छ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

---

(१८८) अथ घोरतनुप्रतिपादकं द्वितीयमनुवाकमाह—**निर्क्षादीन्यनिरान्तानि** तनुनामानि। अन्यत् पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

इति कृष्णयजुर्वेदीयमाधानप्रकरणं समाप्तम् ॥

---

१ आप. श्रौ. सू. ५. १०. १२. । २ आप. श्रौ. सू. १८. १२. १२. । ३ तै. ब्रा. १. ७. ७. ।

आधानमन्त्रवाक्यसूची ।

इत्याधानमन्त्रवाक्यसूची समाप्ता ।



कृष्णयजुर्वेदीयं

पुनराधानप्रकरणम् ।

पदभाष्यसहिता पुनराधेयसंहिता ॥

तत्र प्रथमकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः ।

हरिः ॐ ।

देवासुराः संयत्ता आसन्ते देवा विजयमुपयन्तोऽग्नौ वामं वसु सं न्यदधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत्तद्देवा विजित्यावरुरुत्समाना अन्वायन्तदस्य सहसाऽदित्सन्त सोऽरोदीद्यदरो-

देवासुरा इति देव-असुराः । संयत्ता इति सं-यत्ताः । आसन् । ते । देवाः । विजयमिति वि-जयम् । उपयन्त इत्युप-यन्तः । अग्नौ । वामम् । वसु । सम् । नीति । अदधत । इदम् । उ । नः । भविष्यति । यदि । नः । जेष्यन्ति । इति । तत् । अग्निः । नीति । अकामयत । तेन । अपेति । अक्रामत् । तत् । देवाः ।

सायणाचार्यविरचितं पुनराधेयभाष्यम् ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
[अध्वर्योः प्रकृतौ मन्त्राः प्रपाठकचतुष्टये ।
वर्णिताः पुनराधेयं पञ्चमाद्ये प्रवक्ष्यते ॥ २ ॥
आधानादूर्ध्वमेवैषा वक्तव्या पुनराहितिः ।
तथाऽप्यध्ययनस्यायं क्रमो वरवृतत्वतः ॥ ३ ॥
सरस्वती स्वपुत्राय तद्बुद्धिस्थे क्रमे वरम् ।
ददौ तेन क्रमेणैव पठन्त्यन्येऽपि पाठकाः ॥ ४ ॥
एकादशानुवाकाः स्युः पञ्चमेऽस्मिन्प्रपाठके ।
तत्रादौ पुनराधेयमनुवाकचतुष्टये ॥ ५ ॥
ततः षट्केऽग्न्युपस्थानं काम्ययाज्यास्तयाऽन्तिमे ।
विधीयतेऽनुवाकेऽस्मिन्नादिमे पुनराहितिः ॥ ६ ॥]

उद्वास्य पुनरादधीतेति विधास्यति । तत्र पुनराधेयस्याग्निदेवतां विधातुमग्निविषयमुपाख्यानमुदाहरन्प्रसङ्गाद्रजतस्य यज्ञे दक्षिणात्वं निषेधति—

(१) (देवासुरा इति-) देवाः च असुराः च संयत्ता युद्धयुक्ताः । विजयम् । [उपयन्तः] प्राप्नुवन्तो देवाः तदा तेभ्यः असुरेभ्यः अपहृतं मणिमुक्तादिकं श्रेष्ठं वसु रक्षणायाग्नौ [संन्यदधत] निक्षिप्तवन्तः । कथंचिदसुराणां विजये सत्येतद्धनमस्माकमापद्युपयुज्येतेति देवानामाशयः । तत् धनम् अग्निर्न्यकामयत इच्छां कृतवान् । तेन धनेन सह अपाक्रामत् पलायनमकुरुत । देवाः पुण्यवशेनासुरान् विजित्य तत् धनम् अवरुरुत्समानाः अवरोद्धुमिच्छावन्त अनु अग्नेः पश्चात् आयन् तत् धनं बलात्कारेणाऽऽदातुमिच्छावन्तः ।

दीत्तद्रुद्रस्य रुद्रत्वं यदश्र्वशीयत तत् (१) रजतꣳ हिरण्यमभवत्तस्माद्रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि यो बर्हिषि ददाति पुराऽस्य संवत्सराद्गृहे रुदन्ति तस्माद्बर्हिषि न देयꣳ सोऽग्निरब्रवीद्भाग्यसान्यथ व इदमिति पुनराधेयं ते केवलमित्यब्रुवन्नृध्नवत्खलु स इत्यब्रवीद्यो मद्देवत्यमग्निमादधाता इति तं पूषाऽधत्त तेन (२) पूषाऽऽर्ध्नोत्तस्मात्पौष्णाः पशव उच्यन्ते तं त्वष्टाऽधत्त तेन त्वष्टाऽऽर्ध्नोत्तस्मात्त्वाष्ट्राः पशव उच्यन्ते तं मनुराऽधत्त तेन मनुरार्ध्नोत्तस्मान्मानव्यः प्रजा उच्यन्ते तं धाताऽधत्त तेन धाताऽऽर्ध्नोत्संवत्सरो वै धाता तस्मात्संवत्सरं प्रजाः पशवोऽनु प्र जायन्ते य एवं पुनराधेयस्यर्द्धिं वेद (३) ऋध्नोत्येव योऽस्यैवं बन्धुतां वेद बन्धुमान्भवति भागधेयं वा अग्निराहित

विजित्येति वि-जित्य । अवरुरुत्समाना इत्यव-रुरुत्समानाः । अन्विति । आयन् । तत् । अस्य । सहसा । एति । अदित्सन्त । सः । अरोदीत् । यत् । अरोदीत् । तत् । रुद्रस्य । रुद्रत्वमिति रुद्र-त्वम् । यत् । अश्रु । अशीयत । तत् । (१) रजतम् । हिरण्यम् । अभवत् । तस्मात् । रजतम् । हिरण्यम् । अदक्षिण्यम् । अश्रुजमित्यश्रु-जम् । हि । यः । बर्हिषि । ददाति । पुरा । अस्य । संवत्सरादिति सं-वत्सरात् । गृहे । रुदन्ति । तस्मात् । बर्हिषि । न । देयम् । सः । अग्निः । अब्रवीत् । भागी । असानि । अथ । वः । इदम् । इति । पुनराधेयमिति पुनः-आधेयम् । ते । केवलम् । इति । अब्रुवन् । ऋध्नवत् । खलु । सः । इति । अब्रवीत् । यः । मद्देवत्यमिति मत्-देवत्यम् । अग्निम् । आदधाता इत्या-दधाति । इति । तम् । पूषा । एति । अधत्त । तेन । (२) पूषा । आर्ध्नोत् । तस्मात् । पौष्णाः । पशवः । उच्यन्ते । तम् । त्वष्टा । एति । अधत्त । तेन । त्वष्टा । आर्ध्नोत् । तस्मात् । त्वाष्ट्राः । पशवः । उच्यन्ते । तम् । मनुः । एति । अधत्त । तेन । मनुः । आर्ध्नोत् । तस्मात् । मानव्यः । प्रजा इति प्र-जाः । उच्यन्ते । तम् । धाता । एति । अधत्त । तेन । धाता । आर्ध्नोत् । संवत्सर इति सं-वत्सरः । वै । धाता । तस्मात् । संवत्सरमिति सं-वत्सरम् । प्रजा इति प्र-जाः । पशवः । अनु । प्रेति । जायन्ते । यः । एवम् । पुनराधेयस्येति पुनः-आधेयस्य । ऋद्धिम् । वेद । (३) ऋध्नोति । एव ।

सः अग्निः **अरोदीत्** रोदनं कृतवान् । प्रसंगाद्रुद्रशब्दस्य प्रवृत्तिनिमित्तं विधत्ते—यतो रोदनं कृतवांस्ततो **रुद्रस्य रुद्रत्वं यदश्रु** नेत्रात्मकाद्बिन्दुः **अशीयत** भूमावपतत् **तद्रजतं हिरण्यम् अभवत्** रजतरूपं धनम् अभवत् । अत्र हिरण्यशब्दस्य धनसामान्यवाचित्वात् **रजतं हिरण्यम्** इत्यविरुद्धम् । तस्याश्रुजत्वेन दक्षिणां प्रत्ययोग्यत्वात्तद्दाने **संवत्सरात्** अर्वागेतद्गृहे किंचिद्रोदननिमित्तं भवति **तस्माद्बर्हिषि** यज्ञे तत् **न** दद्यात् ॥

(२) अग्निदैवतं पुनराधेयं विदधाति—(**स इति-**) आदावसाधारणेन भागेन युक्तो भवानि, पश्चादिदं वसु युष्मभ्यं दास्यामीत्यग्निनोक्ता देवास्त्वैतत्पुनराधेयमिति भागं ददुः । तेन तुष्टोऽग्निरिदमब्रवीत् **यो मद्देवत्यं** हविः कृत्वा **अग्निं** पुनरादध्यात्स खलु समृद्धिमानिति । तस्मात्समृद्ध्यर्थं पुनराधेयं हविरग्निदैवतं कुर्यादित्यर्थः ॥

(३) तामेव समृद्धिमुदाहरणेन स्पष्टयति—(**तमिति-**) पूषत्वष्टृमनुसंवत्सराभिमानिधातृभिः पश्वादिसमृद्धिर्लब्धा ॥

(४) समृद्धिवेदनं प्रशंसति—(**य इति-**) ॥

(५) पूषादिभिस्त्वाग्निबन्धुमत्त्वस्य वेदनं प्रशंसति—(**य इति-**) ॥

(६) पुनराधेयं विधत्ते—(**भागधेयमिति-**) प्रथमाधानेनाऽऽहितोऽग्निरसाधारणभागवाञ्छयाऽधिकोऽयं चकार, तच्छान्तिरनेन भवति । तस्मादुद्वासनेच्छा पूर्वाग्निम् **उद्वास्य पुनः** अन्यमग्निमादध्यात् । इष्टिमुद्वासनं च सूत्रकारो दर्शयति—"आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालं वारुणं दशकपालमथैतस्मिन्नेवाऽऽहवनीये चरुमग्निमुद्वासयिष्यन्" इति । "पर्णमयीमिष्टिं ज्वलतोऽग्नीनुत्सृजति" इति च ॥

इच्छमानः प्रजां पशून्यजमानस्योपं दोद्रावोद्वास्य पुनरा दधीत भागधेयेनैवै- नꣳ समर्धयत्यथो शान्तिरेवास्यैषा पुनर्वस्वोरा दधीतैतद्वै पुनराधेयस्य नक्षत्रं यत्पुनर्वसू स्वायामेवैनं देवतायामाधाय ब्रह्मवर्चसी भवति दर्भैरा दधात्ययात- यामत्वाय दर्भैरा दधात्यद्भ्य एवैनमोषधीभ्योऽवरुध्याऽऽधत्ते पञ्चकपालः पु- रोडाशो भवति पञ्च वा ऋतवं ऋतुभ्य एवैनमवरुध्याऽऽधत्ते (४) ॥

(अशीयत सत्तेन वेद दर्भैः पञ्चविꣳशतिश्च ।)

यः । अस्य । एवम् । बन्धुताम् । वेद । बन्धुमानिति बन्धु-मान् । भवति । भागधेयमिति भाग-धेयम् । वै । अग्निः । आहित इत्या-हितः । इच्छमानः । प्रजामिति प्र-जाम् । पशून् । यजमानस्य । उपेति । दोद्राव । उद्वास्येत्युत्-वास्य । पुनः । एति । दधीत । भागधेयेनेति भाग-धेयेन । एव । एनम् । समिति । अर्धयति । अथो इति । शान्तिः । एव । अस्य । एषा । पुनर्वस्वोरिति पुनः-वस्वोः । एति । दधीत । एतत् । वै । पुनराधेयस्येति पुनः-आधेयस्य । नक्षत्रम् । यत् । पुनर्वसू इति पुनः-वसू । स्वायाम् । एव । एनम् । देवतायाम् । आधायेत्या-धाय । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । भवति । दर्भैः । एति । दधाति । अयातयामत्वायेत्ययातयाम-त्वाय । दर्भैः । एति । दधाति । अद्भ्य इत्यत्-भ्यः । एव । एनम् । ओषधीभ्य इत्योषधि-भ्यः । अवरुध्येत्यव-रुध्य । एति । धत्ते । पञ्चकपाल इति पञ्च-कपालः । पुरोडाशः । भवति । पञ्च । वै । ऋतवः । ऋतुभ्य इत्यृतु-भ्यः । एव । एनम् । अवरुध्येत्यव-रुध्य । एति । धत्ते (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमकाण्डे

पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

---

(७) कालं विधत्ते—(**पुनरिति-**) पुनरावर्तते वासं वस्वनयोरिति पुनर्वसु । ततो नक्षत्रात्मिका देवता स्वकीया ॥

(८) पुनराधेयस्य प्रथमाधानविकृतित्वात्काष्ठैराधानप्राप्तावपोद्य दर्भान्विधत्ते—(**दर्भैरिति-**) अत्रापि काष्ठै- राधाने गतसारत्वं स्यात् । अत एव सूत्रकार आह—"आयतनेषु पुराणान्दर्भान्सꣳस्तीर्य भूमिर्भूम्नेति सर्प- राज्ञीभिर्गार्हपत्यमादधाति" इति ॥

(९) दर्भविधिमनूद्य प्रशंसति—(**दर्भैरिति-**) इन्द्रो वृत्रमहन्नित्यादौ दार्शिकब्राह्मणे च दर्भाणामप्कार्यत्वा- भिधानादप्रूपत्वमोषधिरूपत्वं च विस्पष्टम् ॥

(१०) अस्मिन्पुनराहितेऽग्नौ कर्तव्याया इष्टेरग्निर्देवता पूर्वं विहिता । अथ द्रव्यं विधत्ते—(**पञ्चकपाल इति-**) बह्वृचब्राह्मणे द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेनेत्याम्नानादृतूनां पञ्चसंख्या ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे

पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

---

१ आप. श्रौ. सू. ५. २७. ९ । २ तै. सं. २. ५. २. ।

अथ प्रथमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ।

[11]परा वा एष यज्ञं पशून्वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे [12]वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुराऽन्नमक्षन्पङ्क्त्यो याज्यानुवाक्या भवन्ति पाङ्क्तो यज्ञः पाङ्क्तः पुरुषो देवानेव वीरं निरवदायाग्निं पुनरा (१) धत्ते [13]शताक्षरा भवन्ति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति [14]यद्वा अग्निराहितो नर्ध्यते ज्यायो भागधेयं निकामयमानो यदाग्नेयꣳ सर्वं भवति सैवास्यर्द्धिः [15]सं वा एतस्य गृहे वाक्सृज्यते योऽग्निमुद्वासयते स

परेति । वै । एषः । यज्ञम् । पशून् । वपति । यः । अग्निम् । उद्वासयत इत्युत्-वासयते । पञ्चकपाल इति पञ्च-कपालः । पुरोडाशः । भवति । पाङ्क्तः । यज्ञः । पाङ्क्ताः । पशवः । यज्ञम् । एव । पशून् । अवेति । रुन्धे । वीरहेति वीर-हा । वै । एषः । देवानाम् । यः । अग्निम् । उद्वासयत इत्युत्-वासयते । न । वै । एतस्य । ब्राह्मणाः । ऋतायव इत्यृत-यवः । पुरा । अन्नम् । अक्षन् । पङ्क्त्यः । याज्यानुवाक्या इति याज्या-अनुवाक्याः । भवन्ति । पाङ्क्तः । यज्ञः । पाङ्क्तः । पुरुषः । देवान् । एव । वीरम् । निरवदायेति निः-अवदाय । अग्निम् । पुनः । एति । (१) धत्ते । शताक्षरा इति शत-अक्षराः । भवन्ति । शतायुरिति शत-आयुः । पुरुषः । शतेन्द्रिय इति शत-इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । यत् । वै । अग्निः । आहित इत्या-हितः । न । ऋध्यते । ज्यायः । भागधेयमिति भाग-धेयम् । निका-

(११) द्वितीयानुवाके याज्याद्यङ्गजातं विधित्सुः पूर्वोक्तं द्रव्यविधिमनूद्य प्रशंसति—(परा वा इति-) परावपति विनाशयति । धानादिभिर्हविर्भिर्यज्ञः पाङ्क्तः । पङ्क्तिच्छन्दसः पशुहेतुत्वात्पशवोऽपि पाङ्क्ताः ॥

(१२) याज्यानुवाक्ये विधत्ते—(वीरहेति-) देवानां मध्ये वीरोऽग्निः । तद्वधकारिणो यजमानस्यान्नम् ऋतायवः सत्यमिच्छन्तो ब्राह्मणाः पुरा न एव अक्षन् नैव भुक्तवन्तः । "अद भोजने" इत्यस्य रूपम् । अत्र तत्परिहारार्थं न इत्यादयश्चतस्र ऋचः पङ्क्तयः । तासु प्रधानहविषो द्वे स्विष्टकृतो द्वे । ताश्चाग्निकाण्डे—अग्निर्मूर्धेत्यनुवाके इष्टकोपधानार्थत्वेनाऽऽम्नाताः । इह तु वाचनिकस्तद्विधिः । शाखान्तरे तु याज्याप्रस्तावे समाम्नाताः । पुरुषस्य हस्तद्वयपादद्वयशिरोभिः पञ्चभिः पाङ्क्तत्वम् । देवानेव देवानामेव मध्ये वीराग्निं निरवदाय तज्जन्यलक्षणवधभयान्निष्क्रम्य ॥

(१३) छन्दस्सु विद्यमानाक्षरसंख्यां प्रशंसति—(शताक्षरा इति-) अग्ने तमद्येत्येषा प्रथमा चतुर्विंशत्यक्षरा । अधा ह्यग्ने क्रतोः, आभिष्टे अद्येत्युभयोरेकैका पञ्चविंशत्यक्षरा । एभिर्नो अर्कैरित्यन्त्या षड्विंशत्यक्षरेति संभूय शताक्षराणि । अस्माभिमानिनो ब्रह्मणः स्वप्रमाणेन शतसंवत्सरायुष्ट्वात्तत्संनिधिमत्त्वादपि मन्त्रेण शतायुष्ट्वं, कर्माधर्माभ्यां तूत्कर्षापकर्षौ भवतः । शतनाडीषु संचाराद्दशेन्द्रियेषु शतसंख्या ॥

(१४) प्रधानकर्मेण इव प्रधानान्यभागधेयानामस्याग्नेयत्वं विधत्ते—(यद्वेति-) यजमानस्य यज्ञकामनार्द्धिः समृद्धकर्मानुष्ठेयः ॥

(१५) कैश्चिदत्र आज्यस्य विदन्वित्यादिषु चतुर्षु प्रयाजमन्त्रेषु संयुक्तत्वादग्निसंबन्धात्पूर्वं संयुक्तस्य तृतीयद्वितीयादिस्वचन्तानामग्निसंबन्धानां क्रमेण प्रयोगं विधत्ते—(सं वा इति-)अग्निमुद्वासयितुः एतस्य

१ ऋ. ६. ६. । २ तै. सं. ४. ४. ३. । ३ तै. आ. ३. ५. ५. ।

वाचꣳ सꣳसृष्टां यजमान ईश्वरोऽनु पराभवितोर्विभक्तयो भवन्ति वाचो विधृत्यै यजमानस्यापराभावाय (२) [१६]विभक्तिं करोति ब्रह्मैव तदकरुपाꣳशु यजति यथा वामं वसु विविदानो गूहति तादृगेव तदग्निं प्रति स्विष्टकृतं निराह यथा वामं वसु विविदानः प्रकाशं जिगमिषति तादृगेव तद्विभक्तिमुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः पशव एते आहुती यदभितः पुरोडाशमेते आहुती (३) जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णाति कृतयजुः संभृतसंभार इत्याहुर्न संभृत्याः संभारा न यजुः कर्त-

मयमान इति नि-कामयमानः । यत् । आग्नेयम् । सर्वम् । भवति । सा । एव । अस्य । ऋद्धिः । समितिं । वै । एतस्य । गृहे । वाक् । सृज्यते । यः । अग्निम् । उद्वासयत इत्युत्-वासयते । सः । वाचम् । सꣳसृष्टामिति सं-सृष्टाम् । यजमानः । ईश्वरः । अन्विति । पराभवितोरिति परा-भवितोः । विभक्तय इति वि-भक्तयः । भवन्ति । वाचः । विधृत्या इति वि-धृत्यै । यजमानस्य । अपराभावायेत्यपरा-भावाय । (२) विभक्तिमिति वि-भक्तिम् । करोति । ब्रह्म । एव । तत् । अकः । उपाꣳश्वित्युप-अꣳशु । यजति । यथा । वामम् । वसु । विविदानः । गूहति । तादृक् । एव । तत् । अग्निम् । प्रतीति । स्विष्टकृतमिति स्विष्ट-कृतम् । निरिति । आह । यथा । वामम् । वसु । विविदानः । प्रकाशमिति प्र-काशम् । जिगमिषति । तादृक् । एव । तत् । विभक्तिमिति वि-भक्तिम् । उक्त्वा । प्रयाजेनेति प्र-याजेन । वषट् । करोति । आयतनादित्या-यतनात् । एव । न । एति । यजमानः । वै । पुरोडाशः । पशवः । एते इति । आहुती इत्या-हुती । यत् । अभितः । पुरोडाशम् । एते इति । आहुती इत्या-हुती । (३) जुहोति । यजमानम् । एव । उभयतः । पशुभिरिति पशु-भिः । परीति । गृह्णाति । कृतयजुरिति कृत-यजुः । संभृ-

वाग्गृहे अवस्थितानां स्त्रीशूद्रादीनां वाग्भिः **संसृज्यते** तत्समा भवति तां **वाचमनु यजमानः** अपीतरवैलक्षण्यरूपस्योत्कर्षस्याभावात्पराभूतो भवति । एताभिस्तु विभक्तिभिः पुनराधेयस्याग्न्याधेयाद्वैलक्षण्ये सति **यजमानस्य** विलक्षणत्वेन वाग्विधृतौ सत्यां पराभवः शाम्यति । विभक्तयः सूत्रे दर्शिताः—"[१]अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्न इति चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्दधाति" इति । तथा चैवं मन्त्रपाठः संपद्यते—"समिधोऽग्नेऽग्न आज्यस्य वियन्तु । तनूनपादग्नावग्न आज्यस्य वेतु । इडो अग्निनाऽग्न आज्यस्य वियन्तु । बर्हिरग्निमग्न आज्यस्य वेतु" इति ॥

(१६) यथोक्तविभक्तिविधिमनूद्य प्रशंसति—**(विभक्तिमिति-) तत्** पुनराधेयं **ब्रह्मैव** अग्न्याधेयात्परिवृढमेव करोति ॥

(१७) अत्र मन्त्राणां नीचध्वनिं विधत्ते—**(उपांश्विति-) यथा** लोके श्रेष्ठं **वसु** लब्धवान्पुरुषो गोपायति तद्वत् ॥

(१८) स्विष्टकृत्युच्चध्वनिं विधत्ते—**(अग्निमिति-) निराह** निःशेषध्वनिं कुर्यात् **यथा** लोके श्रेष्ठं **वसु** लब्धवान्द्रव्यपतिः प्रसिद्धिं गन्तुमिच्छति तद्वत् ॥

(१९) पूर्वं विहितानां विभक्तीनां प्रयाजमन्त्रसंबन्धं विधत्ते—**(विभक्तिमिति-)** विभक्तिवचनप्रकारो दर्शितः । तदुक्तिसहितेन प्रयाजमन्त्रेण वषट्कारपूर्वं यजेत । तथा सति पूर्वोक्तवाक्संसर्गकृतपराभवरहित **आयतनात्** स्वगृहात् **नैति** न निर्गच्छति, किंतु स्वगृहे प्रतितिष्ठति ॥

(२०) पुनरूर्जा निवर्तस्व, सह रय्या निवर्तस्वेत्याभ्यां मन्त्राभ्यामाग्नेयपुरोडाशस्याधस्तादुपरिष्टाच्चाऽऽहुतिद्वयं विधत्ते—**(यजमान इति-)**

(२१) अत्र चोदकप्राप्तान्संभारानाधानमन्त्रांश्च वाजसनेयादिशाखान्तरमनुसृत्य पूर्वपक्षरूपेण निराचष्टे—

१ आप. श्रौ. सू. ५. २८. ६.

व्यमित्य[२२]थो खलु संभृत्या एव संभाराः कर्तव्यं यजुर्यज्ञस्य समृद्ध्यै [२३]पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टोऽनड्वान्पुनराधेयस्य समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति यत्रयत्रैवास्य न्यक्तं ततः (४) एवैनमव रुन्धे [२५]वीरहा वा एष देवानां योऽग्निमुद्वासयते तस्य वरुण एवर्णयादाग्निवारुणमेकादशकपालमनु निर्वपेद्यं चैव हन्ति यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्च्छति यजमानः (५) ॥

(आऽपराभावाय पुरोडाशमेते आहुती ततः पञ्चत्रिंशच्च ।)

तसंभार इति संभृत-संभारः । इति । आहुः । न । संभृत्या इति सं-भृत्याः । संभारा इति सं-भाराः । न । यजुः । कर्तव्यम् । इति । अथो इति । खलु । संभृत्या इति सं-भृत्याः । एव । संभारा इति संभाराः । कर्तव्यम् । यजुः । यज्ञस्य । समृद्ध्या इति सम्-ऋद्ध्यै । पुनर्निष्कृत इति पुनः-निष्कृतः । रथः । दक्षिणा । पुनरुत्स्यूतमिति पुनः-उत्स्यूतम् । वासः । पुनरुत्सृष्ट इति पुनः-उत्सृष्टः । अनड्वान् । पुनराधेयस्येति पुनः-आधेयस्य । समृद्ध्या इति सम्-ऋद्ध्यै । सप्त । ते । अग्ने । समिध इति सम्-इधः । सप्त । जिह्वाः । इति । अग्निहोत्रमित्यग्नि-होत्रम् । जुहोति । यत्रयत्रेति यत्र-यत्र । एव । अस्य । न्यक्तमिति नि-अक्तम् । ततः । (४) एव । एनम् । अवेति । रुन्धे । वीरहेति वीर-हा । वै । एषः । देवानाम् । यः । अग्निम् । उद्वासयत इत्युत्-वासयते । तस्य । वरुणः । एव । ऋणयादित्यृण-यात् । आग्निवारुणमित्याग्नि-वारुणम् । एकादशकपालमित्येकादश-कपालम् । अनु । निरिति । वपेत् । यम् । च । एव । हन्ति । यः । च । अस्य । ऋणयादित्यृण-यात् । तौ । भागधेयेनेति भाग-धेयेन । प्रीणाति । न । आर्तिम् । एति । ऋच्छति । यजमानः (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(कृतयजुरिति-) यजुःशब्देन सर्पराज्ञीप्रभृतय आधानमन्त्रा विवक्षिताः । संभारशब्देन सिकतोषादिसप्तद्रव्यविशेषाः विवक्षिताः । प्रथमाधाने यजुषामुच्चारितत्वात्संभाराणां च संपादितत्वादस्यापि कर्मविशेषस्याऽऽधानादत्यन्तभेदाभावेन यजुःसंभारयोः सिद्धत्वात्तदुभयं पुनः न कर्तव्यम् इति पूर्वः पक्षः । प्रथमाधाने वाजसनेयिनं सूत्रकार उदाजहार—"सप्त पार्थिवान्संभारानाहरत्येवं वानस्पत्यान्पञ्च पञ्च वा भूयसो वा पार्थिवान्संभारान्संभरेदिति वाजसनेयकम्" इति[1] ॥

(२२) सिद्धान्तमाह—(अथो खल्विति-) अथोशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अत्र सूत्रकारः पक्षद्वयमुदाजहार—"कृताकृताः संभारा यजूंषि च भवन्त्यपि वा पञ्च पार्थिवान्संभारानाहरत्येवं वानस्पत्यान्" इति[2] ॥

(२३) दक्षिणां विधत्ते—(पुनरिति-) भग्नः सन्दृंहितः पुनर्निष्कृतः । छिन्नं सत्सूचीतन्तुभ्यां स्यूतं पुनरुत्स्यूतम् । दौर्बल्येन भारं वोढुमशक्ततया परित्यक्तः सन्कथंचित्पोषणेन दृढीकृतः पुनरुत्सृष्टः ॥

(२४) तूष्णीमेव होतव्यमिति प्रथमाधानस्याङ्गत्वेन यदग्निहोत्रं विहितं तदत्र चोदकप्राप्तं तदपोद्य मन्त्रवद्विधत्ते—(सप्त त इति-) मन्त्रस्तु ब्राह्मणे व्याख्यास्यते[3] । अस्य पुनराधेयकर्तुर्यजमानस्य यदङ्गं यस्मिन्यस्मिन्प्रदेशे न्यक्तं निकृष्टं विस्मृतं तत एव प्रदेशान्मन्त्र एनम् अग्निं संपादयति ॥

(२५) अनुनिर्वाप्यं हविर्विधत्ते—(वीरहेति-) ऋणमिव यातयति पीडयतीति ऋणयात् । तौ यस्मान्निर्वापेणानुतृप्तौ तोषयति ॥

---

१ आप. श्रौ. सू. ५. ३. ४-५-६. । २ आप. श्रौ. सू. ५. २७. ७-८. । ३ तै. ब्रा. १. १. ६. ।

(अथ प्रथमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ।)

*[1]भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे । आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः । [2]त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ।

भूमिः । भूम्ना । द्यौः । वरिणा । अन्तरिक्षम् । महित्वेति महि-त्वा । उपस्थ इत्युप-स्थे । ते । देवि । अदिते । अग्निम् । अन्नादमित्यन्न-अदम् । अन्नाद्यायेत्यन्न-अद्याय । एति । दधे । एति । अयम् । गौः । पृश्निः । अक्रमीत् । असनत् । मातरम् । पुनः । पितरम् । च । प्रयन्निति प्र-यन् । सुवः । त्रिꣳशत् । धाम । वीति । राजति । वाक् । पतङ्गाय । शिश्रिये । प्रतीति । अस्य । वह । द्युभिरिति द्यु-भिः । अस्य ।

अथ **मीमांसा** । दशमाध्यायस्य तृतीयपादे चिन्तितम्—"एकादिना समुच्चेयं पुनर्निष्कृत इत्यदः । बाधकं वा समुच्चेयमुभयीरित्युदीरणात् ॥ आधानदक्षिणोपेतमुभयीरित्यनूद्यते । ददातीत्यविधायित्वात्कार्यैक्याद्बाधकं भवेत्" इति ॥ आधाने विकल्पिता गोद्रव्यदक्षिणा द्रव्यान्तरदक्षिणाश्च बहवः श्रूयन्ते—"एका देया षड् देया द्वादश देयाः" इत्यादिना । [3]पुनराधाने पुनर्निष्कृतो रथो [4]दक्षिणा इत्यादि श्रुतम् । भग्नः सन्पुनः समाहितः पुनर्निष्कृतः । सेयं पुनर्निष्कृतादिदक्षिणा किमतिदिष्टयैकादि[5]संख्यया दक्षिणया समुच्चीयत उत तां बाधत इति संशयः । [6]उभयीर्दक्षिणा [7]ददात्याग्न्याधेयिकीः पौनराधेयिकीश्चेत्युक्तत्वात्समुच्चय इति पूर्वः पक्षः । ददातीति वर्तमाननिर्देशस्य विधित्वाभावादाधानकाले पूर्वं दत्तं पुनराधानकाले दीयमानं च मिलित्वोभयीरित्यनूद्यते । दक्षिणात्वरूपस्य कार्यस्यैकत्वादुपदिष्टमतिदिष्टस्य बाधकम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

---

(२६) प्रथमद्वितीययोः पुनराधेयस्य प्रधानविधिस्तदङ्गानि च निरूपितानि । तृतीये त्वाधानमन्त्रा आम्नायन्ते । कल्पः—"[8]भूमिर्भूम्नेति सर्पराज्ञीभिर्गार्हपत्यमादधाति यत्त्वा क्रुद्धः परोवपेति दक्षिणाग्निं यत्ते मन्युपरोप्तस्येतीतरान्" इति । आहवनीयसभ्यावसथ्यानित्यर्थः । त एते षण्मन्त्राः ॥ तत्र प्रथम एवं पठ्यते—(**भूमिरिति-**) हे गार्हपत्यप्रदेश ! त्वं लोकत्रयात्मकोऽसि । तत्र **भूम्ना** बाहुल्येन **भूमिः** असि । **वरिणा** वरिम्णा श्रेष्ठत्वेन **द्यौः** असि । **महित्वा** महत्त्वेन **अन्तरिक्षम्** असि । हे **अदिते** भूमे तत्प्रदेशरूपे **देवि !** तवोत्सङ्गे [**अन्नादम्**] अन्नभोक्तारं गार्हपत्या**ग्निं** यजमानस्यादनयोग्यान्नसिद्ध्यर्थम् **आदधे** ॥

(२७) अथ द्वितीयः—(**आयमिति-**) **अयं** गार्हपत्य आदित्यरूपेण **गौः** गमनशीलः **पृश्निः** श्वेतवर्णो जगत् **आक्रमीत्** । आक्रमणप्रकार एव स्पष्टीक्रियते—**पुनर्मातरं** पृथिवीम् **असनत्** आसीदत्प्राप्नोदित्यर्थः । **सुवः** स्वर्गरूपं **पितरं च प्रयन्** प्रकर्षेण गच्छन्नवस्थितः । द्यौः पिता पृथिवी मातेति श्रुत्यन्तरात्तयोर्मातापितृत्वम् ॥

(२८) अथ तृतीयः—(**त्रिंशदिति-**) आदित्यरूपस्य गार्हपत्यस्य संबन्धि **त्रिंशत्**संख्याकं **धाम** मुहूर्तरूपं **तेजः** विशेषेण **राजते** । अह्नः पञ्चदश मुहूर्ता रात्रेः पञ्चदश । किंच वैदिकस्तुतिरूपा **वाक्पतङ्गाय** पक्षिवदाकाशसंचारिणमादित्यं **शिश्रिये** आश्रितवतीत्यर्थः । अत एवान्यत्राऽऽम्नायते—"[9]ऋग्भिः पूर्वाह्णे दिवि देव ईयते" इत्यादि । हे नादृगार्हपत्य ! त्वां प्रति यदस्माभिरुद्वासनरूपं **प्रति**कूलमाचरितं तत्सर्वम् **अस्य** प्रक्षिप मनसि मा कृथाः । **द्युभिः** ज्वालारूपाभिः **वह** अस्मदीयं हविर्देवेषु प्रापय ॥

---

*भूमिर्भूम्नेत्यादिचत्वारोमन्त्रा आधानेऽपि विनियुक्ताः ।

१ जै. न्या. मा. १०. ३. ५. । २ आप. श्रौ. सू. ५. २०. १३. । ३ पुनराधेये तु पु° इति पाठः । ४ 'दक्षिणा' इति क्वचिन्नास्ति । ५ 'संख्यया' इति क्वचिन्नास्ति । ६ 'उभयीर्ददाति' इति पाठः । ७ 'ददात्याधेयिकीः' इति पाठः । ८ आप. श्रौ. सू. ५. २८. ९-१२. । ९ तै. ब्रा. ३. १२. ९. ।

अ॒स्य प्रा॒णाद॑पान॒त्य॑न्तश्च॑रति रोच॒ना । व्य॑ख्यन्महि॒षः सुवः॑ । यत्त्वा॑ (१) क्रु॒द्धः प॑रो॒वप॑ म॒न्युना॒ यदव॑र्त्या । सु॒कल्प॑मग्ने॒ तत्तव॒ पुन॒स्त्वोद्दी॑पयामसि । यत्ते॑ म॒न्युप॑रोप्तस्य पृथि॒वीमनु॑ दध्व॒से । आ॒दि॒त्या विश्वे॒ तद्दे॒वा वस॑वश्च स॒माभ॑रन् । मनो॒ ज्योति॑र्जुषता॒माज्यं॒ विच्छि॑न्नं य॒ज्ञꣳ समि॒मं द॑धातु । बृह॒स्पति॑स्तनुतामि॒मं नो॒ विश्वे॑ दे॒वा इ॒ह मा॑दयन्ताम् । स॒प्त ते॑ अग्ने स॒मिधः॑ स॒प्त जि॒ह्वाः स॒प्त (२) ऋष॑यः स॒प्त धाम॑ प्रि॒याणि॑ । स॒प्त होत्राः॑ सप्त॒धा त्वा॑ यजन्ति स॒प्त योनी॑रा

प्रा॒णादिति॑ प्र-अनात् । अ॒पा॒न॒तीत्य॑प-अन॒ती । अ॒न्तः । च॒र॒ति । रो॒च॒ना । वीति॑ । अ॒ख्य॒त् । म॒हि॒षः । सुवः॑ । यत् । त्वा॒ । (१) क्रु॒द्धः । प॒रो॒वपेति॑ परा-उ॒वप॑ । म॒न्युना॑ । यत् । अव॑र्त्या । सु॒कल्प॒मिति॑ सु-क॒ल्प॑म् । अ॒ग्ने॒ । तत् । तव॑ । पुन॑ः । त्वा॒ । उदिति॑ । दी॒प॒या॒म॒सि॒ । यत् । ते॒ । म॒न्युप॑रोप्त॒स्येति॑ म॒न्यु-प॒रो॒प्त॒स्य॒ । पृ॒थि॒वीम् । अन्विति॑ । द॒ध्व॒से । आ॒दि॒त्याः । विश्वे॑ । तत् । दे॒वाः । वस॑वः । च॒ । स॒माभ॑र॒न्निति॑ सम्-आभ॑रन् । मनः॑ । ज्योतिः॑ । जु॒ष॒ता॒म् । आज्य॑म् । विच्छि॑न्न॒मिति॑ वि-छि॒न्न॒म् । य॒ज्ञम् । समिति॑ । इ॒मम् । द॒धा॒तु॒ । बृह॒स्पतिः॑ । त॒नु॒ता॒म् । इ॒मम् । नः॒ । विश्वे॑ । दे॒वाः । इ॒ह । मा॒द॒य॒न्ता॒म् । स॒प्त । ते॒ । अ॒ग्ने॒ । स॒मिध॒ इति॑ सम्-इधः॑ । स॒प्त । जि॒ह्वाः । स॒प्त । (२) ऋष॑यः । स॒प्त । धाम॑ । प्रि॒याणि॑ । स॒प्त ।

(२९) अथ चतुर्थः—(अस्येति-) **अस्य** आदित्यस्य **रोचना** दीप्तिः **प्राणात्** उच्छ्वाससदृशादुदयात् **अपानती** निःश्वासतुल्यमस्तमयं गच्छन्ती द्यावापृथिव्योः **अन्तश्चरति** । महति मण्डले सीदतीति **महिषः** आदित्यः **सुवः** स्वर्गं **व्यख्यत्** यजमानेभ्यः प्रकाशितवान् । आदित्यरूपेण स्तूयमान हे गार्हपत्य त्वामादधामीत्यभिप्रायः ॥

(३०) अथ पञ्चमः—(यत्त्वेति-) हे दक्षिणाग्ने ! **क्रुद्धः** कोपपरवशोऽहं तेन **मन्युना** [**त्वा**] त्वां **परोवप** । उवपेति लिङुत्तमपुरुषः । परोक्षवानुद्वासितवानस्मीति **यत्** यच्च **अवर्त्या** सम्बद्धयभावलक्षणेन दारिद्र्येणोद्वासितवानस्मीति हे **अग्ने ! तव** प्रसादात् **तत् सुकल्पं** सुष्ठु कृतमस्तु **पुनः** अपि त्वां वयमुद्दीपयामः ॥

(३१) अथ षष्ठः—(यत्त इति-) हे आहवनीय ! मदीयकोपेनोद्वासितस्य तव **यत्** तेजः **पृथिवीमनु** प्रविश्य ध्वस्तं तत्तेज आदित्यादयः समाहरन्तु ॥

(३२) कल्पः—"मनो ज्योतिर्जुषतामिति बृहस्पतिवत्यर्चोपतिष्ठते" इति । पाठस्तु—(मन इति-) उद्वासनापराधपरिहाराय **मनो** माननीयमग्नेः **ज्योतिः** हव्यम् **आज्यं** सेवताम् । **विच्छिन्नमिमं यज्ञं संदधातु** । **बृहस्पतिः** [**नः**] अस्माकम् इमं यज्ञं [**तनुताम्**] विस्तीर्णं करोतु । [**विश्वे**] सर्वेऽपि **देवा इह** कर्मणि **मादयन्तां** तृप्तियुक्ता भवन्तु ॥

(३३) कल्पः—"सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति" इति । पाठस्तु—(सप्तेति-) हे **अग्ने** ! [**ते**] तव **समिधः सप्तसंख्याका** अश्वत्थोदुम्बरपलाशशमीविकङ्कताशनिहतवृक्षपुष्करपर्णरूपाः । अत एव सूत्रकारो यथोक्तान्संभारान्समन्त्रकाननुक्रम्य, इति वानस्पत्या इत्युपसंजहार । ज्वालारूपा **जिह्वाः** च सप्त । तथा चाऽऽथर्वणिका आमनन्ति—"काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः" ॥ इति । **ऋषयः** मन्त्राः । ते च यथोक्तसंभारसंपादनार्थाः **सप्तसंख्याका** "अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः" इत्यादयः समाम्नाताः । **प्रियाणि धाम** स्थानान्याहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यप्राजहितामीध्रीयाख्यानि(णि)सोमयागे वहिर्धारकाणि सप्तसंख्याकानि । होत्रा होतृप्रमुखा वषट्कर्तारो होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्रोऽच्छावाकश्चेति **सप्तसंख्याकाः**

१ आप. श्रौ. सू. ५. २८. १३. । २ आप. श्रौ. सू. ५. २८. १४. । ३ आप. श्रौ. सू. ५. २. ४. ।

पृणस्वा घृतेन । पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः । सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि । लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु विवस्वाँ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु (३) ॥

(त्वा जिह्वाः सप्त सुकेतस्ते नवत्रयोदश च ।)

होत्राः । सप्तधेति सप्त-धा । त्वा । यजन्ति । सप्त । योनीः । एति । पृणस्व । घृतेन । पुनः । ऊर्जा । नीति । वर्तस्व । पुनः । अग्ने । इषा । आयुषा । पुनः । नः । पाहि । विश्वतः । सह । रय्या । नीति । वर्तस्व । अग्ने । पिन्वस्व । धारया । विश्वप्स्नियेति विश्व-प्स्निया । विश्वतः । परि । लेकः । सलेक इति स-लेकः । सुलेक इति सु-लेकः । ते । नः । आदित्याः । आज्यम् । जुषाणाः । वियन्तु । केतः । सकेत इति स-केतः । सुकेत इति सु-केतः । ते । नः । आदित्याः । आज्यम् । जुषाणाः । वियन्तु । विवस्वान् । अदितिः । देवजूतिरिति देव-जूतिः । ते । नः । आदित्याः । आज्यम् । जुषाणाः । वियन्तु (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

त्वां यजमानाः **सप्तधा** यजन्ति । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामो वाजपेयश्चेति **सप्त** प्रकाराः । तादृशस्त्वं **सप्त योनीः** आहवनीयादिस्थानानि **घृतेन** सर्वतः पूरय ॥

(३४) कल्पः—"पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति पुनरूर्जेति वा पुरस्तात्प्रयाजानां सह रय्येत्युपरिष्टादनूयाजानाम्" इति । प्रथममन्त्रपाठस्तु—(**पुनरूर्जेति-**) हे **अग्ने**! त्वं मयोद्वासितोऽपि **ऊर्जा** क्षीरादिरसेन सह **पुनर्निवर्तस्व** अत्रागच्छ । **इषा** अन्नेन **आयुषा** च सह पुनरागच्छ । [**नः**] अस्मान् **पुनः** पुनः कृतात् **विश्वतः** सर्वस्मादपराधात् **पाहि** ॥

(३५) द्वितीयमन्त्रपाठस्तु—[**सहेति**] हे **अग्ने**! **रय्या** धनेन सह **निवर्तस्व** [**विश्वप्स्निया**] 'प्सा भक्षणे' इति धातुः । विश्वेन प्सायते भक्ष्यते पीयत इति **विश्वप्स्नी तादृश्या** वृष्टि**धारया विश्वतस्परि** सर्वेषां तृणधान्यलतापादपानामुपरि **पिन्वस्व** सिञ्च ॥

(३६) कल्पः—"यस्तृतीयमादधीत स एतान्होमाञ्जुहुयाल्लेकः सलेक इति । मन्त्रत्रयपाठस्तु—(**लेक इति-**) नवसंख्याका लेकादिनामका य **आदित्यास्ते** सर्वे **जुषाणाः** प्रीयमाणा [**नः**] अस्माकम् **आज्यं वियन्तु** पिबन्तु ॥

अत्र विनियोगसंग्रहः—"चतुर्भिर्भूमिरित्याद्यैरादध्यात्पश्चिमानलम् । दक्षिणाग्निं तु यत्त्वेति यदित्याहवनीयकम् ॥ १ ॥ मनस्तूपस्थितिः सप्त जुहुयादग्निहोत्रकम् । पुनर्द्वाभ्यां पुरोडाशमभितो जुहुयादथ ॥ २ ॥ तृतीयमादधानस्य लेकाद्या होममन्त्रकाः ॥" इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

१ आप. ५. २८. १६-१७. । २ अदा. प. अ. । ३ आप. श्रौ. सू. ५. २९. ११. ।

अथ प्रथमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।

[37]भूमिर्भूम्ना द्यौर्वरिणेत्याहाऽऽशिषैवैनमाधत्ते [38]सर्पा वै जीर्यन्तोऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधाति पुनर्नवमेवैनमजरं कृत्वाऽऽधत्तेऽथो पूतमेव [39]पृथिवीमन्नाद्यं नोपानमत्सैतम् (१) मन्त्रमपश्यत्ततो वै तामन्नाद्यमुपानमद्यत्सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुद्ध्या अथो अस्यामेवैनं प्रतिष्ठितमा धत्ते [40]यत्त्वा क्रुद्धः परोवपेत्याहापह्नुत एवास्मै [41]तत्पुनस्त्वोद्दीपयामसीत्याह समिन्ध एवैनं [42]यत्ते मन्युपरोप्तस्येत्याह देवताभिरेव (२) एनꣳ सं भरति [43]वि वा एतस्य यज्ञश्छिद्यते योऽग्निमुद्वासयते बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै

भूमिः । भूम्ना । द्यौः । वरिणा । इति । आह । आशिषेत्या-शिषा । एव । एनम् । एति । धत्ते । सर्पाः । वै । जीर्यन्तः । अमन्यन्त । सः । एतम् । कसर्णीरः । काद्रवेयः । मन्त्रम् । अपश्यत् । ततः । वै । ते । जीर्णाः । तनूः । अपेति । अघ्नत । सर्पराज्ञिया इति सर्प-राज्ञियाः । ऋग्भिरित्यृक्-भिः । गार्हपत्यमिति गार्ह-पत्यम् । एति । दधाति । पुनर्नवमिति पुनः-नवम् । एव । एनम् । अजरम् । कृत्वा । एति । धत्ते । अथो इति । पूतम् । एव । पृथिवीम् । अन्नाद्यमित्यन्न-अद्यम् । न । उपेति । अनमत् । सा । एतम् । (१) मन्त्रम् । अपश्यत् । ततः । वै । ताम् । अन्नाद्यमित्यन्न-अद्यम् । उपेति । अनमत् । यत् । सर्पराज्ञिया इति सर्प-राज्ञियाः । ऋग्भिरित्यृक्-भिः । गार्हपत्यमिति गार्ह-पत्यम् । आदधातीत्या-दधाति । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति । अस्याम् । एव । एनम् । प्रतिष्ठितमिति प्रति-स्थितम् । एति । धत्ते । यत् । त्वा । क्रुद्धः । परोवपेति परा-उवप । इति । आह । अपेति । ह्नुते । एव । अस्मै । तत् । पुनः । त्वा । उदिति । दीपयामसि । इति । आह । समिति । इन्धे । एव । एनम् । यत् । ते । मन्युपरोप्तस्येति मन्यु-परोप्तस्य । इति । आह । देवताभिः । एव । (२) एनम् । समिति । भरति । वीति । वै । एतस्य । यज्ञः । छिद्यते । यः । अग्निम् । उद्वासयत इत्युत्-वासयते । बृहस्पतिवत्येति बृह-

(३७) चतुर्थानुवाके पूर्वोक्ता मन्त्रा व्याख्यायन्ते । तत्र अन्नाद्याय इत्येतस्य मन्त्रपदस्याभिप्रायमाह—(भूमिरिति-) आशिषा अन्नं प्राप्तुमिच्छया ॥

(३८) चतसृभिर्ऋग्भिराधानं विधत्ते—(सर्पा इति-) जीर्यन्तो जरां प्राप्नुवन्तः अमन्यन्त कोऽस्या जरायाः प्रतीकार इति विचारितवन्तः । तदा कसर्णीरनामकः (काद्रवेयः-) कद्रूपुत्रो भूमिरित्यादिकं मन्त्रसंघम् अपश्यत् । तन्मन्त्रसामर्थ्यात् ते सर्पाः जीर्णाः शरीरत्वचोऽपहत्य कोमलास्त्वचः प्राप्नुवन् । सर्पाणां राज्ञी भूमिः । इयं वै सर्पतो राज्ञीत्यन्यत्राऽऽम्नानात् । तस्या ऋचो भूमिर्भूम्नेत्यादयस्ताभिराहितो वह्निर्जरां परित्यज्य नूतनः पूतश्च भवति ॥

(३९) तमेव विधिमनूद्य प्रशंसति—(पृथिवीमिति-) अन्नाद्यायेत्युक्तत्वात्तत्प्राप्तिः । उपस्थे ते देवीत्युक्तत्वाद्भूमौ प्रतिष्ठितत्वम् ॥

(४०) यदाह (यद्धं) परोवप तत्प्रकल्पमित्युक्तिर्वालस्येवाग्नेः सान्त्वनायापलाप इत्याह—(यत्त्वेति-) ॥

(४१) उद्दीपयामसीत्यस्याभिप्रायमाह—(पुनस्त्वेति-) ॥

(४२) आदित्या विश्वे तदित्यादेरभिप्रायमाह—(यत्त इति-) ॥

(४३) उपस्थानं विधत्ते—(विवेति-) बृहस्पतिशब्दोऽस्यामस्तीति बृहस्पतिवती ॥

देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ सं दधाति "विच्छिन्नं यज्ञꣳ समिमं दधात्वि-त्याह संतत्यै "विश्वे देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्योऽनु दि-शति "सप्त ते अग्ने समिधः सप्त जिह्वाः (३) इत्याह सप्तसप्त वै सप्तधाऽग्नेः प्रियास्तनुवस्ता एवाव रुन्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णात्यादित्या वा अस्माल्लोकादमुं लोकमायन्तेऽमुष्मिँल्लोके व्यतृष्यन्त इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान्होमानजुहवुस्त आर्ध्नुवन्ते सुवर्गं लोकमायन्यः पराचीनं पुनराधेयादग्निमादधीत स एतान्होमाञ्जुहुयाद्यामेवाऽऽदित्या ऋद्धिमार्ध्नुवन्तामेवर्ध्नोति (४) ॥

(सैतं देवताभिरेव जिह्वा एतान्पञ्चविꣳशतिश्च ।)

स्पति-धृत्या । ऋचा । उपेति । तिष्ठते । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । यज्ञम् । समिति । दधाति । विच्छिन्नमिति वि-छिन्नम् । यज्ञम् । समिति । इमम् । दधातु । इति । आह । संतत्या इति सं-तत्यै । विश्वे । देवाः । इह । मादयन्ताम् । इति । आह । संतत्येति सं-तत्य । एव । यज्ञम् । देवेभ्यः । अन्विति । दिशति । सप्त । ते । अग्ने । समिध इति सम्-इधः । सप्त । जिह्वाः । (३) इति । आह । सप्तसप्तेति सप्त-सप्त । वै । सप्तधेति सप्त-धा । अग्नेः । प्रियाः । तनुवः । ताः । एव । अवेति । रुन्धे । पुनः । ऊर्जा । सह । रय्या । इति । अभितः । पुरोडाशम् । आहुती इत्या-हुती । जुहोति । यजमानम् । एव । ऊर्जा । च । रय्या । च । उभयतः । परीति । गृह्णाति । आदित्याः । वै । अस्मात् । लोकात् । अमुम् । लोकम् । आयन् । ते । अमुष्मिन् । लोके । वीति । अतृष्यन् । ते । इमम् । लोकम् । पुनः । अभ्यवेत्येत्यभि-अवेत्य । अग्निम् । आधायेत्या-धाय । एतान् । होमान् । अजुहवुः । ते । आर्ध्नु-वन् । ते । सुवर्गमिति सुवः-गम् । लोकम् । आयन् । यः । पराचीनम् । पुनराधेयादिति पुनः-आधे-यात् । अग्निम् । आदधीतेत्या-दधीत । सः । एतान् । होमान् । जुहुयात् । याम् । एव । आदित्याः । ऋद्धिम् । आर्ध्नुवन् । ताम् । एव । ऋध्नोति (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

---

(४४) तं शब्दं प्रशस्य संदधात्विति शब्दस्याभिप्रायमाह—(विच्छिन्नमिति-) ॥

(४५) देवसंबोधनस्योपयोगमाह—(विश्वेदेवा इति-)यज्ञं सततं कृत्वा देवेभ्यः तत्कथनाय संबोधनम् ॥

(४६) समिदादिषु सप्तसंख्याया उपयोगमाह—(सप्त त इति-) समिदादयः सर्वे पदार्थाः प्रत्येकं सप्त सप्त विनिर्दिश्यन्ते । यस्मात् सप्तधा अवस्थिताः पदार्था अग्नेः प्रियास्तनुवः तस्मात्तदवरोधाय सप्तसंख्या ॥

(४७) द्वितीयानुवाके विहितयोराहुत्योर्मन्त्रौ विनियुङ्क्ते—(पुनरूर्जेति-) ॥

(४८) तृतीयाधाने होमान्विधत्ते—(आदित्या वाइति-) आदित्याः आधानपुनराधाने अनुष्ठाय सुवर्गं गत्वा तत्र व्यतृष्यन्त विशेषेण तृषां प्राप्ताः । समृद्धिर्न पर्याप्तेति मत्वा भूमावागत्य लेकादिमन्त्रैर्हुत्वाऽतिशयेन समृद्धिं गताः । ततः पुनराधेयात् ऊर्ध्वम् अग्निम् आधाय लेकादिभिः जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

सभाष्यं पुनराधेयब्राह्मणम् ।

तत्र प्रथमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ।

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नीषोमयोस्तेजस्विनीस्तनूः संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तेनाग्नीषोमावपाक्रामताम् । ते देवा विजित्य । अग्नीषोमावन्वैच्छन् । तेऽग्निमन्वविन्दन्नृतुषु । तस्य विभक्तीभिस्तेजस्विनीस्तनूरवारुन्धत (१) । ते सोममन्वविन्दन् । तमघ्नन् । तस्य यथाभिज्ञायं तनूर्व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवंविदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेये कुर्यात् । यदनाग्नेयं पुनराधेये कुर्यात् । व्यृद्धमेव तत् ।

(४९) यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

तत्राऽऽद्येऽनुवाके पुनराधेयगतयोराज्यभागयोर्विशेषं विधातुमादावुपाख्यायिकामाह—यदा देवाः च असुराः च युद्धोद्युक्तास्तदा **देवा विजयम्** प्राप्तुकामाः स्वकीयाः **तेजस्विनीस्तनूरग्नीषोमयोः** स्थापितवन्तः । तनुशब्देन शरीरवत्प्रियभूतधनमुपलक्ष्यते । तयोर्धनं स्थापयतां देवानामयमभिप्रायः । **यदि** कथंचित् [नः] अस्मान्यदाऽसुरा **जेष्यन्ति** तदानीम् **इदम्** एव धनम् [नः] अस्माकं जीवनाय **भविष्यति** इति । ततः स्थापितेन **तेन** धनेन सह तौ **अग्नीषोमौ** पलायनमकुरुताम् । **देवाः** पुण्यवशेन विजयं प्राप्य सर्वत्र **अग्नीषोमौ** अन्विष्य क्वचित् **ऋतुषु** वेषमाच्छाद्यावस्थितम् **अग्निम्** अलभन्त । ऋतूनां बलवदृष्ट्यावस्थितत्वाद्बलाद्ग्रहीतुमशक्ता देवाः **तस्य** अग्नेरुत्कोचरूपेण चतस्रो विभक्तीर्दत्त्वा स्वकीयाः **तनूः** धनरूपाः स्वीकृतवन्तः । ताश्च विभक्तयः सूत्रे स्पष्टमुदाहृताः—"अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्ने" इति "चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति" इति । "समिधोऽग्न आज्यस्य वियन्तु तनूनपादग्न आज्यस्य वेतु" इत्याद्यासु प्रयाजयाज्यासु संबुद्ध्यन्ता अग्निशब्दा आम्नाताः । तेभ्यः पुरस्तात्क्रमेण संबुद्धि-सप्तमी-तृतीया-द्वितीयाविभक्त्यन्ता अग्निशब्दाः प्रयुक्ताः । तेन तृप्तोऽग्निस्तदीयास्तनूर्दत्तवान् । अथ **ते** देवाः **सोमम्** अन्विष्य लब्ध्वा तं ताडयित्वा **तस्य** सकाशात्स्वकीयाः **तनूः** तल्लक्षणेन सम्यगभिज्ञाय यथायथं गृहीतवन्तः । **ते** च तनुसमाना द्रव्यविशेषा ऐन्द्रवायवादिग्रहा **अभवन्** । देवैर्गृह्यन्त इति व्युत्पत्त्या ग्रहनाम संपन्नम् । यो यजमानस्तादृशं महिमानं विद्वान्गृह्णाति **तस्यैव** ग्रहा यथाशास्त्रं **गृहीताः** भवन्ति ॥

(५०) अथ यथोक्तविभक्तिविधिं मनसि निधाय तं विधिमुत्तेतुमुपोद्घातमाह—(**नानाग्नेयमिति-**) यत्पुनराधेयम् तस्मिन् **अनाग्नेयं न कुर्यात्** । अत एव सूत्रकारेणोक्तम्—"सर्वमाग्नेयं भवति" इति । अनाग्नेयकरणे पुनराधेयस्य समृद्धिहेतुत्वं न स्यात् । क्रियते चात्र समिदादिषु चतुर्षु प्रयाजेष्वनाग्नेयम् । तन्मन्त्रेषु देवतान्तराणां समिदादीनां श्रूयमाणत्वात् । सोऽयमाक्षेपरूप उपोद्घातः । अत्र प्रयाजानां चतुर्णामाग्नेयत्वसंपादनाय यथोक्तविभक्तीः कुर्यादिति विधिवक्तव्यः । तत्स्वविधिश्च संहितायामाम्नातः—"विभक्तयो भवन्ति वाचो विभूत्यै" इति ।

१ स्वाध्यायनामध्याये द्वितीये हि प्रपाठके । यदनुक्तं संहितायां तत्सर्वमिह वर्णितम् ॥ २ ॥ तृतीये वाजपेयस्य ब्राह्मणं समुदीर्यते । दशानुवाकास्तेषु स्युः पुनराधानमादिमे ॥ स्यात्पिण्डपितृयज्ञोऽन्ते वाजपेयस्तु मध्यतः ॥ ३ ॥ यत्संहिताकाण्ड्याने पुनराधानमत्र तु । तस्योक्तस्यानुवादेन विशेषः कोऽपि वर्ण्यते ॥ ४ ॥ वाजपेयस्य मन्त्रास्तु संहितायामुदीरिताः । मध्यमस्त्वनुवाकेषु तद्व्याख्यानमिहेर्यते ॥ ५ ॥ द्वितीये वाजपेयस्य विधिस्तत्र ग्रहाः परे । चतुर्थे पशवः प्रोक्ताः पञ्चमे रथयोजनम् ॥ ६ ॥ मर्यादा धावनं षष्ठे [illegible] ॥ ७ ॥ नवमान्ता द्वितीयाद्या वाजपेयावबोधिनः । यः [illegible] दशमे [illegible] ॥ ८ ॥ तृतीयस्यानुवाकानां इत्थं समुदीरिताः । वाजपेयस्य [illegible] । आदावन्त्यावनुवाकौ तौ व्याख्यास्येते इह क्रमात् ॥ ९ ॥ इत्यनुक्रमणी भाष्यग्रन्थः । २ आप. श्रौ. ५. २८. ६. । ३ तै. ब्रा. ३. ५. ५. । ४ आप. श्रौ. सू. ५. २८. ३. । ५ तै. सं. १. ५. २. ।

(२) अनाग्नेयं वा एतत्क्रियते । यत्समिधस्तनूनपातमिडो बर्हिर्यजति । उभावाग्नेयावाज्यभागौ स्याताम् । अनाज्यभागौ भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति । अग्नये पवमानायोत्तरः स्यात् । यत्पवमानाय । तेनाऽऽज्यभागः । तेन सौम्यः । बुधन्वत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवति । (३) यथा सुप्तं बोधयति । तादृगेव तत् । अग्निन्यक्ताः पत्नीसंयाजानामृचः स्युः । तेनाऽऽग्नेयꣳ सर्वं भवति । एकधा तेजस्विनीं देवतामुपैतीत्याहुः । सैनमीश्वरा प्रदह इति । नेति ब्रूयात् । प्रजननं वा अग्निः । प्रजननमेवोपैतीति । कृतयजुः संभृतसंभार इत्याहुः । (४) न संभृत्याः संभाराः । न यजुः

(५१) इदानीमाज्यभागयोर्विशेषं विधत्ते—(उभाविति-) प्रकृतावाद्य आज्यभाग आग्नेयः द्वितीयः सौम्यः । अत्र तु द्वितीयोऽप्याग्नेयः कर्तव्यः ॥

(५२) अत्रैवापरं विशेषं विधत्ते—(अनाज्यभागाविति-) अत्र केचिदभिज्ञा एवमाक्षिपन्ति । यदि **उभौ** अप्याज्यभागौ **अन्वञ्चौ** अव्यवहितौ **आग्नेयौ** एव कुर्यात्तदानीमेतावाज्यभागावेव न भवतः । सौम्यस्याननुष्ठितत्वात् । सौम्यो हि सोपपत्तिकः प्रकृतावेवं विहितः—"देवलोकं वा अग्निना यजमानोऽनुपश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमाय" इति तस्मादुत्तरः सौम्यः कर्तव्य इति । अस्मिन्पक्षेऽभिज्ञस्येदमुत्तरम् । अनाग्नेयत्वमसौम्यत्वं चेति दोषद्वयं वारयितुं **पवमानायाग्नय उत्तरः** आज्यभागः कर्तव्यः । तत्राग्निः प्रत्यक्षमेव श्रूयते । पवमानविशेषणेन तु केवलाग्नेयत्वदोषवारणादाज्यभागत्वं सिध्यति । तावता सौम्यत्वमुपचरणीयम् । "अग्न आयूꣳषि पवसे" इत्यस्यां पुरोनुवाक्यायां कृतायामग्नये पवमानायायमुत्तर आज्यभागः स्यादिति तात्पर्यार्थः ॥

(५३) प्रथमस्याऽऽज्यभागस्य प्राकृतीं पुरोनुवाक्यां बाधितुमन्यां विधत्ते—(बुधन्वतीति-) बुधिधातुर्यस्यामृच्यस्ति सेयं **बुधन्वती** तस्यां क्रियमाणायां **यथा** लोके **सुप्तं** पुरुषं **बोधयति** तादृश **एव तत्** भवति । अत्र सूत्रम्—"अग्निꣳ स्तोमेन बोधयेत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवत्यग्न आयूꣳषि पवस इति सौम्यस्य" इति ॥

(५४) पत्नीसंयाजमन्त्रेषु विशेषं विधत्ते—(अग्निन्यक्ता इति-) अग्निपदेन युक्ता **अग्निन्यक्ताः** "आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्" इत्येषा प्रथमस्य पत्नीसंयाजस्य पुरोनुवाक्या । तत्र सोमाग्ने वृष्णियमित्यग्निपदप्रक्षेपोऽग्नियुक्तत्वम् । यथा समिदादिप्रयाजेष्वग्निशब्दगतविभक्तिप्रयोगेणाऽऽग्नेयत्वमेवं **पत्नीसंयाजानाम्** अप्याग्नेयत्वं संपद्यते ॥

(५५) अत्र चोद्यवादिनामाक्षेपं दर्शयति—(एकधेति-) तेजोधिकां **देवतां** यः पुमान् **एकधोपैति** नैरन्तर्येण सेवते **सा** देवता तम् **एनं** प्रदग्धुं समर्था भवति । तस्मात्पूर्वोक्तमग्निन्यक्तत्वं न कार्यमित्याक्षेपः ।

(५६) तस्योत्तरं दर्शयति—(नेतीति-) **न** अस्ति प्रदाह **इति** एवमुत्तरं **ब्रूयात्** अग्नेर्विरोधिदाहकत्वेऽपि स्वकीयसेवकं प्रति प्रजननेनानुग्राहकत्वान्निरन्तरमग्निं सेवमानः प्रजोत्पत्तिम् **एव** प्राप्नोति **इति** ॥

(५७) अत्र चोदकप्राप्तान्संभारानाधानमन्त्रांश्च पूर्वपक्षरूपेण निराचष्टे—(कृतयजुरिति-) यजुःशब्देन घर्मः शिर इत्याद्या आधानमन्त्रा विवक्षिताः । संभारशब्देन सिकतादिसप्त मृद्विशेषा अश्वत्थोदुम्बरादिसप्त वानस्पत्यविशेषाश्च विवक्षिताः । प्रथमाधाने यजुषामुच्चरितत्वात्संभाराणां च संपादितत्वादस्यापि पुनराधेयस्याऽऽधानादत्यन्तभेदाभावेन यजुःसंभारयोः सिद्धत्वात्तदुभयं पुनः **न** कर्तव्यम् **इति** पूर्वः पक्षः ॥

१ तै. सं. २. ६. २. । २ तै. सं. १. ३. १४. । ३ आप. श्रौ. सू. ५. २८. १०. ।
४ तै. सं. ४. २. ७. । ५ तै. ब्रा. १. १. ७. ।

सभाष्यं पुनराधेयब्राह्मणम् ।

तत्र प्रथमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ।

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नीषोमयोस्तेजस्विनीस्तनूः संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तेनाग्नीषोमावपाक्रामताम् । ते देवा विजित्य । अग्नीषोमावन्वैच्छन् । तेऽग्निमन्वविन्दन्नृतुषूत्सन्नम् । तस्य विभक्तीभिस्तेजस्विनीस्तनूरवारुन्धत (१) । ते सोममन्वविन्दन् । तमघ्नन् । तस्य यथाभिज्ञायं तनूर्व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवं विदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेयं कुर्यात् । यदनाग्नेयं पुनराधेयं कुर्यात् । व्यृद्धमेव तत् ।

(४९) यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

तत्राऽऽद्येऽनुवाके पुनराधेयगतयोराज्यभागयोर्विशेषं विधातुमादावाख्यायिकामाह—यदा देवाः च असुराः च युद्धोद्युक्तास्तदा **देवा विजयम्** प्राप्तुकामाः स्वकीयाः **तेजस्विनीस्तनूरग्नीषोमयोः** स्थापितवन्तः । तनुशब्देन शरीरवत्प्रियभूतधनमुपलक्ष्यते । तयोर्धनं स्थापयतां देवानामयमभिप्रायः । **यदि** कथंचित् [नः] अस्मान्यदाऽसुरा **जेष्यन्ति** तदानीम् **इदम्** एव धनम् [नः] अस्माकं जीवनाय **भविष्यति** इति । ततः स्थापितेन **तेन** धनेन सह तौ **अग्नीषोमौ** पलायनमकुरुताम् । **देवाः** पुण्यवशेन विजयं प्राप्य सर्वत्र **अग्नीषोमौ** अन्विष्य क्वचित् **ऋतुषु** वेपमाच्छायावस्थितम् **अग्निम्** अलभन्त । ऋतूनां बलवदृष्ट्यावस्थितत्वाद्दूरात्तद्ग्रहीतुमशक्ता देवाः **तस्य** अग्नेरुत्कोचरूपेण चतस्रो विभक्तीर्दत्त्वा स्वकीयाः **तनूः** धनरूपाः स्वीकृतवन्तः । ताश्च विभक्तयः सूत्रे स्पष्टमुदाहृताः—"अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्ने" इति "चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति" इति । "समिधोऽग्न आज्यस्य वियन्तु तनूनपादग्न आज्यस्य वेतु" इत्यादयासु प्रयाजयाज्यासु संबुद्ध्यन्ता अग्निशब्दा आम्नाताः । तेभ्यः पुरस्तात्क्रमेण संबुद्धि-सप्तमी-तृतीया-द्वितीयाविभक्त्यन्ता अग्निशब्दाः प्रयुक्ताः । तेन तृप्तोऽग्निस्तदीयास्तनूर्दत्तवान् । अथ **ते** देवाः **सोमम्** अन्विष्य लब्ध्वा तं ताडयित्वा **तस्य** सकाशात्स्वकीयाः **तनूः** तत्तल्लक्षणेन सम्यगभिज्ञाय यथायथं गृहीतवन्तः । **ते** च तनुसमाना द्रव्यविशेषा ऐन्द्रवायवादिग्रहा **अभवन्** । देवैर्गृह्यन्त इति व्युत्पत्त्या ग्रहनाम संपन्नम् । यो यजमानस्तादृशं महिमानं विद्वान्गृह्णाति **तस्यैव** ग्रहा यथाशास्त्रं **गृहीताः** भवन्ति ॥

(५०) अथ यथोक्तविभक्तिविधिं मनसि निधाय तं विधिमुन्नेतुमुपोद्घातमाह—**(नानाग्नेयमिति-)** यत्पुनराधेयम् तस्मिन् **अनाग्नेयं न कुर्यात्** । अत एव सूत्रकारेणोक्तम्—"सर्वमाग्नेयं भवति" इति । अनाग्नेयकरणे पुनराधेयस्य समृद्धिहेतुत्वं न स्यात् । क्रियते चात्र समिदादिषु चतुर्षु प्रयाजेष्वनाग्नेयम् । तन्मन्त्रेषु देवतान्तराणां समिदादीनां श्रूयमाणत्वात् । सोयमाक्षेपरूप उपोद्घातः । अत्र प्रयाजानां चतुर्णामाग्नेयत्वसंपादनाय यथोक्तविभक्तीः कुर्यादिति विधिरुन्नेयः । प्रत्यक्षविधिश्च संहितायामाम्नातः—"विभक्तयो भवन्ति वाचो विधृत्यै" इति ।

---

१ गवामयनमाख्यातं द्वितीये हि प्रपाठके । यदनुक्तं संहितायां तत्सर्वमिह वर्णितम् ॥ २ ॥ तृतीये वाजपेयस्य ब्राह्मणं समुदीर्यते । दशानुवाकास्तेषु स्युः पुनराधानमादिमे ॥ स्यात्पिण्डपितृयज्ञोऽन्ते वाजपेयस्तु मध्यतः ॥ ३ ॥ यत्संहितायामाख्यातं पुनराधानमत्र तु । तस्योक्तस्यानुवादेन विशेषः कोऽपि वर्ण्यते ॥ ४ ॥ वाजपेयस्य मन्त्रास्तु संहितायामुदीरिताः । मध्यवत्यनुवाकेषु तद्व्याख्यानमिहेर्यते ॥ ५ ॥ द्वितीये वाजपेयस्य विधिस्तस्य ग्रहाः परे । चतुर्थे पशवः प्रोक्ताः पञ्चमे रथयोजनम् ॥ ६ ॥ मर्यादा धावनं षष्ठे यूपारोहणमुत्तरे । अष्टमे त्वभिषेकः स्यादतिग्राह्यास्त्वनन्तरे ॥ ७ ॥ नवमान्ता द्वितीयाद्या वाजपेयावबोधिनः । यः पिण्डपितृयज्ञोऽसौ दशमे स्पष्टमीरितः ॥ ८ ॥ तृतीयस्यानुवाकार्था इत्येवं समुदीरिताः । वाजपेयब्राह्मणार्था मन्त्रैः सह पुरेरिताः । आद्यन्तावनुवाकौ तौ व्याख्यास्येते इह क्रमात् ॥ ९ ॥ इत्यतिरिक्तो भाष्यग्रन्थः । २ आप. श्रौ. सू. ५. २८. ६. । ३ तै. ब्रा. ३. ५. ५. । ४ आप. श्रौ. सू. ५. २८. ३. । ५ तै. सं. १. ५. २. ।

(२) अनाग्नेयं वा एतत्क्रियते । यत्समिधस्तनूनपातमिडो बर्हिर्यजति । [५१]उभावाग्नेयावाज्यभागौ स्याताम् । [५२]अनाज्यभागौ भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति । अग्नये पवमानायोत्तरः स्यात् । यत्पवमानाय । तेनाऽऽज्यभागः । तेन सौम्यः । [५३]बुधन्वत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवति । (३) यथा सुप्तं बोधयति । तादृगेव तत् । [५४]अग्निन्यक्ताः पत्नीसंयाजानामृचः स्युः । तेनाऽऽग्नेयꣳ सर्वं भवति । [५५]एकधा तेजस्विनीं देवतामुपैतीत्याहुः । सैनमीश्वरा प्रदह इति । [५६]नेति ब्रूयात् । प्रजननं वा अग्निः । प्रजननमेवोपैतीति । [५७]कृतयजुः संभृतसंभार इत्याहुः । (४) न संभृत्याः संभाराः । न यजुः

(५१) इदानीमाज्यभागयोर्विशेषं विधत्ते—(**उभाविति–**) प्रकृतावाद्य आज्यभाग आग्नेयः द्वितीयः सौम्यः । अत्र तु द्वितीयोऽप्याग्नेयः कर्तव्यः ॥

(५२) अत्रैवापरं विशेषं विधत्ते—(**अनाज्यभागाविति–**) अत्र केचिदभिज्ञा एवमाक्षिपन्ति । यदि **उभौ** अप्याज्यभागौ **अन्वञ्चौ** अव्यवहितौ **आग्नेयौ** एव कुर्यात्तदानीमेतावाज्यभागावेव न भवतः । सौम्यस्याननुष्ठितत्वात् । सौम्यो हि सोपपत्तिकः प्रकृतावेवं विहितः—"[१]देवलोकं वा अग्निना यजमानोऽनुपश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमाय" इति तस्मादुत्तरः सौम्यः कर्तव्य इति । अस्मिन्पक्षेऽभिज्ञस्यैवमुत्तरम् । अनाग्नेयत्वमसौम्यत्वं चेति दोषद्वयं वारयितुं **पवमानायाग्नय उत्तरः** आज्यभागः कर्तव्यः । तत्राग्निः प्रत्यक्षमेव श्रूयते । पवमानविशेषणेन तु केवलाग्नेयत्वदोषवारणादाज्यभागत्वं सिध्यति । तावता सौम्यत्वमुपचरणीयम् । "[२]अग्न आयूꣳषि पवसे" इत्यस्यां पुरोनुवाक्यायां कृतायामग्नये पवमानायायमुत्तर आज्यभागः स्यादिति तात्पर्यार्थः ॥

(५३) प्रथमस्याऽऽज्यभागस्य प्राकृतीं पुरोनुवाक्यां बाधितुमन्यां विधत्ते—(**बुधन्वतीति–**) बुधिधातुर्यस्यामृच्यस्ति सेयं **बुधन्वती** तस्यां क्रियमाणायां **यथा** लोके **सुप्तं** पुरुषं **बोधयति** तादृश **एव तत्** भवति । अत्र सूत्रम्—"[३]अग्निꣳ स्तोमेन बोधयेत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवत्यग्न आयूꣳषि पवस इति सौम्यस्य" इति ॥

(५४) पत्नीसंयाजमन्त्रेषु विशेषं विधत्ते—(**अग्निन्यक्ता इति–**) अग्निपदेन युक्ता **अग्निन्यक्ताः** "[४]आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्" इत्येषा प्रथमस्य पत्नीसंयाजस्य पुरोनुवाक्या । तत्र सोमाग्ने वृष्णियमित्यग्निपदप्रक्षेपोऽग्नियुक्तत्वम् । यथा समिदादिप्रयाजेष्वग्निशब्दगतविभक्तिप्रयोगेणाऽऽग्नेयत्वमेवं **पत्नीसंयाजानाम्** अप्याग्नेयत्वं संपद्यते ॥

(५५) अत्र चोद्यवादिनामाक्षेपं दर्शयति—(**एकधेति–**) तेजोधिकां **देवतां** यः पुमान् **एकधोपैति** नैरन्तर्येण सेवते **सा** देवता तम् **एनं** प्रदग्धुं समर्था भवति । तस्मात्पूर्वोक्तमग्निन्यक्तत्वं न कार्यमित्याक्षेपः ।

(५६) तस्योत्तरं दर्शयति—(**नेतीति–**) **न** अस्ति प्रदाह **इति** एवमुत्तरं **ब्रूयात्** अग्नेर्विरोधिदाहकत्वेऽपि स्वकीयसेवकं प्रति प्रजननेनानुग्राहकत्वान्निरन्तरमग्निं सेवमानः प्रजोत्पत्तिम् **एव** प्राप्नोति **इति** ॥

(५७) अत्र चोदकप्राप्तान्संभारानाधानमन्त्रांश्च पूर्वपक्षरूपेण निराचष्टे—(**कृतयजुरिति–**) यजुःशब्देन [५]घर्मः शिर इत्याद्या आधानमन्त्रा विवक्षिताः । संभारशब्देन सिकतादिरूपा मृद्विशेषा अश्वत्थोदुम्बरादिरूपा वानस्पत्यविशेषाश्च विवक्षिताः । प्रथमाधाने यजुषामुच्चरितत्वात्संभाराणां च संपादितत्वादस्यापि पुनराधेयस्याऽऽधानादत्यन्तभेदाभावेन यजुःसंभारयोः सिद्धत्वात्तदुभयं पुनः **न** कर्तव्यम् **इति** पूर्वः पक्षः ॥

१ तै. सं. २. ६. २. । २ तै. सं. १. ३. १४. । ३ आप. श्रौ. सू. ५. २८. १०. ।
४ तै. सं. ४. २. ७. । ५ तै. ब्रा. १. १. ७. ।

सभाष्यं पुनराधेयब्राह्मणम् ।

तत्र प्रथमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ।

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नीषोमयोस्तेजस्विनीस्तनूः संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तेनाग्नीषोमावपाक्रामताम् । ते देवा विजित्य । अग्नीषोमावन्वैच्छन् । तेऽग्निमन्वविन्दन्नृतुषु पूर्त्संन्नम् । तस्य विभक्तीभिस्तेजस्विनीस्तनूरवारुन्धत (१) । ते सोममन्वविन्दन् । तमघ्नन् । तस्य यथाभिज्ञायं तनूर्व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवंविदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेये कुर्यात् । यदनाग्नेयं पुनराधेये कुर्यात् । व्यृद्धमेव तत् ।

(४९) यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

तत्राऽऽद्येऽनुवाके पुनराधेयगतयोराज्यभागयोर्विशेषं विधातुमादावाख्यायिकामाह—यदा देवाः च असुराः च युद्धोद्युक्तास्तदा **देवा विजयम्** प्राप्तुकामाः स्वकीयाः **तेजस्विनीस्तनूरग्नीषोमयोः** स्थापितवन्तः । तनुशब्देन शरीरवत्प्रियभूतधनमुपलक्ष्यते । तयोर्धनं स्थापयतां देवानामयमभिप्रायः । **यदि** कथंचित् [नः] अस्मान्यदाऽसुरा **जेष्यन्ति** तदानीम् **इदम्** एव धनम् [नः] अस्माकं जीवनाय **भविष्यति** इति । ततः स्थापितेन **तेन** धनेन सह तौ **अग्नीषोमौ** पलायनमकुरुताम् । **देवाः** पुण्यवशेन विजयं प्राप्य सर्वत्र **अग्नीषोमौ** अन्विष्य क्वचित् **ऋतुषु** वेषमाच्छाद्यावस्थितम् **अग्निम्** अलभन्त । ऋतूनां बलमवष्टभ्यावस्थितत्वाद्ग्रहीतुमशक्ता देवाः **तस्य** अग्नेरुत्कोचरूपेण चतस्रो विभक्तीर्दत्त्वा स्वकीयाः **तनूः** धनरूपाः स्वीकृतवन्तः । ताश्च विभक्तयः सूत्रे स्पष्टमुदाहृताः—“अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्ने” इति “चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति” इति । “समिधोऽग्न आज्यस्य वियन्तु तनूनपादग्न आज्यस्य वेतु” इत्याद्यासु प्रयाजयाज्यासु संबुद्ध्यन्ता अग्निशब्दा आम्नाताः । तेभ्यः पुरस्तात्क्रमेण संबुद्धि-सप्तमी-तृतीया-द्वितीयाविभक्त्यन्ता अग्निशब्दाः प्रयुक्ताः । तेन तृप्तोऽग्निस्तदीयास्तनूर्दत्तवान् । अथ **ते** देवाः **सोमम्** अन्विष्य लब्ध्वा तं ताडयित्वा **तस्य** सकाशात्स्वकीयाः **तनूः** तत्तल्लक्षणेन सम्यगभिज्ञाय यथायथं गृहीतवन्तः । **ते** च तनुसमाना द्रव्यविशेषा ऐन्द्रवायवादिग्रहा **अभवन्** । देवैर्गृह्यन्त इति व्युत्पत्त्या ग्रहनाम संपन्नम् । यो यजमानस्तादृशं महिमानं विद्वान्गृह्णाति **तस्यैव** ग्रहा यथाशास्त्रं **गृहीताः** भवन्ति ॥

(५०) अथ यथोक्तविभक्तिविधिं मनसि निधाय तं विधिमुन्नेतुमुपोद्घातमाह—(**नानाग्नेयमिति-**) यत्पुनराधेयम् तस्मिन् **अनाग्नेयं न कुर्यात्** । अत एव सूत्रकारेणोक्तम्—“सर्वमाग्नेयं भवति” इति । अनाग्नेयकरणे पुनराधेयस्य समृद्धिहेतुत्वं न स्यात् । क्रियते चात्र समिदादिषु चतुर्षु प्रयाजेष्वनाग्नेयम् । तन्मन्त्रेषु देवतान्तराणां समिदादीनां श्रूयमाणत्वात् । सोयमाक्षेपरूप उपोद्घातः । अत्र प्रयाजानां चतुर्णामाग्नेयत्वसंपादनाय यथोक्तविभक्तीः कुर्यादिति विधिरुन्नेयः । प्रत्यक्षविधिश्च संहितायामाम्नातः—“विभक्तयो भवन्ति वाचो विधृत्यै” इति ।

१ गवामयनमाख्यातं द्वितीये हि प्रपाठके । यदनुक्तं संहितायां तत्सर्वमिह वर्णितम् ॥ २ ॥ तृतीये वाजपेयस्य ब्राह्मणं समुदीर्यते । दशानुवाकास्तेषु स्युः पुनराधानमादिमे ॥ स्यात्पिण्डपितृयज्ञोऽन्ते वाजपेयस्तु मध्यतः ॥ ३ ॥ यत्संहितायामाख्यातं पुनराधानमत्र तु । तस्योक्तस्यानुवादेन विशेषः कोऽपि वर्ण्यते ॥ ४ ॥ वाजपेयस्य मन्त्रास्तु संहितायामुदीरिताः । मध्यवर्त्यनुवाकेषु तद्व्याख्यानमिहेर्यते ॥ ५ ॥ द्वितीये वाजपेयस्य विधिस्तस्य ग्रहाः परे । चतुर्थे पशवः प्रोक्ताः पञ्चमे रथयोजनम् ॥ ६ ॥ मर्यादा धावनं षष्ठे यूपारोहणमुत्तरे । अष्टमे त्वभिषेकः स्यादतिग्राह्यास्त्वनन्तरे ॥ ७ ॥ नवमान्ता द्वितीयाद्या वाजपेयावबोधिनः । यः पिण्डपितृयज्ञोऽसौ दशमे स्पष्टमीरितः ॥ ८ ॥ तृतीयस्यानुवाकार्था इत्येवं समुदीरिताः । वाजपेयब्राह्मणार्था मन्त्रैः सह पुरेरिताः । आद्यन्तावनुवाकौ तौ व्याख्यास्येते इह क्रमात् ॥ ९ ॥ इत्यतिरिक्तो भाष्यग्रन्थः । २ आप. श्रौ. सू. ५. २८. ६. । ३ तै. ब्रा. ३. ५. ५. । ४ आप. श्रौ. सू. ५. २८. ३. । ५ तै. सं. १. ५. २. ।

(२) अनाग्नेयं वा एतत्क्रियते । यत्समिधस्तनूनपातमिडो बर्हिर्यजति । उभावाग्नेयावाज्यभागौ स्याताम् । अनाज्यभागौ भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति । अग्नये पवमानायोत्तरः स्यात् । यत्पवमानाय । तेनाऽऽज्यभागः । तेन सौम्यः । बुधन्वत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवति । (३) यथा सुप्तं बोधयति । तादृगेव तत् । अग्निर्यक्ताः पत्नीसंयाजानामृचः स्युः । तेनाऽऽग्नेयꣳ सर्वं भवति । एकधा तेजस्विनीं देवतामुपैतीत्याहुः । सैनमीश्वरा प्रदह इति । नेति ब्रूयात् । प्रजननं वा अग्निः । प्रजननमेवोपैतीति । कृतयजुः संभृतसंभार इत्याहुः । (४) न संभृत्याः संभाराः । न यजुः

(५१) इदानीमाज्यभागयोर्विशेषं विधत्ते—(उभाविति-) प्रकृतावाद्य आज्यभाग आग्नेयः द्वितीयः सौम्यः । अत्र तु द्वितीयोऽप्याग्नेयः कर्तव्यः ॥

(५२) अत्रैवापरं विशेषं विधत्ते—(अनाज्यभागाविति-) अत्र केचिदभिज्ञा एवमाक्षिपन्ति । यदि **उभौ** अप्याज्यभागौ **अन्वञ्चौ** अव्यवहितौ **आग्नेयौ** एव कुर्यात्तदानीमेतावाज्यभागावेव न भवतः । सौम्यस्याननुष्ठितत्वात् । सौम्यो हि सोपपत्तिकः प्रकृतावेवं विहितः—"देवलोकं वा अग्निना यजमानोऽनुपश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमाय" इति तस्मादुत्तरः सौम्यः कर्तव्य इति । अस्मिन्पक्षेऽभिज्ञस्यैवमुत्तरम् । अनाग्नेयत्वमसौम्यत्वं चेति दोषद्वयं वारयितुं **पवमानायाग्नय उत्तरः** आज्यभागः कर्तव्यः । तत्राग्निः प्रत्यक्षमेव श्रूयते । पवमानविशेषणेन तु केवलाग्नेयत्वदोषवारणादाज्यभागत्वं सिध्यति । तावता सौम्यत्वमुपचरणीयम् । "अग्न आयूꣳषि पवसे" इत्यस्यां पुरोनुवाक्यायां कृतायामग्नये पवमानायायमुत्तर आज्यभागः स्यादिति तात्पर्यार्थः ॥

(५३) प्रथमस्याऽऽज्यभागस्य प्राकृतीं पुरोनुवाक्यां बाधितुमन्यां विधत्ते—(बुधन्वतीति-) बुधिधातुर्यस्यामृच्यस्ति सेयं **बुधन्वती** तस्यां क्रियमाणायां **यथा** लोके **सुप्तं** पुरुषं **बोधयति** तादृश **एव तत्** भवति । अत्र सूत्रम्—"अग्निꣳ स्तोमेन बोधयेत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवत्यग्न आयूꣳषि पवस इति सौम्यस्य" इति ॥

(५४) पत्नीसंयाजमन्त्रेषु विशेषं विधत्ते—(अग्निर्यक्ता इति-) अग्निपदेन युक्ता **अग्निर्यक्ताः** "आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्" इत्येषा प्रथमस्य पत्नीसंयाजस्य पुरोनुवाक्या । तत्र सोमाग्ने वृष्णियमित्यग्निपदप्रक्षेपोऽग्नियुक्तत्वम् । यथा समिदादिप्रयाजेष्वग्निशब्दगतविभक्तिप्रयोगेणाऽऽग्नेयत्वमेवं **पत्नीसंयाजानाम्** अप्याग्नेयत्वं संपद्यते ॥

(५५) अत्र चोद्यवादिनामाक्षेपं दर्शयति—(एकधेति-) तेजोधिकां **देवतां** यः पुमान् **एकधोपैति** नैरन्तर्येण सेवते **सा** देवता तम् **एनं** प्रदग्धुं समर्था भवति । तस्मात्पूर्वोक्तमग्नियक्तत्वं न कार्यमित्याक्षेपः ।

(५६) तस्योत्तरं दर्शयति—(नेतीति-) **न** अस्ति प्रदाह **इति** एवमुत्तरं **ब्रूयात्** अग्नेर्विरोधिदाहकत्वेऽपि स्वकीयसेवकं प्रति प्रजननेनानुग्राहकत्वान्निरन्तरमग्निं सेवमानः प्रजोत्पत्तिम् **एव** प्राप्नोति **इति** ॥

(५७) अत्र चोदकप्राप्तान्संभारानाधानमन्त्रांश्च पूर्वपक्षरूपेण निराचष्टे—(कृतयजुरिति-) यजुःशब्देन घर्मः शिर इत्याद्या आधानमन्त्रा विवक्षिताः । संभारशब्देन सिकतादिसप्त मृद्विशेषा अश्वत्थोदुम्बरादिसप्त वानस्पत्यविशेषाश्च विवक्षिताः । प्रथमाधाने यजुषामुच्चारितत्वात्संभाराणां च संपादितत्वादस्यापि पुनराधेयस्याऽऽधानादत्यन्तभेदाभावेन यजुःसंभारयोः सिद्धत्वात्तदुभयं पुनः **न** कर्तव्यम् **इति** पूर्वः पक्षः ॥

---

१ तै. सं. २. ६. २. । २ तै. सं. १. ३. १४. । ३ आप. श्रौ. सू. ५. २८. १०. । ४ तै. सं. ४. २. ७. । ५ तै. ब्रा. १. १. ७. ।

सभाष्यं पुनराधेयब्राह्मणम् ।

तत्र प्रथमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ।

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नीषोमयोस्तेजस्विनीस्तनूः संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तेनाग्नीषोमावपाक्रामताम् । ते देवा विजित्य । अग्नीषोमावन्वैच्छन् । तेऽग्निमन्वविन्दन्नृतुषु निलीनम् । तस्य विभक्तीभिस्तेजस्विनीस्तनूरवारुन्धत (१) । ते सोममन्वविन्दन् । तमघ्नन् । तस्य यथाभिज्ञायं तनूर्व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवंविदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेये कुर्यात् । यदनाग्नेयं पुनराधेये कुर्यात् । व्यृद्धमेव तत् ।

(४९) यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

तत्राऽऽद्येऽनुवाके पुनराधेयगतयोराज्यभागयोर्विशेषं विधातुमादावाख्यायिकामाह—यदा देवाः च असुराः च युद्धोद्युक्तास्तदा **देवा विजयम्** प्राप्तुकामाः स्वकीयाः **तेजस्विनीस्तनूरग्नीषोमयोः** स्थापितवन्तः । तनुशब्देन शरीरवत्प्रियभूतधनमुपलक्ष्यते । तयोर्धनं स्थापयतां देवानामयमभिप्रायः । **यदि** कथंचित् [नः] अस्मान्यदाऽसुरा **जेष्यन्ति** तदानीम् **इदम्** एव धनम् [नः] अस्माकं जीवनाय **भविष्यति** इति । ततः स्थापितेन **तेन** धनेन सह तौ **अग्नीषोमौ** पलायनमकुरुताम् । **देवाः** पुण्यवशेन विजयं प्राप्य सर्वत्र **अग्नीषोमौ** अन्विष्य क्वचित् **ऋतुषु** वेषमाच्छाद्यावस्थितम् **अग्निम्** अलभन्त । ऋतूनां बलवत्त्वेनावस्थितत्वाद्बलाद्ग्रहीतुमशक्ता देवाः **तस्य** अग्नेरुत्कोचरूपेण चतस्रो विभक्तीर्दत्त्वा स्वकीयाः **तनूः** धनरूपाः स्वीकृतवन्तः । ताश्च विभक्तयः सूत्रे स्पष्टमुदाहृताः—"अग्नेऽग्नेऽग्नावग्नेऽग्निनाऽग्नेऽग्निमग्ने" इति "चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति" इति । "समिधोऽग्न आज्यस्य वियन्तु तनूनपादग्न आज्यस्य वेतु" इत्यादिषु प्रयाजयाज्यासु संबुद्ध्यन्ता अग्निशब्दा आम्नाताः । तेभ्यः पुरस्तात्क्रमेण संबुद्धि-सप्तमी-तृतीया-द्वितीयाविभक्त्यन्ता अग्निशब्दाः प्रयुक्ताः । तेन तृप्तोऽग्निस्तदीयास्तनूर्दत्तवान् । अथ **ते** देवाः **सोमम्** अन्विष्य लब्ध्वा तं ताडयित्वा **तस्य** सकाशात्स्वकीयाः **तनूः** तत्तल्लक्षणेन सम्यगभिज्ञाय यथायथं गृहीतवन्तः । **ते** च तनुसमाना द्रव्यविशेषा ऐन्द्रवायवादिग्रहा **अभवन्** । देवैर्गृह्यन्त इति व्युत्पत्त्या ग्रहनाम संपन्नम् । यो यजमानस्तादृशं महिमानं विद्वान्गृह्णाति **तस्यैव** ग्रहा यथाशास्त्रं **गृहीताः** भवन्ति ॥

(५०) अथ यथोक्तविभक्तिविधिं मनसि निधाय तं विधिमुन्नेतुमुपोद्घातमाह—(**नानाग्नेयमिति-**) पुनराधेयम् तस्मिन् **अनाग्नेयं न कुर्यात्** । अत एव सूत्रकारेणोक्तम्—"सर्वमाग्नेयं भवति" इति । अनाग्नेयकरणे पुनराधेयस्य समृद्धिहेतुत्वं न स्यात् । क्रियते चात्र समिदादिषु चतुर्षु प्रयाजेष्वनाग्नेयम् । तन्मन्त्रेषु देवतान्तराणां समिदादीनां श्रूयमाणत्वात् । सोयमाक्षेपरूप उपोद्घातः । अत्र प्रयाजानां चतुर्णामाग्नेयत्वसंपादनाय यथोक्ता विभक्तीः कुर्यादिति विधिरुन्नेयः । प्रत्यक्षविधिश्च संहितायामाम्नातः—"विभक्तयो भवन्ति वाचो विधृत्यै" इति ।

१ गवामयनमाख्यातं द्वितीये हि प्रपाठके । यदनुक्तं संहितायां तत्सर्वमिह वर्णितम् ॥ २ ॥ तृतीये वाजपेयस्य ब्राह्मणं समुदीर्यते । दशानुवाकास्तेषु स्युः पुनराधानमादिमे ॥ स्यात्पिण्डपितृयज्ञोऽन्ते वाजपेयस्तु मध्यतः ॥ ३ ॥ यत्संहितायामाख्यातं पुनराधानमत्र तु । तस्योक्तस्यानुवादेन विशेषः कोऽपि वर्ण्यते ॥ ४ ॥ वाजपेयस्य मन्त्रास्तु संहितायामुदीरिताः । मध्यवर्त्यनुवाकेषु तद्व्याख्यानमिहेर्यते ॥ ५ ॥ द्वितीये वाजपेयस्य विधिस्तस्य ग्रहाः परे । चतुर्थे पशवः प्रोक्ताः पञ्चमे रथयोजनम् ॥ ६ ॥ मर्यादा धावनं षष्ठे यूपारोहणमुत्तरे । अष्टमे त्वभिषेकः स्यादतिग्राह्यास्त्वनन्तरे ॥ ७ ॥ नवमान्ता द्वितीयाद्या वाजपेयावबोधिनः । यः पिण्डपितृयज्ञोऽसौ दशमे स्पष्टमीरितः ॥ ८ ॥ तृतीयस्यानुवाकार्था इत्येवं समुदीरिताः । वाजपेयब्राह्मणार्था मन्त्रैः सह पुरेरिताः । आद्यन्तावनुवाकौ तौ व्याख्यास्येते इह क्रमात् ॥ ९ ॥ इत्यतिरिक्तो भाष्यग्रन्थः । २ आप. श्रौ. सू. ५. २८. ६. । ३ तै. ब्रा. ३. ५. ५. । ४ आप. श्रौ. सू. ५. २८. ३. । ५ तै. सं. १. ५. २. ।

(२) अनाग्नेयं वा एतत्क्रियते । यत्समिधस्तनूनपातमिडो बर्हिर्यजति । उभावाग्नेयावाज्यभागौ स्याताम् । अनाज्यभागौ भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति । अग्नये पवमानायोत्तरः स्यात् । यत्पवमानाय । तेनाऽऽग्नेयभागः । तेन सौम्यः । बुधन्वत्याग्नेयस्याऽऽज्यभागस्य पुरोनुवाक्या भवति । (३) यथा सुप्तं बोधयति । तादृगेव तत् । अग्निन्यक्ताः पत्नीसंयाजाना-मृचः स्युः । तेनाऽऽग्नेयꣳ सर्वं भवति । एकधा तेजस्विनीं देवतामुपैतीत्याहुः । एनमीश्वरा प्रदह इति । नेति ब्रूयात् । प्रजननं वा अग्निः । प्रजननमेवोपै-तीति । कृतयजुः संभृतसंभार इत्याहुः । (४) न संभृत्याः संभाराः । न यजुः

(५१) इदानीमाज्यभागयोर्विशेषं विधत्ते—(**उभाविति**–) प्रकृतावाद्य आज्यभाग आग्नेयः द्वितीयः सौम्यः । अत्र तु द्वितीयोऽप्याग्नेयः कर्तव्यः ॥

